Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

વિ. સં. ૧૪૫ કારતકી પૂર્ણિમા જન્મ, ૧૧૫૪ દિક્ષા કરણાવતી નગરી, ૧૧૬૬ આચાર્યપદ, ૧૨૨૯ નિર્વાણ. જગદુધ્ધારક જગત્ પૂજય કલીકાલ સર્વજ્ઞ શ્રીમાન્ હેમચંદ્રાચાર્ય મહારાજ
વી. સં. ૧૯૨૪ માં તાડપત્રપર હસ્તચિત્રીત મૂર્તિઓ પરથી લીધેલો ફોટો.



ચૌલુકય વંશ શીરોમણી ગુર્જરાદિ અઢાર દેશાધિપતિ પ્રબલ પ્રતાપી અહિંસા પ્રતિપાલક પરમ જીનભકત પરમાર્હત કુમારપાલ ભૂપાલ.

॥ श्री पार्श्वनाथाय नमः ॥

# श्री गुणवर्मा चरित्र.

( द्रुतविलंबितवृत्तम् )

विजयतां जिनवाक्यसुधारसः,
सकलपापविषापनयक्षमः ॥
अजनि यस्य निरीक्ष्य मनोज्ञतां,
शशिधराभिध एव सुधाकरः ॥ १ ॥

( उपजातिवृत्तम् )

करोतु वृद्धिं प्रभुपार्श्वदेवः,
संकल्पितातीतफलप्रदाता ॥

For Private and Personal Use Only

गुण० चरीत्र.

॥१॥

कल्पद्रुमो युक्तमनेन साम्यं, नाप्नोत्ययं पल्लवधूननेन ॥ २ ॥
वीरो जिनः सत्यपुरावतारः, सारश्रियं यच्छतु वांछितां वः ॥
यो वर्द्धमानां कमलां विधाय, पितुर्गृहेऽभूद्भुवि वर्द्धमानः ॥ ३ ॥

( आर्यावृत्तम् )

श्रीअंचलगच्छेशाः, श्रीमंतो मेरुतुंगसूरीशाः ॥
विजयतां यद्वाण्या, सिता मिता संयुता पयसा ॥ ४ ॥
देवगुरुधर्मतत्वत्रयीसमासेवनेन सम्यक्त्वम् ॥
तेनैव देवपूजा, मूलं तस्यापि विज्ञेया ॥ ५ ॥

( स्वागतावृत्तम् )

वर्तते यदि मनोरथमाला, राज्यऋद्धिरमणीषु विशाला ॥
ईप्सिता यदि मनोज्ञतनूजास्तत्कुरुध्वमनिशं जिनपूजां ॥ ६ ॥

( अनुष्टुपवृत्तम् )

मोक्षसौख्यं फलं मुख्यं, गौणं राज्यादिकं पुनः॥ देवपूजाभिधा कल्पवल्ली दत्तेऽन्वहं नृणाम् ७ ॥१॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

પ્રાતઃસ્મરણીય-જગત્પૂજ્ય-વિશુદ્ધ ચારિત્ર
ચૂડામણી-તીર્થોદ્ધારક-તપોગચ્છાલંકાર-
ભટ્ટારક-પૂજ્યપાદ-વિદ્વદ્વર્ય-શ્રી-શ્રી-શ્રી

જન્મ સં. ૧૯૩૦ પોષ સુ. ૧૧ દીક્ષા સં. ૧૯૪૯ અશાઢ શુદ ૧૧



ગણિપદ સં. ૧૯૬૨ કારતક વદ ૧૧ પંન્યાસપદ સં. ૧૯૬૨ માગશર સુદ ૫

।આચાર્યશ્રી-વિજયનીતીસૂરીશઃ॥
સૂરિપદ સં. ૧૯૭૬ માગશર સુદ ૫.

गुरुप्रसादान्माणिक्यसुंदरः सूरिरल्पधीः ॥
पूजाधिकारे वक्ष्यामि, गुणवर्मकथामहम् ॥८॥
पूर्वं राजगृहे वीरः, श्रेणिकाग्रे जगौ यथा ॥
तथा कथासौ विज्ञेया, पूजाफल निदर्शने ॥९॥
हस्तिनापुरमित्यस्ति, पुरं भरतमंडले ॥
विहारवेश्मप्राकारप्रतोली द्वारशोभितम् ॥ १० ॥
नरवर्मनृपस्त्वत्र, जिनधर्मपरोऽभवत् ॥
प्रिया लीलावती तस्य, शीलालंकारशालिनी ॥११॥
तत्कुक्षिभूः सुतस्तस्य, गुणवर्माभिधोऽभवत् ॥
कलाकलापकुशलः, कलशः स्वकुलस्य यः ॥१२॥
सभायां संस्थिते भूपेऽन्यदा वेत्री व्यजिज्ञपत ॥
चंपपुरनराधीशमंत्री द्वारे च तिष्ठति ॥ १३ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आनयेति नृपाज्ञप्तः, सोऽपि मंत्रिणमानयत् ॥ नत्वा निविष्टंतं भूपः, स्माहविस्मापयन् बुधान्
अस्ति चंपानिराकंपा, देशो न क्लेशलेशभाक् ॥ मन्मित्रं भूपतिः शूरः, पाति राज्यं प्रतापवान्
अथ मंन्त्रिश्वरः प्रोचे, सर्वत्र कुशलं नृप ॥ परं येनाहमायातः, कारणं तन्निशम्यताम् ॥१६॥
गुणावलीति नाम्नास्ति, तस्य राज्ञी गुणालया ॥ तत्कुक्षिजा सुता रत्नावली नाम्ना च विश्रुता १७
रूपलावण्यसौभाग्यभाग्यादिगुणरंजिता ॥ तस्याः स्वयंवरं कर्तुमारेभे भूपतिर्मुदा ॥१८॥
आकारयितुमादिष्टो, निःशेषान्नृपतीन्नहं ॥ प्राप्तोऽत्रापि ततः प्रीत्या, गम्यतां तत्स्वयंवरे
श्रुत्वेति भुपतिः प्राह, युक्तमुक्तं त्वया पुनः ॥ तत्र नागमनं भावि, यतो मां बाधते जरा २०

( उपजातिवृत्तम् )

जरा नराणां खलु काष्टकीटः, काष्टं यथांतस्तनु जीर्णयंती ॥
तच्चूर्णपातादिव शुक्ललोमा, विलोक्यतेऽसौ किल वृद्धलोकः ॥ २१ ॥
प्रायो जनाः स्युः पशवः शिशुत्वे, स्त्रीशैवलिन्यां शफरा युवत्वे ॥
धर्मे मतिर्यस्य न वार्द्धकेऽपि, हाहा हतोऽसो मृगवन्मनुष्यः ॥ २२ ॥
ततस्तिष्ठाम्यहं पुत्रं, प्रेषयामि स्वयंवरे ॥ इत्युक्त्वादर्शयद्भूपो, गुणवर्माणमंतिके



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विलोक्य गुणवर्माणं मंत्री दध्यौ मुदा हृदि ॥ यद्येष वृणुते कन्यां, सैव धन्या ततः क्षितौ ॥२४
एवमेव ततः कार्यमित्युक्त्वा मंत्रिपुंगवः ॥ ययावन्यत्र भूपेनादिष्टोऽचालीत् कुमारराट् ॥२५
अर्धमार्गे व्रजन्नग्रे, तूर्णमायातमग्रतः ॥ अद्राक्षीत् करभारूढं, स पितुर्लेखहारकम् ॥२६॥
साश्चर्यं भूपतनये, लेखमर्पयति स्म सः ॥ तस्य शीर्षं तमुन्मुद्रय, वाचयामास राजसूः ॥२७॥
स्वस्तिश्रीहस्तिनपुरान्नरवर्म नरेश्वरः ॥ यथास्थानस्थितं पुत्रं, गुणवर्माणमादिशेत् ॥२८॥
अस्त्यत्र कुशलं किंच, जयंतो नाम केवली ॥ प्राप्तोऽस्ति तत्समीपेऽहं, संयमं लातुमुत्सहे २९
आगंतव्यं त्वया शीघ्रं, न्यस्य राज्यं यथा त्वयि ॥ स्वकार्यं साधयाम्येष, दुर्लभः समयः पुनः ३०
ज्ञात्वेति कार्ययुगलं व्यग्रेऽथ नृपनंदने ॥ पुरःकोऽपि समायातश्चंपातो लेखहारकः ॥३१
लेखं समर्प्य सोऽवादीच्छूरेण कथितं हि वः ॥ अपटुत्वेन कन्यायाः, स्थितोऽत्रास्ति स्वयंवरः ॥
अथ प्रीतो निजं प्रोचे, कुमारो लेखहारकम् ॥ पश्चात्त्वं प्रहितः पित्रा, समागाः पुरतः कुतः ॥३३
स जगौ स्वामिनिर्देशाच्चंपामेव गतोऽस्म्यहं ॥ अनागतं च तत्र त्वा, ज्ञात्वा व्याघुटितः ज्ञाणात् ॥
पुरं प्राप्तः कुमारोऽथ, पितुः प्रीतिकृतेऽजनि ॥ सोऽपि तस्मै निजं राज्यं, दत्वा संयमभागभूत्
गुणवर्माथ संप्राप्तराज्यः प्राज्यप्रतापभाक् ॥ स्वप्रजाः पालयामास, वासवोपमलीलया ॥३६॥



For Private and Personal Use Only

सभास्थिते नृपेऽन्येद्युर्दूतो वेत्रिनिवेदितः॥ समेतः प्रोचिवानेवं, पुनर्जातः स्वयंवरः॥३७
गुणवर्मा नृपोऽचालीदथ प्रस्थितसेनया ॥ संप्राप्तश्च पुरीं चंपां, तस्थिवान् राजमंडले॥३८
गौरगौरवपूरेण, शूरेण बहुमानितः ॥ सोऽत्रावासमलंचक्रे, शक्रेण समविक्रमः ॥३९॥
रत्नावलीसमादिष्टा, सारसी नामतः सखी ॥ सायंतनक्रियाप्रांते, प्राप्ता सा तेन मानिता॥४०
कृत्वैकांतं च सावादीत,कन्योक्तं शृणु वाचिकम् ॥ अपाटवस्त्ररूपं यत्पूर्वं जज्ञे तदप्यहो ॥४१
जाते स्वयंरारंभे, रंभेवान्येद्युरद्भुतम् ॥ रूपं दधाना सा सायं, गवक्षस्था ह्यराजत॥४२॥
चिल्लीव रुदती श्येनेनैव तत्र खगेन सा॥ उद्धृत्य गगने नीत्वा, वने क्वापि व्यमुच्यत ॥४३
न्यस्य पादं गले तस्याः, खड्गमुत्क्षिप्य भीषणम् ॥ऊचे मुंचाम्यहं कंप्रे,मद्वाचं यदि मन्यसे॥
मयास्ति कारितं चैत्यं, वैताढ्याचलसंनिधौ ॥ स्थापिता च युगादीशमूर्तिस्तत्र मनोहरा॥४५
जिनपूजामहं रात्रौ, तत्र कुर्वे निरंतरम् ॥ मिलंति खेचराः सर्वे वीक्षितुं किल कौतुकम्॥
राजकन्या सलावण्यास्तिस्रो नृत्यंति तत्र च ॥ त्वमप्यद्भुतचातुर्या, तुर्या तासां भवान्वहम्॥
अदृश्यं प्रथमे यामे, यामिन्या नित्यमेष्यति ॥ विमानं तत्त्वयारुह्यागंतव्यं जिनमंदिरे॥४८
नांगीकार्यो विवाहोऽपि, ममादेशं विना त्वया॥सा स्वीकृतेऽखिले तेन पुनर्मुक्ता स्ववेश्मनि

ततश्च तेषामेव सदुपदेशप्रभावाद् ग्रंथोऽयं प्रकटदशामुपैत्यधुना जैनसाहित्ये । यद्यप्यस्य संशोधनकार्यमतिसावधानतया प्रयत्नपूर्वकं च यथामति कृतमस्ति तथापि जनस्वभावसुलभात् प्रमादादक्षरयोजकदोषाच्च ये ये दोषा दृक्पथमागच्छँस्तेषां शुद्धिपत्रमपि प्रकटीकृतमस्त्येव, परं—

स्तका च तथा नारी शुद्धयेतां न कदाचन '

इति लोकोक्त्या यत्र कुत्राऽप्यायायाद्दृष्टिदोषो मुद्रणदोषो वा तर्हि—

" गच्छतां स्खलनं क्वाऽपि भवत्येव प्रमादतः ।
हसन्ति दुर्जनास्तत्र समादधति सज्जनाः " ॥

इतीममनुसृत्य न्यायं कृपापीयूषपूर्णान्तःकरणा विवेकिनो विद्वांसः क्षंस्यंत इत्याशास्ते विद्वद्वशंवदः—

संशोधकः



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

# शुद्धिपत्रम्.

| पत्रांकः | पंक्तिः | अशुद्धम्. | शुद्धम्. |
|---|---|---|---|
| २ | १२ | चांप | चंपा |
| ,, | ,, | तिष्टति | तिष्ठति |
| २-२ | ३ | मंत्रिश्वरः | मंत्रीश्वरः |
| २-२ | ५ | भूपतिर्मुर्दा | भूपतिर्मुदा |
| २-२ | ७ | भुपतिः | भूपतिः |
| २-२ | ८ | काष्टकीटः | काष्ठकीटः |
| २-२ | ८ | काष्टं | काष्ठं |
| २-२ | १२ | ततस्तिष्टाम्यहं | ततस्तिष्ठाम्यहं |
| ३ | १२ | साऽपि | सोऽपि |
| ४ | ३ | मलंचके | मलंचक्रे |
| ,, | ६ | स्वयंरारंभे | स्वयंवरारंभे |
| ,, | ,, | गवक्षस्था | गवाक्षस्था |
| ,, | १० | नितरम् | निरंतरम् |
| ,, | ,, | सर्व | सर्वे |

| पत्रांकः | पंक्तिः | अशुद्धम्. | शुद्धम्. |
|---|---|---|---|
| ७ | २ | हषान्दपः | हर्षान्नृपः |
| ,, | ११ | इस्ततः | इतस्ततः |
| ८ | १२ | क्रशलेशविवर्जितः | क्लेशलेशविवर्जितः |
| ९ | ९ | ब्रजंतमपि | व्रजंतमपि |
| १० | ८ | दृष्ठा | दृष्टा |
| ,, | ११ | विषणचित्तोऽसो | विषण्णचित्तोऽसौ |
| १४ | ३ | च्यूतं | च्युतं |
| १७ | ३ | शादूलविक्रीडितम् | शार्दूलविक्रीडितम् |
| ,, | १० | श्रेष्टी | श्रेष्ठी |
| १८ | ३ | गिरिगुहं | गिरिगुहां |
| २० | ४ | पार्श्वदेवधिश्राष्टाता | पार्श्वदेवश्चाधिष्ठाता |
| ,, | १० | सोधर्मं | सौधर्मे |
| २१ | ३ | श्रुत्वेयुद् | श्रुत्वेत्युद् |
| ,, | ४ | स्तत्रार्हजन्म | स्तत्रार्हज्जन्म |

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



| पत्रांकः | पंक्तिः | अशुद्धम्. | शुद्धम्. | पत्रांकः | पंक्तिः | अशुद्धम्. | शुद्धम्. |
|---|---|---|---|---|---|---|---|
| २३ | १० | अचलगछेत्त्श | अंचलगच्छेश | ,, | ९ | आगच्छति | आगच्छेति |
| २४ | २ | नागदशाह्वयः | नागदशाह्वयः | ५४ | ९ | पृष्टानुगा | पृष्ठानुगा |
| २५ | ९ | कूपदष्टातो | कूपदृष्टांतो | ५५ | ८ | निजोत्संगं | निजोत्संगे |
| ३१ | २ | तारं | तार | ५७ | २ | बद्बो | बद्धो |
| ३४ | ११ | धर्मण्यपि | धर्मण्यपि | ५८ | ६ | सोमस्त | सोमश्रीस्त |
| ३५ | १ | धावतः | धावत | ,, | १० | स्रजो | स्रजो |
| ३६ | ३ | पुरी | पुरीं | ,, | १२ | कुसुमस्रजः | कुसुमस्रजः |
| ३७ | ४ | क्रमेणे | क्रमेण | ५९ | ४ | प्राचिरे | प्रोचिरे |
| ४० | १० | विषण्णधी | विषण्णधीः | ,, | ९ | पुष्पस्रक् | पुष्पस्रक् |
| ४१ | ६ | व्यचारयामास | विचारयामास | ६० | २ | तदद्दष्ट्वा | तद्दृष्ट्वा |
| ,, | ७ | विलोकयल्लक्ष्मीं | व्यलोकयल्लक्ष्मीं | ६१ | २ | नाम्रा | नाम्ना |
| ४५ | २ | श्रेष्टिनो | श्रेष्ठिनो | ,, | ,, | स्रयर्थे | स्त्र्यर्थे |
| ४६ | ११ | कीडंतं | क्रीडंतं | ६२ | ११ | नीवेश्यैनां | निवेश्यैनां |
| ५२ | २ | लक्ष्मधरो | लक्ष्मीधरो | ६४ | १ | षठश्छायाटरो | षष्ठश्छायाकरो |
| ,, | ८ | कुसुमाग्रह | कुसुमाग्रहम् | ६५ | १२ | सुरागंधसमन्वित | सुरागंधसमन्वितम् |
| ५३ | ६ | ददशर्कं | ददर्शार्कं | ६६ | ४ | त्रपुष्णं | त्रपूष्णं |



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



| पत्रांकः | पंक्तिः | अशुद्धम् | शुद्धम् | पत्रांकः | पंक्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|---|---|---|---|
| ७० | १२ | मंतिता | मंत्रिता | ,, | ९ | क ूरतां | कर्पूरतां |
| ७१ | ४ | स्वबुद्धया | स्वबुद्ध्या | ७९ | १० | सुस्वान्यसैा | सुखान्यसैा |
| ७२ | ५ | तच्छुत्वा | तच्छ्रुत्वा | ,, | ,, | भुक्तवा | भुक्त्वा |
| ,, | ,, | गृहीतोऽस्त्यसैा | गृहीतश्चास्त्यसैा | ८१ | ८ | पृथक | पृथक् |
| ७३ | १ | पस्मेश्वरी | परमेश्वरी | ८३ | २ | वरमाला | वरमालां |
| ,, | ४ | येथारुचि | यथारुचि | ,, | ६ | स० | स |
| ७४ | १ | प्रेक्षिता | कृता | ८४ | ३ | तच्छुत्वा | तच्छ्रुत्वा |
| ,, | ७ | गेहं | गेहे | ८६ | १ | तच्छुत्वा | तच्छ्रुत्वा |
| ,, | ११ | सज्ञायन | सज्जयन् | ८७ | २ | कार्थंकारं | कथंकारं |
| ७५ | १२ | दुतं | द्रुतं | ,, | ७ | वृद्दिरुध्यते | वृध्धिरुध्यते |
| ७६ | ९ | द्त्वा | दत्त्वा | ८८ | २ | भवद्भयां | भवद्भयां |
| ,, | ,, | मस्म | भस्म | ,, | १० | देवो | देव ! |
| ७७ | २ | हतुं | हंतुं | ,, | ११ | गवाक्षयित् | गवाक्षात् |
| ,, | ४ | बधुरसि | बंधुरसि | ८९ | ७ | श्रृत्वोपदेशं | श्रुत्वोपदेशं |
| ,, | १० | संमाप्तः | संप्राप्तः | ९१ | १ | सुमनाहरम् | सुमनोहरम् |
| ७८ | २ | कपूरो | कर्पूरो | ,, | २ | वृणिष्वेति | वृणीष्वेति |



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



| पत्रांकः | पंक्तिः | अशुद्धम् | शुद्धम् | पत्रांकः | पंक्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|---|---|---|---|
| ९५ | १० | च्शरीराभरणादिकम् | शरीराभरणादिकम् | ११५ | ५ | लम्रः | लग्नः |
| ९६ | ७ | एषः | एष | ,, | ९ | रुधिरेः | रुधिरैः |
| ९७ | ८ | भ्रमद्भ्रमरझंकारं | भ्रमद्भ्रमरझंकारं | ११७ | ५ | परिणेप्यामि | परिणेष्यामि |
| ९८ | ४ | दैवयोगन | दैवयोगेन | १२१ | ८ | सुताऽभवत् | सुतोऽभवत् |
| ९९ | ७ | पात्रावतीर्णा | तत्रावतीर्णा | १२३ | ७ | निला | नीला |
| ,, | ८ | ुण्यप्रभावाढयः | पुण्यप्रभावाढ्यः | १२८ | ६ | इंद | इद |
| १०१ | ८ | न्नष्ट्वा | न्नष्ट्वा | १३० | ८ | बुध्धया | बुद्ध्या |
| ,, | १० | ुष्पकेतु | पुष्पकेतुं | ,, | १२ | परमास्त | परमस्ति |
| १०३ | ६ | भाग्येशालिनः | भाग्यशालिनः | १३२ | १० | सर्वलोकोनां | सर्वलोकानां |
| १०४ | ५ | बुद्धया | बुद्ध्या | १३३ | १२ | वामनोऽ | वामनोऽयं |
| ,, | ७ | भारपट्टा | भारपट्टो | १३४ | १२ | हारकुंडलकाटीर | हारकुंडलकोटीर |
| ,, | ११ | बुध्धया | बुध्धया | १३५ | ७ | प्रेषितस्तेनापहाराय | प्रेषितस्तेनोपहाराय |
| १०६ | ४ | वक्रमेव | वक्त्रमेव | १३६ | १० | तान्मत्रं | तन्मित्रं |
| ,, | ९ | मंत्रि | मंत्री | ,, | ११ | तत्सखाः | तत्सखा |
| १०९ | ६ | स्नेहभा | स्नेहभाक् | १३८ | १२ | श्रुयतां | श्रूयतां |
| १११ | १ | श्रेष्ठी | श्रेष्ठी | १४१ | ८ | देवलाका | देवलोका |



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



| पत्रांकः | पंक्तिः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| १४४ | ९ | जटाभा ं | जटाभारं |
| १४६ | १ | परीक्ष्येहं | परीक्षेऽहं |
| १४७ | ९ | क्रमेणामूद् | क्रमेणाभूद् |
| १५१ | २ | मूलादपि | मूलादपि जहि |
| ,, | ५ | श्वाचेत्ः | श्वाचेत् |
| १५४ | ५ | श्रेष्ठयत्र | श्रेष्ठश्चत्र |
| १५५ | ९ | सोऽधिष्ठाता | सोऽधिष्ठाता |
| ,, | १० | चतस्त्रोऽपि | चतस्रोऽपि |
| १५६ | ३ | प्रज्ञाप्राग्भारतोऽभवत् | प्रज्ञाप्राग्भारतोऽभवन् |
| ,, | १२ | हंसवस्थिताः | हंसवत्स्थिताः |
| १५८ | ७ | वारित | वारितः |
| १५९ | १० | तान्वाचयंतु | ता वाचयंतु |



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only

# प्रस्तावना.

इदं तावदवधारयंतु सहृदयाः सुधियो विद्वन्महाशया यत् किलाऽनाद्यनंतकालीने घोरघोरांऽधतमसाऽपरपर्यायाऽज्ञानसमावृते विविधयोनिसमापतन्ननेकजीवसंकुलेऽस्मिन्निःसारे संसारे स्वहितमनुमन्यमानैः प्रत्येकसुज्ञमनुजैः स्वकर्तव्यत्वेनाऽदः सुतरां विज्ञेयमेव यद् धर्माऽर्थकाममोक्षाऽभिधाने पुरुषार्थचतुष्टये मोक्षस्यैव प्राधान्यमादिशंति प्राचीनाः पूज्या मुनिपुंगवाः । तत्साधने च मुमुक्षुभिः सर्वैर्नितरां बद्धपरिकरैरेव भाव्यमित्युद्घोषयंति नैकशास्त्रपटहोद्घोषणापूर्वकमेव ते महातपस्विनः पूर्वपूरुषाः । वस्तुस्वरूपाऽज्ञानत्वरूपाऽतिदुष्टमिथ्यात्वग्रहग्रहिलचेतसां ग्रहणधारणपटुत्वे सत्यपि बालस्वरूपत्वेनैव व्यपदिश्यमानानामज्ञानाऽऽवृतमानवानां मोक्षाप्तये च तैरेव कृपापूर्णाऽऽशयैर्वैद्यवर्यैनरैर्मोक्षस्य साधनत्वेन सुगमसरलभाषोपनिबद्धा ज्ञानिकथिताभी रहस्यपूर्णकथाभिः परितः पूर्णा ऐतिहासिका बहवो ग्रंथा ग्रथिताः सन्त्येव । तेषामेकतमस्यास्य गुणवर्मचरित्रग्रंथस्यापि जिनेन्द्रस्य भगवतो वीरस्यैव मुखांबुजान्निर्गताभिः सुरसाऽमृत-



For Private and Personal Use Only

कथाभिः परिणतत्वेन मोक्षसाधनतामुपयाति सर्वेषां साधककोटिप्रविष्टानां मुमुक्षुजनानाम्। न च श्रुताऽऽगमपर्यायैः प्रसिद्धानां सूत्रवृत्तिचूर्णिनिर्युक्तिप्रकरणादिप्राचीनतमग्रंथनिवहानां मोक्षसाधनतया मुक्तिमार्गदर्शकत्वेन वा विद्यमानत्वमत्युच्चतरकक्षायां च सर्वादृतत्वं वर्वर्त्येवेति किमीदृशैश्चरित्रादिग्रंथैरिति वाच्यम्; समग्रशास्त्राऽतिशायित्वेन जगति प्रथितानां गूढरहस्यैः पूर्णानां तेषां महाग्रंथानां ज्ञानस्य केषांचित्तीव्रतरशेमुषीमतामभ्यासकानामेव संभवात्, नेतरेषां सामान्यमतिमतां बालानाम्; तेषां तु धर्मतत्वं प्रकटतया प्रतिपादयन्ति सोपानावलिवत् क्रमशः स्थितिमुच्चां प्रापयन्ति तेषु च महाग्रंथेषु संस्कारापादनपूर्वकं सुखावगाहनां कारयन्तीदृक्चरित्रादीन्येव विशेषत उपयोगितामावहंति । किंच एतादृशां चरित्रग्रंथानां पठनपाठनश्रवणमननादिभिः पूर्वेषां प्रातःस्मरणीयपुरुषधौरेयाणां चरितादीनि बालानां स्वच्छादर्शनिभेषु हृदयेषु प्रतिबिंबतामायांति, येन च तेषां पूज्यनराणामनुष्ठानादि– " यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते " ॥



For Private and Personal Use Only

—इति न्यायाद् विगणय्य प्रमाणभूतं सुतरां सज्जानि भवंति तदनुसरणे बालानां चेतांसि । एवं चेदं गुणवर्मचरित्रमपि सामान्यबुद्धिमतां बालजीवानामतिशयेनोपयोगि सद् धर्मपथस्य मुक्तिमार्गस्य च प्रदर्शकमेवेति निर्विवादमस्याऽत्युत्तमत्वम् । ग्रंथस्याऽस्य कर्तारोंऽचलगच्छेशाः श्रीमाणिक्यसुंदरसूरय एवेति प्रतिसर्गमस्मिन् ग्रंथे स्वनामनिर्देशं कृत्वा तैरेव निवेदितप्रायम् । अपरं चैतैः सूरिवरैरेतद्ग्रंथवर्जमन्येऽपि माणिक्यांक-चतुः-पर्वी-शुकराजकथा-पृथ्वीचंद्रचरित्रादयो ग्रंथाः प्राणीयंतेति तैरेवैतद्ग्रंथप्रशस्तावुल्लिखिते-नैतेनाऽनुष्टुभा विज्ञायते—

“ माणिक्यांकश्चतुःपर्वी शुकराजकथा तथा ।
पृथ्वीचंद्रचरित्रं च ग्रंथा एतेऽस्य बांधवाः ” ॥ इति

शोचनीयमेतदेव यदत्रभवंतः सूरिवर्याः कदा कतमं प्रदेशं स्वकीयपवित्रजनुषा समलंकृतवंत इति नैव ज्ञायते, किंत्वेतावन्मात्रं ज्ञातुं शक्यते यद् ग्रंथस्याऽस्य रचना विक्रमादारभ्य चतुरशीत्यधिकेषु चतुर्दशशतसंवत्सरेषु गतेषु भगवन्महावीरचैत्याऽलंकृते ॥३॥

श्रीसत्यपुरे ( साचोरग्रामे ) समजनीति, यथाऽऽह भगवानयमेव सूरिराड् ग्रंथस्याऽस्य प्रशस्तौ—

" चतुरशीत्यधिकेषु समाचतु-र्दशसु तेषु गतेषु च विक्रमात्।
अयमभूज्जिनपूजनसत्कथा-समुदयः स करोत्विह मंगलम् ॥
श्रीवर्धमानजिनभवन-भूषिते रचित एष सत्यपुरे ।
ग्रंथः श्रीमदुपाध्याय-धर्मनंदनविशिष्टसांनिध्यात् "॥

अस्मिँश्च ग्रंथे स्नात्रादिसप्तदशप्रकारैरर्हत्पूजनतः किमदृष्टं समापद्यते, तथाचैवं परिपूज्य कैर्भव्यपुरुषैस्तत्संपादितमित्येतच्छ्रीगुणवर्मकथानुसंधानपूर्वकं तस्य भूपालस्य सप्तदशपुत्राणां कथाद्वारा चित्ताकर्षकभाषया निर्दिश्यते । चरित्रमिदं श्रीविजयनीति-सूरीश्वरशिष्यरत्नैः पंन्यासदानविजयैरेव प्रथमतो मुद्रितमुपलब्धम्, तस्य च प्रायः प्रति-स्थलमशुद्धत्वेन पुनर्मुद्रणमर्हतीदमित्याकलय्य, तथैवाऽशुध्धावस्थायामपि समाजे प्रायः सर्वत्र तत्प्रसिद्ध्यभावं च पर्यालोच्य तैरेव महाशयैस्तत्संशोधनकार्ये न्ययुज्यताऽयं जनः। ॥४॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वस्थीभूता मया पृष्टा, तत्सर्वं निजगाद सा॥ अंगापटुत्वव्याजेन, स्थापितोऽस्याः स्वयंवरः॥
पिताऽपृच्छन्निमित्तज्ञमन्यदा दूनमानसः॥ को दोषो विद्यते पुत्र्याः, सोऽप्यभाषत भूपतिम् ॥५१
अस्ति दोषो महान् कोऽपि, दुःसाध्यो भिषजामपि। नृपोऽवादीत्सुतासैषा, किंस्थास्यत्यविवाहिता
निमित्तज्ञो जगादैवं, गुणवर्मास्ति भूपतिः॥ स एव पतिरस्त्वस्याः, स कर्ता दोषनिग्रहम् ५३
निमित्तज्ञं विसृज्याथ, तत्सर्वं पृथिवीपतिः॥ सुताया ज्ञापयित्वाशु, स्वयंवरमकारयत् ॥५४॥
अतस्त्वां प्रार्थयत्येषा, त्वमेव हि वरिष्यसे॥ ब्रह्म पाल्यं मया तावद्यावन्मोक्षो न संकटात् ५५
ओमित्युक्ते नरेंद्रेण, सारसी हृष्टमानसा ॥ रत्नावल्याः पुरः प्राह, तत्सर्वं वत्सलाशया ५६
प्रगे राजकुले नामांकितसिंहासनस्थिते ॥ प्राप्ता स्वयंवरं मालाधारिणी राजकन्यका ५७
वर्णितेऽथ प्रतीहार्या, सकले राजमंडले ॥ गुणवर्मा तया वव्रे, जातो जयजयारवः॥५८॥
पाणिग्रहोत्सवे जाते शूरेण बहु मानिताः ॥ विसृष्टा भूभुजःसर्वे, ययुर्निजनिजं पुरम् ५९
मासं सगौरवःस्थित्वा, गुणवर्माप्यथाचलत् ॥ रत्नावल्या समं प्राप्तः, पुरं प्रौढमहोत्सवैः॥६०॥ ॥५॥
तं मध्यसंसदासीनं. प्रतिहारोऽन्यदा जगौ ॥ भूतानंदाभिधो योगी, भवंतं द्रष्टुमिच्छति॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राजादिष्टेन तेनाशु, समानीतःसभांतरम् ॥ निजगाद नृपं योगी, दत्वाशीर्वादमादरात् ॥
मंत्रस्य पूर्वसेवा हि, कृता द्वादशवार्षिकी ॥ साधयाम्यथ सांनिध्यात्तव साहायिको भव ६३
रात्रावद्य चतुर्दश्यामवश्यं प्रेतमंदिरे ॥ गत्वा मंत्रो मया साध्य, उपकारपरो भव ॥६४॥
ओमित्युक्ते नृपेणाथ, सज्जीभूय समागते ॥ योगी चैषोऽपि यामिन्यां, जगाम प्रेतमंदिरम् ६५
विधाय मंडलं योगी, प्रारेभे मंत्रसाधनम् ॥ करवालकरस्तस्थौ, नृपः पश्यन् दिशोऽखिलाः ॥६६
जाते क्षणेन निर्घाते, प्रत्यक्षः कोऽपि चेटकः ॥ बभूव भीषणाकारां, कर्त्रीकां कंपयन् करे ६७
हसतो नृत्यतस्तस्य, फेत्कारं मुंचतो मुखे ॥ चकर्त्त करवालेन, कर्त्रीकां साहसी नृपः ॥६८
अहं तुष्टोऽस्मि तुष्टोऽस्मीत्यूचाने चेटके नृपः ॥ जगौ च योगिने सिद्धिं, देहि क्लेशकृतेऽन्वहम् ॥
सिद्धमेतत्परं स्वार्थं, प्रार्थयेत्यत्र भाषिणि ॥ कुरु मे निग्रहोपायं, रत्नावल्या विरोधिनः ॥७०॥
दत्वा दिव्यांजनं तस्मै, तिरोधत्त स चेटकः ॥ योगी ययौ निजं स्थानं, नृपोप्यागात् स्वमंदिरम्
सुखसुप्तो निशां नीत्वा, कृतप्रातःक्रियः प्रगे ॥ रत्नावल्या समं शास्त्रविनोदै र्दिनमत्यगात ७२
कृत्वा दिव्यांजनं नेत्रे, गतो रत्नावलीगृहम् ॥ नृपो विमानमद्राक्षीत, व्योमश्रीकर्णकुंडलम् ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तया समं तमारुह्य, व्रजन्नंबरवर्त्मना ॥ स चैत्यं तुंगमद्राक्षीद्वैताढ्यगिरिसंनिधौ ॥ ७४ ॥
कृतकोलाहलं हर्षान्दपः खेचरमंडलम् ॥ ददर्श तत्पुरःस्थं च दुर्द्धर्षखेचरेश्वरम् ॥७५॥
उत्तीर्य व्योमयनात्स, प्रणम्य वृषभप्रभुम् ॥ अदृश्य एव तत्रास्थाच्चित्रवीक्षणलालसः ॥७६॥
रत्नावल्यपि तत्रार्हन्मूर्त्तिं नत्वा खगाज्ञया ॥ आयातास्वन्यकन्यासु, नर्त्तकीवन्ननर्त्त सा ॥७७॥
पतिताभरणं तस्या, नृत्यव्याक्षेपतो नृपः ॥ जग्राह तिस्रः कन्यास्तु, चक्रुर्गीतादिकक्रियाम् ॥७८
अथ निवृत्ते संगीते, खगं रत्नावली जगौ ॥ पतिताभरणं किंचिन्न लभेऽद्य जिनालये ॥७९॥
कोपाटोपात् खगःप्रोचे, रे रे शृणुत खेचराः ॥ दत्वाभरणमेतस्या, गम्यतां हन्मि वोऽन्यथा ८०
ते तं कोपाकुलं वीक्ष्य, पक्षिवत् प्रपलायिताः ॥ खगो रुष्टो दधावेऽथ, कन्यासु करवालभाक् ८१
वन्हिः शुष्कमशुष्कं वा, पुरस्थं ज्वालयेद्यथा ॥ निर्मंतुं वा समंतुं वा, तथा हन्यात् क्रुधांधलः ८२
तद्दृष्ट्वा नृपतिस्तस्याऽदृश्य एव करस्थितम् ॥ करवालं तदा जह्रे, स्त्रीणां हत्यामसासहिः ॥८३॥
अपश्यन् नृपतिं क्वापि, सिक्कात्पतितौतुवत् ॥ इतस्ततःपश्यतिस्म, स विस्मयरसान्वितः ८४
तासु कोपात्पुनस्तस्मिन्, बध्वा मुष्टिं प्रधावति ॥ भूपालः प्रकटीभूतो, भ्रकुटीभालभीषणः ८५

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धिक्धिक् तव महाकोपं, व्यर्थं ते जिनपूजनम् ।। अर्हदाशातनाकारि, न पुण्यमपि लभ्यते ८६
जल्पंतमिति तं वीक्ष्य, सूर्यवद्दुर्द्धरौजसम् ।। खेटस्तथा हृदि क्षुब्धो, यथा तच्चरणेऽपतत् ८७
भूपो भूयोऽप्यभाषिष्ट, निविष्टो रंगमंडपे।। रात्रौ पूजा निषिद्धास्त्याशातना तु विशेषतः ८८
तांबूलं भोजनं पानमुपानत द्यूतमैथुने ।। स्वापो निष्ठीवनं मूत्रमलौ चाशातना इमे ८९
स्त्रीणांभोगांतरायोऽपि, भवेत् कर्मनिबंधनम्।।श्रुत्वेति खेचरः प्रोचे, साध्वहं बोधितस्त्वया।।
प्रियायै भूभुजा दत्ते, पतिताभरणे तदा ।। अन्वमीयत खेटेन, स तस्या इंगितैः प्रियः ९१
भूपं विलोक्य कन्यासु, पृच्छंतीषु पुनःपुनः।। रत्नावली स्मितेनैव, स्माह स्वं लज्जिता पतिम्
अस्माकमपि कांतोऽस्तु, त्वत्पतिस्तासु तामिति ।। क्षामस्वरं वदंतीषु, ज्ञातवृत्तोऽवदन्नृपः ९३
अदत्ता दुह्यते कन्या, ह्यन्यायोऽसौ न युज्यते ।। पितृमातृप्रदत्तास्तत्परिणेष्याम्यमूर्ध्रुवम्।।
खेटेन निन्यिरे कन्याः, स्वस्वस्थानं ततः क्षणात्।। जिनं प्रणम्य भूपोऽपि, सप्रियःस्वपुरं ययौ
महोपकारं स्मरति, प्रयाते स्वपुरं खगे ।। पट्टदेवी कृता रत्नावली राज्ञा प्रमोदतः ।।९६।।
द्वाःस्थेनावेदितोदूतोऽन्यदा भूपं व्यजिज्ञपत्।। राजन् कलिंगदेशोऽस्ति, क्लेशलेशविवर्जितः।।



For Private and Personal Use Only

तत्र हेमपुरं नाम, पुरं नाममनोहरम् ॥ राजा हेमांगदः पाति, हेमाद्रिरिव धैर्यभूः ॥९८॥

 हेमचूला प्रिया तस्य, सत्प्रशस्यगुणक्रिया ॥ तत्कुक्षिसरसि हंसी, कन्यास्ति कनकावली॥ 

 सा तारुण्ये प्रदत्तासीद्राज्ञे समरकेतवे ॥ केनापि हेतुना तस्या, विवाहो नाभवत्पुनः१००

अथ मन्मथदूना सा, त्वामेव पतिमिच्छति ॥ प्रहितोऽस्मि ततस्तस्याः, पित्राहं भवतः कृते १०१

पंचाशद्योजनी च स्यात्तत्पुरं नगरादतः॥ पंचविंशतियोजन्यां, गिरिरस्त्यंजनाह्वयः ॥१०२॥

तत्रास्ति समरकेतुः, संकेतः शौर्यसंपदाम् ॥ यस्मै पूर्वं प्रदत्तासीत्कन्या सा कनकावली १०३

अयं यथा न जानाति, तथागम्यं त्वयान्यथा॥ विधत्ते स विवाहस्य, व्याघातमपि चेत्कुधीः

पथप्रयोग्यं करिष्यामीत्युक्त्वा दूतं विसृज्य तम्॥ नृपतिःसुदिनेऽचालीद्बलेन सहितोद्विधा॥

भाग्ययोगात्तदा तस्य, वैरी रोगातुरोऽभवत्॥ व्रजंतमपि तं श्रुत्वा, मनस्येव विषण्णवान्॥१०६॥

नृपो हेमपुरं प्राप्तः, श्वशुरेण कृतादरः॥ महोत्सवादुपायंस्त, सस्नेहां कनकावलीम्॥१०७॥

दिनानि कत्यपि स्थित्वाव्यावृत्तः स्वपुरं प्रति॥ सैन्यमावासयामासांजनगिरिगिरेर्वने॥१०८॥ 

समस्पहितो दूतस्तत्रागत्य नृपं जगौ ॥ मन्मुखात्समरेणोक्तं, शृणु किंचन वाचिकम्१०९

न जराऽऽपतिता यावदप्रसूतैव तावता ॥ ऊढाप्येषा ह्यनूढैव, समरे समराजिते ॥ ११० ॥
सुखेन दीयतेऽमुष्मै, यद्येषा भवता स्वयम् ॥ गुणं स मन्यते तर्हि, श्रमो येनास्य वारितः ॥ १११
दूते निर्वासिते तेन, याते सति दिशोऽखिलाः ॥ स्त्रीवद्रजस्वला जाता, वाद्यनादास्तथाभवन्
प्रियानेत्रद्वये न्यस्य, दिव्यांजनमथो नृपः ॥ प्रियां प्रोचे प्रियेऽत्रैव, स्थातव्यं यावदागमः ॥ ११३
बाढमुक्ते तया राज्ञि, सायुधं रथमाश्रिते ॥ सज्जीभवति सैन्ये च, सा दध्यौ निजचेतसि ११४
दिव्यांजनप्रभावेण, न मां द्रक्ष्यति कश्चन ॥ प्रियपृष्ठस्थिता तस्य, वीक्षेऽहं युद्धकौतुकम् ११५
ध्यात्वेति सानुलग्नेव, चलिता भूभुजा सह ॥ समरेण समं पत्युर्युद्धं वीक्ष्य विसिष्मिये ११६
सा पश्यंती प्रमोदाश्रुपूरेण प्लावितांबका ॥ गलद्दिव्यांजना दृष्टा, समरेण नृपानुगा ॥ ११७ ॥
भग्नव्याजादपसृत्य, जह्रे तेन रणादियम् ॥ नृपो जिताहवंमन्यः, स्वावासं मुदितो ययौ ११८
प्रियामलभमानोऽसौ, ज्ञात्वा तद्धरणं रिपोः ॥ मूर्च्छितः पतितः पृथ्व्यां, भृत्यैश्चक्रे सचेतनः ११९
अलं विषण्णचित्तोऽसौ, निशीथसमये नृपः ॥ अंजनाद्रिगिरेः शृंगे देवोद्योतमलोकत ॥ १२० ॥
किमेतदिति साश्चर्यो, गतस्तत्र नरेश्वरः ॥ ददर्श नखर्माणं, मुनिमुत्पन्नकेवलम् ॥ १२१ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





पृथुप्रमोदपूरेण, पूरितःपृथिवीपतिः ॥ प्रणम्य पितरं पुण्योपदेशं परमं पपौ ॥ १२२ ॥
समरोऽपि समायातस्तत्र हर्षं दधत्परम् ॥ मुनिं प्रणम्य शुश्राव, देशनां क्लेशनाशिनीम् ॥१२३॥
याद्रव्येभवतिमतिर्ह्यथवारमणीषुरूपयुक्तासु॥सायदिजिनवरधर्मेकरतलमध्यस्थितासिद्धिः ॥
पुरः पूत्क्रियते कस्य, सदा कारा वधूरियम् ॥ वदंतोऽपीति तत्संगमीहंते हंत बालिशाः॥१२५॥
परनार्यः परीहार्या, विशेषेण विचक्षणैः॥ विवेकस्य विनाशाय, विषवल्लीसमा हि याः ॥१२६॥
समरोऽथाप्तवैराग्यः, क्षमयित्वा नरेश्वरम्॥ समर्प्य तत्प्रियां तस्य, साधोः पार्श्वेऽग्रहीद्व्रतम् १२७
स्वपुरागमने तातं, निमंत्र्य नृपतिस्ततः॥ चलितः पंचगव्यूत्यां, हस्तिनापुरतः स्थितः॥१२८॥
तत्रामात्येन स प्रोचे, महाँल्लाभोऽत्र वर्त्तते॥ इदं हि देवरमणोद्यानं देववनोपमम् ॥१२९॥
दैवतस्य प्रभावेण, नोलूका न च वायसाः॥ न करोति तरोर्भंगमपि कश्चन कानने ॥१३०॥
अत्र कारयितुः पुण्यमिवास्ति जिनमंदिरम्॥ दुरंतं दुरितं येन दर्शनादपि दूरितम् ॥१३१॥
तत्र नत्वा प्रभुं पार्श्वं, महालाभो हि गृह्यते॥ श्रुत्वेति मुदितो भूपस्तत्क्षणे चलितस्ततः॥१३२॥
चलद्ध्वजपटं स्वर्णदंडं कलशबंधुरम् ॥ ऊत्तुंगतोरणं सारस्तंभमंडपमंडितम् ॥ १३३ ॥

॥११॥

For Private and Personal Use Only

प्रासादं वीक्ष्य नृपतिः, पादचारेण स व्रजन्॥ जगाम सपरिवारो, द्वारदेशमुदारधीः ॥१३४॥
तत्रावलोक्य श्रीपार्श्वनाथस्य प्रतिमामसौ॥ क्षणं स्तब्ध इव स्थित्वा, निविष्टः पृथिवीतले१३५
जने परस्परं वीक्ष्यमाणे भूपो विमूर्छितः ॥ पपात पृथिवीपीठे, निमीलितविलोचनः १३६
प्रधाविरे प्रधानाद्या, वारिवारीतिभाषिणः॥ वीजितो व्यजनैःसिक्तोऽभोभिः सोऽभूत्सचतेनः॥
उत्थाय तत्क्षणं मध्ये, प्रविश्यादरतो नृपः॥ चैत्ये प्रदक्षिणां दत्वा, जिनं नत्वा स्तुतिं व्यधात्॥

( स्रग्धरावृत्तम् )

श्रेयःसंकेतशाला सुगुणपरिमलैर्जैयमंदारमाला,
च्छिन्नव्यामोहजाला प्रमदभरसरःपूरणे मेघमाला ॥
नम्रश्रीमन्मराला वितरणकलया निर्जितस्वर्गिसाला,
त्वन्मूर्त्तिः श्रीविशाला विदलतु दुरितं नंदितक्षोणिपाला ॥ १३९ ॥
प्रेंखत्कर्पूरपूरस्फुरदमलयशःशालिनस्ते, समस्ते,
विश्वे विश्वेश शश्वत् कलयति कमला क्रीडितं तद्गृहेषु ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तेषां न क्लेशलेशः क्वचिदपि विपदुच्छेदमेदस्विधामा,
त्वं येषां भक्तिभाजां निवससि हृदये श्रीप्रभोपार्श्वनाथ ॥ १४० ॥

( अनुष्टुपवृत्तम् )

स्तुत्वेति श्रीमदर्हंतं, धोतिंपोतिं विधाय सः ॥
समं परिजनैरासीद्विधिपूजाचिकीर्मुदा ॥ १४१ ॥
स्वर्णकुंभादिसामग्रीं, कारयित्वा नरेश्वरः ॥
काव्यान्येतानि पूजाया, बभाण मधुरस्वरम् ॥ १४२ ॥

( उपजातिवृत्तम् )

शचीपतिः सप्तदशप्रकारैर्भृत्यामरैः संघटितोपहारैः ॥
स्वर्गांगनासु क्रमगायिनीषु, पूजां प्रभोः पार्श्वजिनस्य चक्रे ॥ १४३ ॥
पुरंदरः पूरितहेमकुंभैरदंभमंभोभिरलं सुगंधैः ॥
साकं सुरौघैः स्नपनेन सम्यक्, पूजां जिनेंदोः प्रथमां चकार ॥ १४४ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अंगं प्रमृज्यांगसुगंधगंधकाषायिकेणैष पटेन चंद्रः ॥
विलेपनैश्चंदनकेशरादेः पूजां जिनेंदोरकरोद् द्वितीयाम् ॥ १४५ ॥
च्यूतं शशांकस्य मरीचिभिः किं, दिव्यांशुकद्वंद्वमतीव चारु ॥
युक्त्या निवेश्योभयपार्श्वमिंद्रः, पूजां जिनेंदोरकरोत्तृतीयाम् ॥ १४६ ॥
कर्पूरसौरभ्यविलासिवासैः, श्रीखंडवासैः किल वासवोऽथ ॥
विभासुरश्रीजिनभास्करेंदोः, पूजां जिनेंदोरकरोच्चतुर्थीम् ॥ १४७ ॥
मंदारकल्पद्रुमपारिजातजातैरलिव्रातकृतानुयातैः ॥
पुष्पैः प्रभोरग्रथितैर्नवांगपूजां प्रतेने किल पंचमीं सः ॥ १४८ ॥
तैरेव पुष्पैर्विरचय्य मालाः, सौरभ्यलोभभ्रमिभृंगमालाः ॥
आरोपयन्नाकपतिर्जिनांगे, पूजां पष्ठिं कुरुतेस्म षष्ठीं ॥ १४९ ॥
मंदाकिनींदीवरपीवरश्रीरक्तोत्पलैश्चंपकपाटलाद्यैः ॥
कुर्वन्विभोर्वर्णकवर्ण्यशोभां, पूजां प्रतेने किल सप्तमीं सः ॥ १५० ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दंभोलिपाणिः परिमृज्य सद्यः, कर्पूरफालीर्बहुभक्तिशाली ॥
चूर्णं मुखे न्यस्य जिनस्य तूर्णं, चक्रेऽष्टमं पूजनमिष्टहेतुम् ॥ १५१ ॥
पुलोमजामौलिनिवेशनेन, प्रदक्षिणीकृत्य जिनालयं तम् ॥
महाध्वजं कीर्तिमिव प्रतत्य, पूजामकार्षीन्नवमीं बिडौजाः ॥ १५२ ॥
मुक्तावलीकुंडलबाहुरक्षकोटीरमुख्याभरणावलीनाम् ॥
प्रभोर्यथास्थाननिवेशनेन, पूजामकार्षीद्दशमीं बिडौजाः ॥ १५३ ॥
पुष्पावलीभिः परितो वितत्य, पुरंदरः पुष्पगृहं मनोज्ञम् ॥
पुष्पायुधाजेय जयेति जल्पन्नेकादशीमातनुतेस्म पूजाम् ॥ १५४ ॥
कराग्रमुक्तैः किल पंचवर्णैरग्रंथपुष्पैः प्रकरं पुरोऽस्य ॥
प्रपंचयन् वंचितकामशक्तेः, स द्वादशीमातनुतेस्म पूजाम् ॥ १५५ ॥
आदर्शभद्रासनवर्द्धमानमुख्याष्टसन्मांगलिकैर्जिनाग्रे ॥
स राजतप्रोज्वलतंडुलोत्थैस्त्रयोदशीमातनुतेस्म पूजाम् ॥ १५६ ॥



For Private and Personal Use Only

कर्पूरकालागुरुगंधधूपमुत्क्षिप्य धूमच्छददूरितैनाः ॥
घंटानिनादेन समं सुरेंद्रः, चतुर्दशीमातनुतेस्म पूजाम् ॥ १५७ ॥
अष्टोत्तरस्तोत्रशतं पठित्वा, जानुस्थितः स्पृष्टधरः सुरेशः ॥
शक्रस्तवं प्रोच्य शिरस्थपाणिर्नत्वा जिनं संसदमालुलोके ॥ १५८ ॥
आलोकनाकूतविदौ ततोऽस्य, गंधर्वनाट्याधिपती अमर्त्यौ ॥
तूर्यत्रिकं सज्जयतःस्म तत्र, प्रभोर्निषण्णे पुरतः सुरेंद्रे ॥ १५९ ॥
मृदंगभेरीवरवेणुवीणाषड्भ्रामरीझल्लरिकिंकिणीनाम् ॥
भंभादिकानां च तदा निनादैः, क्षणं जगच्छब्दमयं बभूव ॥ १६० ॥
मुदा ततस्तुंबुरुनारदाद्याः, प्रभोर्गुणालीरुपवीणयंतः ॥
सुधाशनादप्यधिकं वितेरुः, सुधाशनानां हृदये प्रमोदम् ॥ १६१ ॥
ततश्चलत्कुंडलतारहारशृंगारभारस्फुरदंगयष्टिः ॥
रंभा चिरं भावयतिस्म लास्यलीलां विनीलांगजिनाब्दविद्युत् ॥ १६२ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



साचीकृताक्षीव ततो घृताची तिलोत्तमा चोत्तमनाट्यशक्तिः ॥
मेने मनोज्ञा किल मेनकापि, कलाकलापस्य फलेग्रहित्वम् ॥ १६३ ॥

( शार्दूलविक्रीडितवृत्तम् )

इत्येवंविधगीतवाद्यनटनैःपूजांविधायत्रिधा, तांमूलाद्रिरचय्यसप्तदशधाप्रीतस्तदाखंडलः ॥
अर्चेयं धनदत्त उज्वलसरित्री रैःपटी रैःपटुः, कर्पूरैस्तुचमेरुनंदनवनीकल्पद्रुपुष्पैश्चिरम् १६४
एतत्काव्यानुसारेण, नृपश्चक्रे जिनार्चनम् ॥ तथा परिजनः सर्वो, यथा राजा तथा प्रजाः॥
मंत्री प्राह नृपं रंगान्निविष्टं रंगमंडपे ॥ अकस्मान्नाथ ते मूर्च्छा, चेतना चाभवत्कथम्१६६
कुतश्चैतानि काव्यानि, कुतो रीतिरियं मता ॥ सर्वमेतत्प्रभो ब्रूहि, कौतुकं मम वर्त्तते ॥
भूपः प्रोचेऽर्हति दृष्टे, जातिस्मृतिरभून्मम ॥ सर्वः पूर्वभवो दृष्टः स्पष्ट एष निशम्यताम् १६८
अत्रैवासीद्गजपुरे, पुरा श्रेष्ठी धनावहः ॥ धनदत्ताभिधस्तस्य, सुतस्तारुण्यमाश्रितः ॥१६९॥
वधूश्चतस्रस्तस्यासन्, रूपलावण्यसंयुताः॥तुर्या तु चारुचातुर्या, रत्नमालाभिधाभवत्॥१७०॥
अन्यदा निशि निद्राणा, शिवायाःफेत्कृतानि सा॥ श्रुत्वा जातिस्मृतेःप्रातःश्वश्रूंसविनयं जगौ॥

For Private and Personal Use Only

प्रत्यासन्ने गिरौपूर्वभवस्य भगिनी मम ॥ शिवास्ति सुषुवे पुत्रद्वयमद्य तथा निशि ॥१७३॥
यामि वर्द्धयितुंतस्याः, पुत्रौ लाभोऽस्तिमेऽपि हि ॥ श्रुत्वेत्यचिंतयच्छ्वश्रूरियं नैव मृषाऽवदत्
सा तयानुमताचालीत्, स्फारशृंगारशालिनी॥करस्थसाक्षतस्थाला, बालागिरिगुहांययौ ॥१७४॥
आयांतीं तां शिवा प्रेक्ष्य, जातजातिस्मृतिःक्षणात् ॥ दैवतस्य प्रभावेण, मनुष्यवचसा जगौ॥
आगच्छागच्छ भगिनि,प्रीतास्मि तव दर्शनात् ॥ सा तां शिवांतथापुत्रौ,भव्ययुक्त्या ह्यवीवृधत्॥
शिवयापि समादाय, स्थालं गत्वा गुहांतरम् ॥ रत्नैःप्रपूर्य दत्त्वा च, सा विसृष्टा गृहं ययौ १७७
श्वश्रूहस्ते तया दत्ते, रत्नस्थाले मुदा च सा ॥ तस्याःश्वशुरमाकार्य, वधूवृत्तमचीकथत् ॥१७८॥
श्रेष्ठी रत्नेषु दृष्टेषु, प्रीतः प्रोचे प्रियां प्रति ॥ नीचकर्म न कार्याऽसौ, मूर्त्तालक्ष्मीरियं वधूः ॥
ततोविशेषतो मान्या, साभूत् परिजनेऽखिले ॥ ईर्ष्यां किंतु करोतिस्म, तस्यां ज्येष्ठवधूस्ततः॥
पुत्रद्वये मृते तस्याः शिवाया दैवयोगतः ॥ कृत्वा मूर्खा तदाऽऽक्रंदं, दध्यौ ज्येष्ठा वधूरिति॥
रत्नमाला गता पूर्वं, यथा रत्नानि चानयत् ॥ तथाहमपिगत्वा तान्यानेष्याम्यत्रवारके १८२
श्वश्रूं पृष्ट्वा गतां तत्र, सशृंगारां सकुंकुमां ॥ तां करस्थाक्षतस्थालां, शिवा वीक्ष्य व्यचिंतयत्॥



For Private and Personal Use Only

वैरिण्यभ्येति काप्येषा, मद्दुःखसमये यदि ॥ तदाशिक्षांप्रदास्यामि, ध्यात्वैवंसाप्रधाविता ॥
गुण० विदार्य नखैरंगं, दुकूलेन समं शिवा ॥ तत्कर्णौ त्रोटयामास, समं हारेण रोषिता ॥१८५॥ चरित्र.
॥१९॥ कष्टान्नंष्ट्वा गृहं सागाद्रत्नमाला पृथग्गृहे ॥ श्वश्रूं जगौ भगिन्या मे, विपन्नं तत्सुतद्वयम् ॥
यामि युष्मदनुज्ञाता, तत्पुत्रमुखदर्शने ॥ तयोक्ते सा ययौ तत्र, शोच्यवेषधरा गिरौ १८७
दुःखेन विलपंतीं तां, दैवोपालंभदायिनीम् ॥ कथंचित् स्थापयित्वा सा, शिवोचे मद्वचःशृणु॥
नास्ति मेऽत्रगिरौ सौख्यं, यास्याम्यन्यत्रकुत्रचित ॥ द्वादशे दिवसे प्रेतकार्यं कार्यचपुत्रयोः॥
तस्मिन् दिने त्वयागम्यं, सहानेयस्तुवल्लभः॥इत्युक्त्वा शिवया स्वैरं, विसृष्टा सा गृहं ययौ ॥
दिने तु द्वादशे प्राप्ते, सा स्वकांतेन संयुता॥आरुह्य वाहिनीं तत्रागमत् प्रीता च सा शिवा ॥
प्रेतकार्ये कृते सावङ्, निधिरत्रास्ति गृह्यताम्॥उदपाटि च ताभ्यां स, वाहिन्यांच निवेशितः
कथं मनुष्यभाषास्या, इति चिंतयतोस्तयोः ॥ बभासे व्यंतरःकश्चिददृश्योव्योमनिस्थितः १९३
अत्रैव नगरे देवदत्ताख्यकृपणोऽभवम् ॥ निःक्षिप्तोनिधिरत्रासीज्जातोऽहंव्यंतरस्ततः ॥१९४॥ ॥१९॥
अक्षयोनिधिरस्त्येष, व्ययःकार्यःसदा त्वया ॥ श्रीजैनमंदिरं कार्यं,स्थाप्यःपार्श्वप्रभुःपुनः ॥

तस्याधिष्ठायकोभावी, सोऽर्हंतद्भक्तितत्परः॥ तस्मिन् तीर्थममाप्यस्ति, मोक्षस्तेनेति कथ्यते
इत्युक्त्वा व्यंतरे मौनभाजि तौदंपती मुदा ॥ स्वीयंसद्म समायातौ, सर्वं हृष्टं कुटुंबकम् १९७
तत्पिता समये तस्मिन्, भारमारोप्य भावतः ॥ दीक्षां गृहीत्वा माहेंद्रदेवलोकेसुरोऽभवत्॥
अकारयद्धनोऽन्येद्युःप्रासादमिह कानने ॥ स्थापितः पार्श्वदेवधिश्चाधाता व्यंतरोऽभवत् १९९
प्रकारैः सप्तदशभिः, स श्रेष्ठी श्रेष्ठभक्तिभाक् ॥ श्रीपार्श्वं पूजयामास, प्रासादे तत्र सर्वदा २००
धनदत्तस्य कांतानां, तिसृणां च पृथक् पृथक् ॥ चत्वारो नंदना जाताश्चतुर्थ्यां पंच जज्ञिरे २०१
दत्तश्चवसुदत्तश्च, सुदत्ताश्चित्तनंदनः ॥ लक्ष्मीधरो धनेशश्च, धननाथो धनेश्वरः ॥ २०२ ॥
कनकः कनकाभश्च, हेमांभो हेमवर्णकः ॥ श्रीदश्रीदत्तशंखाश्च, धर्मोधीराभिधस्तथा ॥
एवं सप्तदशाभूवंस्तनयास्तस्य विश्रुताः ॥ समये सप्रियःसोऽथ, प्रपेदे संयमश्रियम् ॥२०४॥
प्रपाल्य निरतिचारं, चारु चारित्रमुज्ज्वलम् ॥ सप्रियोऽनशनात्प्रांते, सौधर्मे स सुरोऽभवत् ॥
पल्यंकादुत्थितःसुप्तस्तरुणेन नरेण सः ॥ स्नात्वा विहितशृंगारव्यवसायः सभां ययौ २०६
पुस्तकं वाचयित्वा स, सिद्धायतनसंस्थितान् ॥ पूजयित्वार्हतो भक्त्या, सुधर्मासंसदि स्थितः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



काले सुघोषाघंटाया, नादोऽभूदमरालये ॥ उद्घोषणातथाकारि, नाकिना नैगमेषिणा २०८
बभूव भरतेक्षेत्रे, श्रीनमेरर्हतो जनिः ॥ इंद्रो यास्यति हेमाद्रौ, स्नात्रं कर्तुं जिनेशितुः२०९
आगंतव्यंसुरैस्तत्र, श्रुत्वेयुद्घोषणामसौ ॥ सुरैःसाकंसुरंद्रेण, स्वर्णशैलगिरिं ययौ ॥२१०॥
सर्वैःसुरेंद्रैस्तत्रार्हजन्मस्नात्रमहोत्सवे ॥ कृते सौधर्महरिणा, जिनोंबायै समर्पितः ॥२११॥
कृत्वा नंदीश्वरेयात्रां, व्यावृत्तःसुरनायकः ॥ मार्गे व्रजन्निहायातः, प्रासादोपरि संस्थितः २१२
स्वकारितमिदं दृष्ट्वा, धनदत्तामरस्तदा ॥ विशेषतः प्रभुं पार्श्वदेवं प्रणमतिस्म सः ॥२१३॥
साकं सुरैःसुरेंद्रोऽपि, विदधेऽत्रजिनार्चनम् ॥ काव्यान्येतानि पूजाया, धनदत्तामरोऽपठत्॥
एकविंशतिकाव्यानि, सार्द्धानि हरिनामतः ॥ काव्यार्द्धं च तदाकार्षीत्, स्वपूजाख्यापकं सुरः॥
ततःस्वर्गं गतेस्वर्गिलोके सोऽप्यमरश्चिरम् ॥ सुखं भुक्त्वा दिवश्च्युत्वा, मंत्रिन्नहमिहाभवम् ॥
अप्रणम्य प्रभुं पार्श्वं, भोजनं न करिष्यते ॥ स्थाप्यतां तदिहादूरे, नवीनं हस्तिनापुरम्॥२१७॥
श्रुत्वेति सकले लोके, परमानंदमेदुरे ॥ गुणवर्मा नृपस्तस्थौ, नवीने हस्तिनापुरे ॥२१८॥
सोऽन्यदा निशिनिद्राणः, कस्याश्चित्करुणस्वरम् ॥ श्रुत्वा गच्छन् पुरोऽद्राक्षीद्रुदतींसुदतीं वने॥

For Private and Personal Use Only

कथमेकाकिनी बाले,का त्वं सुंदरि रोदिषि॥ श्रुत्वेति रुदितं मुक्त्वा, मुदितं सा मनो दधौ२२०
अभ्युत्थाय सलज्जा सा, बभाषे नृपतिं प्रति॥ खेटचैत्ये त्वया दृष्टा, रत्नमालाभिधास्म्यहम्॥
सा गता स्वपितुः, सिंहभूपतेः सिंहलेशितुः॥ सदने स्वानुरागं च, सखीभिस्तमजिज्ञपम्२२२
अमन्यमाने जनके, मद्वाक्यमतिदुःखिता ॥ सुप्ता पल्यंकतः केनाप्यानीतास्म्यत्र कानने२२३
प्रियस्य दर्शनेनाद्य, सर्वं भव्यमजायत॥ श्रुत्वेति मुदितो भूपस्तां गृहीत्वा गृहं ययौ २२४
कथं विवाह्या कन्येयमदत्ता जनकादिभिः॥ इति चिंतयति क्ष्मापे, प्रतिहारो व्यजिज्ञपत् २२५
मंत्री सिंहलराजस्य, द्वारे तिष्ठति वारितः॥ भूपेनोक्तेन तेनाशु, स आनीतःसभांतरे २२६
स्फुरद्रत्नमयं मुक्त्वा, प्राभृतं नृपतेःपुरः॥ मंत्री संमानितोऽत्यंतं, निविष्टो योग्यविष्टरे ॥२२७॥
कथं यूयं समायाताः, सिंहलद्वीपवासिनः॥ इति पृच्छति भूपाले, स जगौ शृणु कौतुकम्२२८
अस्माकं स्वामिनःपुत्री, रत्नमालाभिधानतः॥ सा केनापि हृता तेन,नृपतिर्दुःखितोऽभवत् ॥
स्वप्ने केनाप्यथादिष्टस्त्वत्पुत्री हस्तिनापुरे॥ मुक्तास्ति मंत्रिणं प्रेष्य, विवाह्या गुणवर्मणा२३०
ततः कस्यापि सांनिध्याद्वयमत्र समागताः॥ इदं स्वीक्रियतां सर्वं, स्वामिनःसुतया सह ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथा कृत्वा नृपेणाथ, विसृष्टो मंत्रिपुंगवः ॥ गत्वा सिंहलराजस्य, प्रीतिपूरमवर्द्धयत् २३२
गुणवर्मा चरेणोचे, कोऽप्येति परराष्ट्रिकः ॥ मुखं पश्यति भूपाले, मंत्री ज्ञात्वा व्यजिज्ञपत्॥
अस्ति रत्नपुरे नाम्नि पुरे रत्नांगदो नृपः ॥ सुता कनकमालास्य, चिरात्त्वय्यनुरागिणी २३४
तां समादाय यात्रार्थं, समेति स महीपतिः ॥ श्रुत्वेति गुणवर्मापि, भूपस्तत्संमुखं ययौ ॥
मिलितौ भूपती तत्राभूतां प्रीतिकरौ जने ॥ महायात्रा कृता रत्नांगदेनाथ जगत्प्रभोः २३६
पुण्यकार्यमसौ कृत्वा, गुणवर्माणमालपत् ॥ मत्सुतामुपयच्छस्व यच्छस्व मनसि स्थितम् ॥
तथैव कृत्वा तेनाथ, विसृष्टो बहुमानतः ॥ ययौ रत्नांगदो राजा, निजं रत्नपुरं पुरम् ॥२३८

एवं चतुर्भिरमलैः सहितो ह्युदारै-र्दारैः सुवर्णकलितैर्गुणवर्मभूपः ॥
तुल्यैः श्रितस्य लघुभिर्गिरिभिः सुमेरो-र्माणिक्यसुंदररुचेः श्रियमाबभार ॥२३९॥

इति श्री अंचलगच्छेश श्री माणिक्यसुंदरसूरिविरचिते पूजाधिकारे गुणवर्माचरित्रे
प्रियाचतुष्टयप्राप्ति वर्णनो नाम प्रथमः सर्गः



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ॥ सर्ग २ जो ॥

तासु कांतासु कांतासु, रममाणस्य भूपतेः ॥ अथ सप्तदशाभूवन्नंदनाः कृतनंदनाः ॥१॥
आद्यः प्रथमराजाख्यस्ततः सिंहो हरिर्गजः ॥ पद्मच्छायाकरः शंखोऽनंतो नागदशाह्वयः॥२॥
अचलो बहुबुद्धिश्च, तारुणस्तु त्रयोदशः ॥ चतुर्दशश्चक्रपाणिः, पूर्णः पंचदशस्तथा ॥३॥
सोमःसागर इत्येवं, सुता सप्तदश स्मृताः ॥ प्रमोदभेदा इव ते, व्यराजंत नृपालये ॥४॥
जाते देवांगणे राजपुत्राः सप्तदशापिते ॥ अप्रणम्य प्रभुं पार्श्वं, स्तन्यपानं न चक्रिरे ॥५॥
तज्ज्ञात्वा कौतुकं बिभ्रत्यन्वहं सकले जने ॥ केवली नरवर्मागात्, संदेहतिमिरार्यमा॥६॥
सांतःपुरपरीवारो, मुनिं नंतुं नृपो ययौ ॥ ददर्श स्वर्णपद्मस्थं, तं सुरासुरसेवितम् ॥७॥
स तं प्रदक्षिणीकृत्य,प्रणम्य परमादरात्॥ तद्वक्त्रन्यस्तनेत्राब्जो,निविष्टः शुद्धभूतले॥८॥
बालयोग्यानलंकारान्, बिभ्राणा रूपशालिनः ॥ पुत्राः सभासरस्यांते, राजहंसा इवाययुः॥
देशनां क्लेशनाशाय, मुनिश्चक्रे सुधोपमाम्॥ अस्मिन्नसारे संसारे, सारोधर्मो विधीयताम् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धर्मेण विपुला भोगा, धर्मेण सुरसंपदः ॥ धर्मेण पुत्रमित्राणि, सर्वसौख्यानि धर्मतः ॥११॥
व्रतानि धर्मरूपाणि, पंच वा द्वादशाथवा ॥ दानं शीलं तपो भावो, धर्मभेदा अनेकशः ॥१२॥
आद्यं पुण्यं च तत्रापि, श्लाध्यते जिनपूजनम् ॥ यद्विना न हि सम्यक्त्वमपि पंफुल्यते नृणाम्
विधिनैव विधातव्यं, तत्रापि जिनपूजनम् ॥ गुणाय जायते युक्त्या, कृतं भेषजमप्यहो १४
विधाय पूजां जैनीं ये, भोजनं कुर्वतेऽन्वहम् ॥ भोजनं कथ्यते तेषामाहारः शेषजंतुषु १५
अत्रांतरे मुनिःकश्चिद्विपश्चित् पृच्छतिस्म तम् ॥ जिनपूजां विनाप्येते, साधवःसाधवःकथम्१६
मुनिः प्रोवाच पूजाया, भेदद्वयमुदाहृतम् ॥ एका हि द्रव्यतःपूजा, द्वितीया भावतः पुनः ॥
द्रव्यपूजां प्रकुर्वंति, विरताविरता जनाः ॥ सर्वसावद्यविरता, भावपूजां तु साधवः ॥ १८ ॥
भावपूजा निरारंभा, सारंभं द्रव्यपूजनम् ॥ ज्ञातव्यो कूपदृष्टातो, जिनानां द्रव्यपूजने ॥१९॥
अथ प्रस्तुतमाचख्यौ, मुनिः शृणुत भोजनाः ॥ भोजनावसरे नूनं, जिनः पूज्यो निरंतरम् ॥
मुख्यरीतिरियं ज्ञेया, त्रिसध्यं यज्जिनार्चनम् ॥ अभावे जिनपूजाया, नूनं, कार्या नमस्कृतिः ॥
अत्रांतरे नृपोऽवादीदंतर्वक्तुं न युज्यते ॥ तथापि क्रियते पृच्छा, हृदि माति न कौतुकम्२२

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुताः सप्तदशाप्येते, जिनं यावन्नमंति न ॥ स्तन्यपानमपि प्रायस्तावत् कुर्वंति न ध्रुवम् ॥
मुनिः प्रोचे महाराज, श्रूयतां पूर्वजन्मजम् ॥ एतेषां सफलं वृत्तं, कथ्यते भवतां पुरः ॥२४॥
अत्रैव हस्तिनापुरे, धनदत्तोऽभवद्धनी ॥ प्रासादः कारितो येन, जनानां नेत्रगोचरः॥२५॥
सुताः सप्तदशाभूवंस्तस्य भार्याचतुष्टयात् ॥ एतद्विज्ञातपूर्वं ते, जातिस्मरणयोगतः ॥२६॥
ओमित्युक्ते नृपेणैष,मुनिः प्रोचे ततः शृणु ॥ प्रमादमदिरामत्ता, जातास्ते तस्य नंदनाः॥
यत्र तत्र भ्रमंतस्ते, लोलया वक्रचंक्रमाः ॥ अन्येद्युर्देवरमणे प्रयाताः क्रीडितुं वने ॥२८॥
गीतं नृत्यं स्मितं वाप्यां,स्नानमांदोलनं द्रुषु ॥ कुर्वाणाः स्वेच्छया तत्र, प्रदेशे दद्दशुर्मुनिम् ॥
पारयित्वा मुनिः कायोत्सर्गं लाभं विदन् जगौ ॥ आगम्यतां महाभागा, हितं किंचिन्निगद्यते
परस्परं स्मयमाना, लीलया वक्रवीक्षिकाः ॥ नमयित्वा शिरः किंचिन्निविष्टास्ते मुनेःपुरः ॥
मुनिःप्रोचे महाभाग्या, यूयं शास्त्रविशारदाः ॥ ततो विचक्षणैः सार्कं, गोष्ठी पुण्येन लभ्यते३२
एते वस्त्राद्यलंकारा लीलामात्राद् भवेत् कुतः ॥ ते प्राहुरर्थतःसर्वा नराणां स्युः समर्थता ॥३३॥ ॥२६॥
अर्थेन प्राप्यते कीर्तिः, स्यादर्थाद्राज्यमान्यता ॥ मुनिर्जगौ पुनः कस्मादर्थ एव प्रजायते ३४

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



व्यवसायादिति प्रोक्ते, तैः पुनर्मुनिरालपत्॥ सर्वेषांकिं धनं न स्याद्व्यवसायं प्रकुर्वताम् ३५
ततस्तेष्वात्तमौनेषु, मुनिः प्रोचे विचक्षणः॥ पुण्येन प्राप्यते ह्यर्थस्तस्मात्पुण्यं विधीयते ३६

पुण्यादेव समीहितार्थघटना नो पौरुषात्प्राणिनां,
यद्भानोर्भ्रमतोऽपि नांबरपथे स्यादष्टमः सैंधवः ॥
स्वस्थानात्पदमात्रमप्यचलतो विंध्यस्य चानेकशो,
जायंते मदपालिपालितयशःश्रीलंभिनःकुंभिनः ॥ ३७ ॥

कुलं वो विमलं लोके, सकला विकलाःकलाः॥ प्रासाद इव निःकेतुर्विना पुण्यं न राजते ३८
दानं शीलं तपो भावः,सम्यक्त्वं जिनपूजनम्॥ ध्यानं सामायिकंत्रापि, किंचित्पुण्यंविधीयते
ते प्रोचुस्तद्विचारे च, साधुनोक्ते सुविस्तरे॥ सुखसाध्यां विधास्यामः पूजामेकां वयं मुने ॥
अथ केन प्रकारेण, क्रियते जिनपूजनम्॥ इति पृष्टो मुनिश्रेष्ठःस्पष्टमेवमभाषत ॥ ४१ ॥
स्नात्रं विलेपनं वस्त्रयुगलारोपणं तथा ॥ वासपुष्पमाल्यवर्णचूर्णानामधिरोपणम् ॥ ४२ ॥
महाध्वजविभूषाणां रोपणं पुष्पवेश्म च ॥ पुष्पाणां प्रकरश्चाग्रे, पुरतो मंगलाष्टकम् ॥ ४३ ॥



For Private and Personal Use Only

धूपस्योत्क्षेपणं गीतं, नृत्यं वाद्यं मनोहरम् ॥ एते सप्तदश प्रोक्ताः, प्रकारा जिनपूजने ॥४४॥
तेऽन्योऽन्यं कथयामासुः, श्रुत्वेति वचनं मुनेः ॥ एतेषु भेदमेकैकं, विधास्यामः क्षणादपि ४५
अभ्युद्यतास्ततः सर्वे, प्रासादेऽत्र मनोहरे ॥ सामग्रीं कारयामासुः, पूजायास्ते निजां निजाम्
कृत्वा पार्श्वप्रभोः पूजां, मुदिता मुनिपुंगवम् ॥ नत्वा निजगृहं प्राप्ता, भोजनं चक्रिरे च ते ॥
हट्टे निविष्टास्ते दृष्टा, मित्रेणैकेन भाषिताः ॥ वार्त्तामेकामहं वच्मि, मन्यध्वे चेन्मनोहराम् ॥
मयि हट्टे समासीने, गीतनृत्यकुतूहलम् ॥ कारयत्यूचिरे केचिद्धन्योऽयं धनलीलया ॥४९॥
मंदस्वरं परः प्रोचे, स्वमित्रं मयि शृण्वति ॥ वृथास्य वर्ण्यते लीला, व्ययतः पैतृकं धनम् ॥५०॥
मातुः स्तन्यं पितुर्लक्ष्मीर्युज्यते बाल्य एव हि ॥ इति तद्वाक्यमाकर्ण्य, युष्मदंतिकमागतः ५१
तल्लक्ष्म्यै गम्यते क्वापि, व्यवसायविचक्षणाः ॥ एकः प्रोचे ततो वार्द्धौ, पद्भ्यां पित्रापि गम्यते ॥
इक्षुक्षेत्रं समुद्रश्च, योनिपोषणमेव च ॥ प्रसादो भूभृतां चैव, क्षणाद् घ्नंति दरिद्रताम् ॥५३॥
परोऽवगम्यतां तर्हि, सिंहलद्वीप एव हि ॥ गजानां व्यवसायेन, महांल्लाभो यतो भवेत् ॥५४॥
तथैव सर्वेऽप्यालोच्य, समुद्रगमनं प्रति ॥ पित्राद्यनुमतिं कष्टाज्जगृहुर्गृहमागताः ॥५५॥



For Private and Personal Use Only

बोहित्थं सज्जयित्वाशु, क्रयाणकशतैरमी ॥ आपूर्य सुदिने चेलुः, स्वजनानुगताःपुरात् ५६
विसृज्य स्वजनांस्तीरादारुह्य वहनं मुदा ॥ ययुस्ते सिंहलद्वीपं, स्तोकैरेव दिनैस्ततः ॥५७॥
उत्तीर्णास्तेंऽबुधेस्तीरे, मध्येनगरमागताः ॥ विक्रीणानाः क्रयाणानि, व्यवसायं वितेनिरे ५८
दैवयोगात्तदा तत्र, राज्ञो रोगैर्मृता गजाः ॥ उत्तार्यो न गजो द्वीपादित्याज्ञा च प्रवर्त्तिता ५९
अलाभेन गजानां ते, स्थिताः षोडशवत्सरीम् ॥ ततोऽमी स्वयमुद्वाज्य, ययुर्द्वीपं कटाहकम् ॥
षोडशस्वर्णकोटीनां, लाभस्तेषामिहाभवत् ॥ ततः प्रमुदिताः सर्वे, प्रचेलुःस्वपुरं प्रति ॥ ६१ ॥
अंतरा दैवतो वाताःप्रतीपा जज्ञिरेंऽबुधौ ॥ ततःकंदुकवत्पोत, उत्क्षिप्तस्तुपुनःपुनः ॥६२॥
तदा जगर्ज पर्जन्यस्तेषां हृदयपाटकः ॥ दुःखिताश्चिंतयामासुस्ततः सप्तदशापि ते ॥६३॥
न लीलावत्तया पूर्वं, पुण्यं किंचिदुपार्जितम् ॥ ततश्च व्याकुलं जातं, व्यवसायेन मानसम् ६४
धनदत्तस्य तस्यापि, पुत्रैर्भूत्वा विवेकिनः ॥ अस्माभिर्न कृतं पुण्यं गतं जन्म निरर्थकम् ६५
तदा तस्य मुनेर्वाचा, विहितं जिनपूजनम् ॥ तदेतदवलंबोऽस्ति, तत्पादाःशरणं च नः ॥६६॥
इत्थं चिंतयतां तेषां, बोहित्थं ब्रुडतिस्म तत् ॥ अथ तेषां गतिं वक्ष्ये, श्रूयतां भोः पृथक् पृथक् ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



येन पूर्वं प्रभोः स्नात्रं, कृतं तस्य निगद्यते ॥ अत्रास्ति भरतक्षेत्रे, पुरं पद्मपुराभिधम्॥६८॥
आनंदस्तत्र भूपोऽभूदानंद इव मूर्तिमान् ॥ जयंतीनाम तत्पट्टदेवी देवीव रूपतः ॥६९॥
दत्ताख्यः श्रेष्ठीसूस्तस्या, उदरे समवातरत् ॥ स्वप्ने सरोवरं पूर्णं, तूर्गमालोकितं तया ७०
तदैव च तया पृष्टः, स्पष्टमाचष्ट भूपतिः ॥ सांप्रतं विद्यते देवि, लोके दुर्भिक्षसंकथा ॥७१॥
सांवत्सरैर्ममाप्यग्रे, प्रोक्तमस्तीति सर्वथा ॥ वृष्टिं न कर्त्ता पर्जन्यः कार्यो धान्यादिसंग्रहः ७२
स्वप्नेनानेन ते देवि, मेघो वृष्टिं करिष्यति ॥ अस्मदीयकुलोत्तंसः, पुत्रोऽप्यवतरिष्यति ॥
ततो हृष्टा ययौ देवी, स्वस्थानं समलंकृतम् ॥ तदैव जलदैश्चापि, गगनं समलंकृतम् ७४
झात्कारं विद्युतश्चक्रुर्घना गर्जितमूर्जितम् ॥ तत्र सर्वत्र देशेऽभून्महावृष्टिर्निरंतरा ॥७५॥
सरसीः सारसैः साराः, सरसा नीरसारसा ॥ वारिदा वारिदानाय, विदुराविबभुस्तदा ॥७६॥
हृदा तदा नृपो दध्यावहो स्वप्नस्य सत्यता ॥ भाग्यवत्ता च पुत्रस्यावतीर्णस्य प्रियोदरे ७७
अथ पूर्णेषु मासेषु, सा राज्ञी सुषुवे सुतम् ॥ सुंदरं शुभवेलायां, गुणलक्षणसंयुतम् ॥७८॥
नृपस्तस्योत्सवं कृत्वा, जनैःप्रमुदितैः समम् ॥ मेघनाद इति स्वप्नानुसारादभिधां दधौ ७९



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्रमेण वर्द्धमानोऽथ, स कलाधरवत्कलाः ॥ सकलाः कलयामास, किंतु कालुष्यवर्जितः ॥८०॥
तारं तारुण्यसंप्राप्तं, मानिनीनां मनोहरम् ॥ तं वीक्ष्य नृपतिर्दध्यौ, राज्यभारधुरंधरम् ॥८१॥
अदृष्टपलिताः सर्वे, पूर्वजा जगृहुर्व्रतम् ॥ ईदृशे सति पुत्रे मे, राज्यमेतन्न युज्यते ॥८२॥
इति ध्यात्वा नृपः प्रातस्तस्मै राज्यं प्रदाय सः ॥ दीक्षां गृहीत्वा तपसा, कर्म भित्त्वा शिवं ययौ॥
मेघनादमहीपाले, प्रजाः पालयति क्षितौ ॥ देशा न मुक्ता मेघेन, काले वृष्टिविधायिना॥
कराले ग्रीष्मकालेऽसौ, सिंहनामनरेश्वरम् ॥ देशक्लेशकरं श्रुत्वा, चचाल सह सेनया ८५
महाटव्यां गते सैन्ये, जलं प्राप न कश्चन ॥ नदी न निर्झरा नात्र, न कूपो न सरोवरम् ॥
शुष्ककंठास्तृषाक्रांताः, श्रांता भ्रांता वनेऽखिले ॥ रत्नत्वं कथयामासुर्जलस्यैव जनास्तदा॥
पृथिव्यां त्रीणि रत्नानि, जलमन्नं सुभाषितम् ॥ मूढैः पाषाणखंडेषु, रत्नसंज्ञाभिधीयते ८८
मेघनादस्तदा दध्यौ, मयि सत्यपि संप्रति ॥ मेघोऽपि न जलं दद्यात्, कथं नाम निरर्थकम्
इति चिंतयति क्ष्मापे, सैन्योपरि घनो घनः ॥ वृष्टिं चक्रे मुदा लोको, भूपमेव शशंस तम् ९० ॥३१॥
रिपुं जित्वा सुखेनैव, गत्वासौ नगरं निजम् ॥ पप्रच्छ ज्ञानिनं साधुचंद्रं तत्र समागतम्॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अटव्यां मम सैन्यस्योपरिष्टादेव वारिदः॥ वृष्टिं चकार को हेतुरत्र चित्रमिदं महत्॥९३॥
मुनिः प्रोचे भवान् पूर्वभवेऽत्र हस्तिनापुरे ॥ श्रेष्ठिनो धनदत्तस्य, दत्तनामा सुतोऽजनि॥
विहिता तेन सामग्री, जिनस्य स्नात्रहेतवे ॥ कालेऽबुधौ स मृत्वाभूस्त्वमानंदनृपांगजः ९४
अंतरेऽत्र नृपोऽवादीत्कुत्र तद्धस्तिनापुरम् ॥ यतः पयोनिधौ गत्वा, मृत्वा चाहमिहाभवम्॥
मुनिर्जगौ बहून्यत्र, नगराण्येकनामतः ॥ हस्तिनापुरमन्यत्तदन्यच्च कुरुमंडले ॥ ९६ ॥
उक्तं प्रस्तुतमित्युक्ते, नृपेण मुनिपुंगवः ॥ जगौ फलं जगन्नाथपूजायाः शृणु भूपते ॥९७॥
पूजाप्रभावतो राज्यं, स्वभावादपि जायते ॥ स्नात्रपूजाविशेषेण जलदस्ते वशंवदः ॥९८॥
तवावतारे दुर्भिक्षवार्त्तायामपि सर्वतः ॥ वृष्टिं चक्रे घनस्तस्मान्मेघनादाख्यया भवान् ९९
त्वयि पालयति क्षोणीं, दुर्भिक्षं न भवेत्क्वचित् ॥ अटव्यां तु तदा वृष्टिर्वितेने वनदैवतैः ॥
एकापि पूजा सफला, बह्वीनां किं निगद्यते ॥ विंशतिस्थानकैरर्हन्नेकेनापि च जायते १०१
सर्वत्र शस्यते भावः, पुण्यकर्मणि भूपते ॥ भावेनैव घृतेनेव भोज्यं तत्सफलं भवेत् १०२
मेघनाद इति श्रुत्वा, स्मृत्वा पूर्वभवं निजम् ॥ मुनिं नत्वा पुनः प्रोचे, विशेषाद्धर्ममादिश॥



For Private and Personal Use Only

ततः सम्यक्त्वमूलानि, व्रतानि द्वादशापि हि ॥ मुनिरारोपयामास, जग्राह च मुदा नृपः ॥
मुनिं नत्वा गृहं गत्वा, पालयित्वा चिरं भुवम् ॥ पद्मपुत्राय राज्यं च, दत्वासौ संयमं ललौ ॥
संयमात्प्राप्य सौधर्मे, सुखं भुक्त्वा ततश्च्युतः ॥ आद्यःप्रथमराजाख्यस्तवायं नंदनोऽभवत् ॥

॥ इति स्नात्रपूजायां दत्तकथा. ॥

कृतं विलेपनं येन, गतिस्तस्याथ कथ्यते ॥ अत्रास्ति भरतक्षेत्रे, पुरी चंपा गरीयसी ॥१०७॥
तत्र श्रीनंदनो राजा, सोमश्रीस्तस्य च प्रिया ॥ सोमःश्रेष्ठी च तस्यासीद्धर्मादत्रासितातिधीः
श्रीमतीकुक्षिसंभूतश्चंद्रस्तस्य सुतोऽभवत् ॥ निजान्वयनभोदेशे, नवीन इव चंद्रमाः ॥१०९॥
साहित्ये लक्षणे तर्के, षड्भाषास्वपि कौशलः ॥ चंद्रो बभूव निस्तंद्रमुपाध्यायप्रसादतः ११०
अहं स्वकीयद्रव्येणोपार्जितेन करग्रहम् ॥ कर्त्तास्मीति हृदि ध्यात्वा, सार्थं सज्जयतिस्म सः ॥
जनकस्यानुमत्या स, पुरीं चंद्रावतीं प्रति ॥ गच्छन्नविच्छिन्नगतिस्तां जगामाभिरामधीः ११२
गृहीत्वा भांडशालां स, व्यवसायविचक्षणः ॥ अकरोद्व्यवसायं च जिनधर्मपरायणः ॥११३॥
कदाचिद्ग्रीष्मकालेऽस्य, वने केनापि हेतुना ॥ गतस्य प्रकटा वातावली च विकटाभवत् ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धूलीभ्रमणमेवासीत्तया प्रसृतयाभितः ॥ तरोर्मूले स्थितस्यास्य संध्यायाः समयोऽभवत् ॥
तरोरुपरि संस्थायी, भूतो भूतं परं जगौ ॥ अस्माकमागतं नूनं, महदेकं कुतूहलम् ॥११६॥
चंद्रावत्यधिनाथस्य, चंद्रशेखरभूपतेः ॥ तृतीयदिवसे मृत्युर्घातकस्य प्रवेशतः ॥ ११७ ॥
मृते तस्मिन्नमात्याद्या, एतस्यांतःपुराणि च ॥ वन्हिना मृत्युमाप्स्यंति, महदेतत्कुतूहलम् ॥
श्रुत्वेति सहसोत्थाय, चंद्रो नगरमागतः ॥ आगत्य भांडशालायां, चिंतयामास चेतसि ॥
येन केनाप्युपायेन, रक्षा स्याद्यदि भूपतेः ॥ तथाभव्यमिति ध्यात्वा, व्यक्रीणात्सर्ववस्तु सः ॥
रत्नपंचकमादाय, राजयोग्यमसौ प्रगे ॥ प्राप्तःसभां नरेंद्रस्य, प्रतीहारनिवेदितः ॥ १२१ ॥
राज्ञासौ तेषु रत्नेषु दृष्टेषु बहुमानितः ॥ कस्त्वं कुतः समेतश्चेत्यूचे स प्राह भूपतिम् १२२
अहं चंपात आयात इहास्मि व्यवसायकृत् ॥ हितं च स्वामिनः किंचिद्वाच्यं नावसरः पुनः ॥
राज्ञोचे पश्चिमे यामे, त्वयागंतव्यमित्यसौ ॥ विसृष्टः स्वेप्सिते स्थाने, भुक्त्वा प्राप्तो नृपांतिकम् ॥
प्रोक्तायां भूपवार्त्तायां, जगौ तं प्रति भूपतिः ॥ शयनं न करिष्यामो, धर्मण्यपि गृहाद्बहिः १२५
तं विसृज्य स्वरक्षार्थं नृपस्तस्थौ सचेतनः ॥ तृतीयदिवसे रात्रौ, महान् कोलाहलोऽजनिः १२६



For Private and Personal Use Only

अमुं क्षुरिकया हत्वा, भृत्यं यात्येष धावतः ॥ सुभटा धाविता यावत्तावत्क्वापि ययौ च सः ॥
प्रातः प्रीतिभराद्भूपश्चंद्रमाकार्य संसदि ॥ जगौ मे जीवितं दत्तं, जगदानंददायकम् १२८
आलोच्य मंत्रिभिः सार्द्धं, राज्यार्द्धं मुदितो ददौ ॥ चंद्राय सुतया चंद्रावल्या साकं नरेश्वरः ॥
राजसौधांतिके रम्ये, मंदिरे तस्य तस्थुषः ॥ आययौ तत्पितुर्लेखश्चंपातः सोप्यवाचयत् १३०
अपीत्वा नीरमप्याशु, त्वयागंतव्यमेकदा ॥ असौ तद् ज्ञापयामास, भूभुजे गमनोत्सुकः ॥
मुक्त्वा चंद्रावलीं तत्र, नृपेणानुमतोऽचलत् ॥ गच्छन् पथि नदीतीरे, स्थित्वासौ दिनमत्यगात् ॥
संध्यायां सरितो दूरं, गतः स तनुचिंतया ॥ ददर्श रुदतीं कांचिदंगनां शाखिनस्तले ॥१३३॥
का त्वं रोदिषि तेनोक्ते, सा जगौ शृण्वहं नदी ॥ अर्द्धरात्रे महापूरो, नद्यामत्र समेष्यति ॥
यास्यति प्रलयं सर्वो, लोकस्तेनैव रोदिमि ॥ श्रुत्वेति सत्वरं चंद्रश्चचाल सपरिच्छदः १३५
पृष्टैर्यातैर्जनैःप्रोक्तं श्रुत्वा पूरसमागम् ॥ चंद्रोदध्यावहो कीदृगुपकारः कृतस्तया ॥१३६॥
विषमे सोऽथ कांतारे, भोजनाय स्थितोंऽतरा ॥ भोक्तुं निविष्टाःसर्वेऽपिभटास्तस्यक्षुधातुराः ॥
तदैव गिरिभिल्लानां, धाटी तत्र समागता ॥ मलिना मेघमालेव, शरासारं वितन्वती १३८



For Private and Personal Use Only

भटेषु व्याकुलेषूच्चैश्चंद्रे चिंतातुरे सति ॥ निर्गतः सुभटः कोऽपि, हयारूढो महाद्युतिः ॥
भल्लेन त्रासितास्तेन, सर्वे भिल्लागिरिंययुः ॥ व्यावर्त्तमानो नो दृष्टः, सुभटः क्वापि केनचित्॥
चंद्रश्चित्रमिदं चित्ते, दधानः सपरिच्छदः ॥ आजगाम पुरी चंपां, पितुश्चक्रे परां मुदम् १४१
भोजनादनु तातेन, पृष्टं पुत्र तवाध्वनि ॥ कष्टद्वयं समायातं, नद्यां कांतार एव च ॥१४२॥
पुत्रोऽवादीत् कथं तात, भवता ज्ञायते ह्यदः ॥ कथं को वा समायातः, पूर्वमेव ममागमात्॥
पिता प्रोचे न कोऽप्यागाज्जानामि स्वयमेव हि ॥ पुत्रेण कथमित्युक्ते, समये कथयिष्यते॥
इत्युक्त्वा श्रेष्ठिना शीघ्रं, लेख्यं पुत्रेण कारितम् ॥ अदूरे स्थापितश्चायं, रात्रौ वार्त्ता प्रकुर्वता॥
अर्द्धरात्रे जगौ श्रेष्ठी, वत्स जागर्षि किं न वा ॥ सोऽथ जागरितोऽद्राक्षीदूर्ध्वस्थं पितरं निजम् ॥
भूमौ शयानमेकं च, दृष्ट्वा स पितरं जगौ ॥ किमिदं दृश्यते तात, तव रूपद्वयं मया १४७
श्रेष्ठी जगाद हेवत्स, स्वरूपं कथ्यते तव ॥ त्वयि चंद्रावतीं यातेऽभून्मे किंचिदपाटवम् १४८
स्वभावेनैव सम्यक्त्वाद्युच्चारं स्वयमेव हि ॥ कृत्वा सुप्तःप्रमीलायामेव मृत्वा सुरोऽभवम् ॥
अवधिज्ञानतो ज्ञात्वा स्वरूपं सर्वमात्मनः ॥ गृहसूत्राय कायःस्वस्तत्क्षणादाश्रितो मया १५०

प्रेष्य तत्र ततो लेखं, शीघ्रमाकारितो भवान्॥ नार्या भटस्य रूपं च, कृत्वा कष्टं निवारितम् ॥



कारितं लेख्यकं सर्वं, त्वं सदैव सुखी भवेः॥ स्वर्गं यास्याम्यथ स्थातुं, मर्त्यलोके न शक्यते॥



इति प्रोच्य गते तस्मिन्, विद्युज्झात्कारकारिणि॥ शवमेव पुरो दृष्ट्वा, चंद्रःपूत्कारमातनोत्॥
मिलिते स्वजने प्रातः, प्रेतकार्याणि तस्य सः॥ कृत्वा क्रमेणे निःशोकः, पुरीं चंद्रावतीमगात्
चंद्रावल्या समं क्रीडन्नाक्रीडादिषु सोऽन्वहम्॥ वासरान् गमयामास, लीलातिशयभासुरान्१५५
विकारेणान्यदा चंद्रावली केनापि बाधिता॥ जाता दुर्गंधता देहे, पिता भर्त्ता च दुःखितौ॥
कारयामासतुर्मंत्रतंत्रौषधपरंपराम् ॥ दिनमेकं गुणे दृष्टे, जातो दोषस्तथैव सः ॥१५७॥
चक्रे विलेपनं यः प्राग्वसुदत्ताभिधः प्रभोः॥ सोऽवातरत्तदा तस्याः, कुक्षौ हंस इवांबुजे १५८
तस्मिन्नुत्पन्नमात्रेऽस्या, गता दुर्गंधता क्षणात्॥ मध्यस्थचंदनेनेव, प्रत्युताभूत्सुगंधता॥१५९॥
ताते कांते च दृष्टे सा समये सुषुवे सुतम्॥ चंद्रेण श्वशुरेणापि, कृतास्तस्य महोत्सवाः॥
अनेन चंदनेनेव, कृता मातुः सुगंधता॥ अतोऽस्य चंदनसार, इति नाम विनिर्मितम्१६१
वर्धमानः क्रमात्ताभ्यां, कलाकौशलबंधुरः॥ तारुण्ये कमलाराजपुत्र्यासौ परिणायितः १६२

अन्येद्युर्दैवयोगेन, चंद्रशेखरभूपतेः ॥ दाहज्वरः समुत्पेदे, दिवारात्रौ हि दुःखदः ॥१६३॥
सांवत्सरा गृहकृतां, वैद्याश्च व्याधिसंभवाम् ॥ मांत्रिका भूतसंभूतां पीडामाहुर्महीपतेः ॥१६४॥
सलिलं वालुकासद्म, चंदनं चापि चंद्रमाः ॥ तापं शमयितुं शक्ता, नाभूवंस्तस्य भूपतेः १६५
नीतायामपि षण्मास्यां, स्वप्नं लेभे नराधिपः ॥ वेत्रीति कुलदेव्याह, दौहित्रश्चंदनोऽस्ति ते
तस्य हस्तेन संघृष्टय, चंदनेन विलेपनम् ॥ कार्यं सर्वांगमेतेन, तापः शांतिमुपैष्यति १६७
स्वप्नं लब्ध्वा प्रबुद्धोऽथ, प्रातर्भूपः प्रकाश्य तम् ॥ दौहित्रं निजमाकार्य विलेपनमकारयत् १६८
शांततापे सति क्ष्मापे, प्रावर्त्तत महोत्सवाः ॥ आशीर्वचांसि ददिरे चंदनाय जना मुदा ॥
चतुर्ज्ञानधरोऽत्रागान्मुनिश्चंद्रमुनिस्तदा ॥ तं नंतुं च ययौ राजा चंद्रश्चंदनसंयुतः ॥१७०॥
धर्मोपदेशमाकर्ण्य, मुनिं प्रोचे महीपतिः ॥ महिमा चंदनस्येव, चंदनस्य कुतोऽधिकः १७१
मुनिः पूर्वभवं प्रोचे, नगरे हस्तिनापुरे ॥ श्रेष्ठिनो धनदत्तस्य, वसुदत्तः सुतोजऽनि ॥१७२॥
पूजायां क्रियमाणायां, चंदनस्य विलेपनम् ॥ कृतं जिनस्य तेनास्य, तेन सौभाग्यमद्भुतम् ॥ ॥३८॥
चंदनोऽपि भवं पूर्वं, ज्ञात्वा जातिस्मरोऽभवत् ॥ विशेषादार्हतं धर्मं, प्रपेदे मुनिसंनिधौ १७४

चंद्रशेखरचंद्रौ तौ, मुनिं नत्वा पुरं गतौ ॥ राज्यं चंदनसाराय, दत्वा प्राव्रजतां मुदा ॥१७५॥
राजा चंदनसारोऽपि, प्राज्यं राज्यमपालयत् ॥ प्राप्तप्रौढप्रतापोऽपि, प्रजातापहरः परः ॥१७६॥
समये सोमपुत्राय, राज्यं दत्वा नरेश्वरः ॥ प्रपाल्य संयमं प्रांते, सौधर्मे त्रिदशोऽभवत् ॥
चिरं सौख्यानि भुक्त्वासौ, देवलोकात्ततश्च्युतः ॥ द्वितीयः सिंहनामाभूत्तनयस्तव भूपते ॥

॥ इति विलेपनपूजायां वसुदत्तकथा ॥

अथ येन कृतं वस्त्रयुगलारोपणं जिने ॥ कथयामि फलं तस्य, भव्याः शृणुत भावतः ॥१७९॥
अत्रास्ति भरतक्षेत्रे, जयंती नामतः पुरी ॥ तत्र क्षेमंकरो राजा, तस्य रत्नवती प्रिया ॥१८०॥
जीवस्तस्य सुदत्तस्य, मृत्वा तत्कुक्षिमागतः ॥ तया च सुषुवे पुत्रः, समये शुभलक्षणः ॥
कृत्वा महोत्सवं तस्य, पुत्रस्य पृथिवीपतिः ॥ रत्नध्वज इति प्रीतिधाम नाम विनिर्ममे ॥
साकं पित्रोः प्रमोदेन, वर्द्धमानो नवेंदुवत् ॥ कलाः सर्वाः स जग्राह, ताः पुसां किल मंडनम् ॥
सोऽन्येद्युर्भीमग्रीष्मर्तौ, निशायां घर्मपीडितः ॥ आसीनश्चंद्रशालायां, चंद्रपादानसेवत ॥१८४॥
मित्रैः साकं स कुर्वाणः, सुभाषितकुतूहलम् ॥ प्रमीलया परिस्पृष्टलोचनद्वयवानभूत् ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुप्तेषु तस्य मित्रेषु, तत्रैव तलकुट्टिमे ॥ अर्द्धरात्रेऽचलच्चंद्रचूडश्च खेचराग्रणीः ॥ १८६ ॥
तस्योत्तरीयमुत्तुंगविमानवलभीस्थितम् ॥ पपात वातवेगेन. सौधे रत्नध्धजोपरि ॥१८७॥
सोऽथ जागरितोऽद्राक्षीत्तद्दिव्यं वस्त्रमद्भुतम्॥ चंद्रांशुभिश्च्युतमिव, लक्ष्यं चंद्रांशुभिःस्फुरत् ॥
संगोप्य तद्दुकूलं स स्वीयं तल्पमशिश्रियत्॥ प्रातः प्रबुद्धस्तज्ज्ञात्वा, पश्यतिस्म पुनःपुनः॥
कृत्वोत्तरीये तत्तादृक्, परिधानं विना तदा॥ विषण्णश्चिंतयामास, निजचेतसि राजसूः १९०
अंतरीयं विना तादृगुत्तरीयेण किं मम॥ प्रच्छदोज्झिततल्पस्योपरि चंद्रोदयेन किम् ॥१९१॥
द्वैतीयीकं विना योग्यमेकेन रुचिरेण किम्॥ वरं मुखं भवेदेककुंडलादप्यकुंडलम् ॥१९२॥
एवं चिंतातुरं चित्तं, दधानं राजनंदनम् ॥ विलोक्य सुहृदः प्रोचुर्वैलक्ष्यं किमिदं तव ॥
एतेभ्यः किमयुक्तेन, प्रोक्तेन वचसाधुना॥ साधुना वचनेनेति, तेन तेने मनःसुखम् १९४
ततो मनोविनोदाय, वने क्रीडाकुतूहलैः॥ मित्रैः सह जगामासौ, वामौकसि विषण्णधीः॥१९५॥
सरस्यां दीर्घिकायां च, पद्मतंतून् विलोकयन्॥ दुकूलमेव सस्मार, रेवाकूलमिव द्विपः॥१९६॥
रंभासु क्रीडितं कुर्वन्नसौ तत्तंतुसंततिम् ॥ विलोक्य वस्त्रं सस्मार, तद्दिव्यं देवतामिव ॥१९७॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुष्पेषु शतपत्रीणां, केशरश्रेणिमुज्ज्वलाम्॥ वीक्ष्य वस्त्रस्य सोऽस्मार्षीन्मंत्रज्ञोमंत्रवच्चिरम् ॥
एवं तत्रैव संध्यायाः समयः समजायत ॥ रंभागृहं समाश्रित्य विशश्राम नरेंद्रभूः ॥१९९॥
सुप्तेषु सर्वमित्रेषु, शर्वर्यां वर्यवाससा॥ कृतावासेन तच्चित्ते, निद्रा दूरं निवारिता ॥२००॥
अर्द्धरात्रगते सोऽथ शुश्राव श्रवणोत्सवम्॥ गीतेन मिश्रितं वाद्यहृद्यं नाट्यध्वनिं क्वचित्॥
उत्थाय तस्य वीक्षार्थं, ततो गच्छन्नतुच्छधीः॥ पुरो विलोकयामास, देवताभवनं वने॥२०२॥
तस्मिन् गते मनुष्यत्वात्तत्क्षणं प्रेक्षणं स्थितम्॥ असौ व्यचारयामास, नाट्यं दैवतमेव तत् ॥
मध्येभवनमागत्य, तत्र मूर्तिं गवेषयन्॥ पुरो विलोकयल्लक्ष्मीं, देवतामासनस्थिताम्॥२०४॥
हेलक्ष्मि देवते गेहमासीनः कामितप्रदे ॥ इत्युक्त्वा पूरयामासासनं तत्रैव भूपभूः॥२०५॥
तस्य पुण्यवशात्प्रीता, प्रभातसमये रमा ॥ दिव्यं वस्त्रद्वयं रंगादुत्संगाश्रितमातनोत् २०६
प्रातर्विलोक्य तद्वस्त्रद्वंद्वं दिव्यं मनोहरम्॥ अंतरीये करोतिस्म, वोत्तरीये तदैव सः॥२०७॥
तत्तादृग्वेषधारी स, मित्रैः सह पुरं गतः॥ सभायां भूपतेरागात्प्रभाभरविभाकरः ॥२०८॥
नत्वा निविष्टं तं भूपः स्पष्टमाचष्ट किं भवान्॥ वने तस्थौ यतो दोःस्थं सौख्यं भवति दैवतः॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पुत्रः प्राह ततस्तात, नैवं प्रायः करिष्यते ॥ नृपोऽथ वीक्ष्य तद्वस्त्रे, तद्वेषं हृदये दधौ ॥
गुण० स्वामिवेशाधिको वेशोऽन्येषामिह न युज्यते ॥ अयं स्वयं न जानाति, तत्पुरः कस्य कथ्यते ॥ चरित्र.
॥४२॥ ध्यात्वेत्यसौ विसृष्टायां, सभायां नंदनं जगौ ॥ आयातानि कुतस्तानि वस्त्राणि तव कथ्यताम् ॥
आयातानि किमुच्येत, सलीलमिति जल्पता ॥ नत्वा नृपं विनिर्गत्य, कुमारेण गते गृहम् २१३
भोजनादनु दध्यौ स, राज्ञे वेशोऽपि रोचितः ॥ नोचितो मे ततो नूनं, सभायांगच्छतः सतः ॥
चिंतयित्वेत्यसौ वस्त्रयुग्मं संवृत्य यत्नतः ॥ स्वचेट्या प्रेषयामास, परिधानाय भूभुजे २१५
किमिदं वस्त्रयुग्मं रे, केन च प्रहितं वृथा ॥ गच्छ वत्सस्य वस्त्राभ्यामिह नास्ति प्रयोजनम् ॥
इति जल्पति भूपाले, कुमारोऽपि समागतः ॥ प्राह तात भवद्योग्यं, वस्त्रयुग्ममिदं खलु ॥
भूपोऽवग् वत्स ते पूर्ववस्तु विस्मृतिमागतम् ॥ किमनेनाधुना तर्हि, गृहीत्वा वत्स गम्यताम् ॥
भूपे निषिध्यति प्रोच्चैः, कुमारे च प्रयच्छति ॥ सेर्ष्येण राज्ञा तद्दत्तं, मागधायांबरद्वयम् ॥२१९॥
रूक्षचेतास्ततो गत्वा, कुमारो दध्यिवानिति ॥ स्वल्पेन वस्तुना किं स्यादाप्तेनापि न गौरवम् ॥ ॥४२॥
इति ध्यायन् दिनं नीत्वा, निशायां सुप्तवानसौ ॥ प्रातः प्रबुद्धोऽपश्यत्तच्चीरयुग्मं शिरस्तले ॥

For Private and Personal Use Only

किमेतत्कौतुकं चित्ते, चिंतयन्निति सत्वरम् ॥ वस्त्रयुग्मं समादाय, स ययौ नृपसंसदि २२२
पुरो विमुच्य तद्वस्त्रयुग्मं स्वीक्रियतामिति ॥ कुमारे जल्पति क्ष्मापश्चिंतयामास चेतसि २२३
गृहीत्वा मागधादेव, किमिदं दीयते मम ॥ मागधश्च तदैवागाद्वस्त्रद्वयविभूषितः ॥२२४॥
नवीनं घटतीत्येतदिति ध्यात्वा नृपोऽवदत् ॥ किमर्थं क्रियते वत्स, बहुद्रव्यव्ययो वृथा ॥
बहूनि राजकार्याणि, सर्वत्रापि धनव्ययः ॥ गृहीताश्च भटाहस्तितुरंगाः कार्यकारकाः ॥२२६॥
पुत्रोऽवादीदिह द्रव्यव्ययो न क्रियते मया ॥ पृच्छतां कोऽपि केनापि, दत्तं वस्त्रद्वयं मम ॥
ततः कुतः समायाति, नवं नवमिदं तव ॥ पुत्रः प्रोवाच संतुष्टा, दत्ते श्रीदेवता मम २२८
ततः प्रातः पुनर्वस्त्रद्वयमानेयमुज्वलम् ॥ इत्युक्त्वा स्थापयामास, पूर्वायातं नरेश्वरः ॥२२९॥
पुनर्वस्त्रद्वये प्रातः, संप्राप्ते स महीपतिः ॥ तन्नेपथ्यं स्वयं कृत्वा, कुमारायान्वमन्यत ॥२३०॥
महीपालकुमारेंद्रौ, तत्ताहग्वेशधारिणौ ॥ विरेजाते सभामध्ये, धर्मार्थाविव संगतौ ॥२३१॥
आर्यरक्षित इत्याख्यां, वहन्नागान्मुनिस्तदा ॥ चतुर्ज्ञानधरस्तं च, वंदितुं भूपतिर्ययौ ॥२३२॥
कुमारसहितो भूपस्तं नत्वा धर्मदेशनाम् ॥ श्रुत्वा पप्रच्छ वत्सस्य, किमेवं भाग्यमद्भुतम् २३३



For Private and Personal Use Only

मुनिः पूर्वभवं प्रोचे, नगरे हस्तिनापुरे॥ श्रेष्ठिनो धनदत्तस्य, सुदत्ताख्यः सुतोऽजनि २३४
पूजायां क्रियमाणायां, यदनेन जिनेशितुः॥ विहितं वस्त्रयुगलारोपणं भावशालिना २३५
तेन पुण्येन भूपाल, त्वत्कुलेऽसौ समागतः ॥ वस्त्रद्वयं प्रदत्तेऽस्मै, श्रीदेवी च नवंनवम् ॥
इति श्रुत्वा कुमारोऽथ, जातिस्मृतिमुपागतः॥ विशेषादार्हतं धर्मं, प्रपेदे मुनिसंनिधौ॥२३७॥
काले राज्यं पितुः प्राप्य, पालयित्वा चिरं भुवम्॥ प्रपाल्य संयमं प्रांते, सौधर्मे त्रिदशोऽभवत् ॥
चिरं सौख्यान्यसौ भुक्त्वा, देवलोकात्ततश्च्युतः॥तृतीयो हरिनामाभूत्तनयस्तव भूपते ॥२३९॥

॥ इति वस्त्रयुगलपूजाधिकारे सुदत्तकथा ॥

वासपूजा कृता येन, फलं तस्य निगद्यते॥ अत्रास्ति भरतक्षेत्रे, मथुरानगरी किल ॥२४०॥
भूपतिर्वासवस्तत्र, नवीन इव वासवः॥जयंती वल्लभा तस्य, जयंती रूपतः श्रियम् ॥२४१॥
अन्यदा नारदः शौक्ल्यजितशारदवारिदः ॥ पारदद्युतिरायासीद्वीक्षितुं भूपसंपदम् ॥२४२॥
राज्ञा संमान्य स प्रोचे, किमप्याश्चर्यमीक्षितम् ॥ सोऽवादीद्भूपते भूमिर्विविधाश्चर्यसंकुला ॥
इत्युक्त्वा सहसोत्पत्य, जयंतीं नृपवल्लभाम्॥ वीक्षितुं स ययौ किंतु, स तया नोपलक्षितः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



क्षणंस्थित्वारुषापूर्णो, व्यावृत्तोऽसौव्यचिंतयत् ॥ अनया नोपलक्ष्येऽहं, किंकिमस्याःकरोमिभोः॥
इति ध्यायन्नसौ गच्छन्नतुच्छं मत्सरं वहन् ॥ श्रेष्ठिनो जिनदत्तस्य, प्राचालीन्मंदिरोपरि२४६
सलावण्यां गवाक्षस्थां,तस्य कन्यां धनश्रियम्॥दृष्ट्वा स दध्यौ तस्याःस्यान्मानच्छेदोऽनया ध्रुवम्
ध्यात्वेति नारदस्तस्या रूपं चित्रपटेऽलिखत् ॥ नृपायादर्शयच्चाख्यदाश्चर्यमिह दृश्यताम् २४८
नृपोऽवोचदियं लक्ष्मीर्हहोवास्ति चतुर्भुजा ॥ भारती किमु हंसा सा, वीणापुस्तकधारिणी ॥
तत्रैव नगरे किंतु, जिनदत्तो महाधनी ॥ धनश्रीरितिनाम्नास्य, सुता रूपश्रियायुता २५०
रत्नं रत्नेन घटतामिति ध्यात्वा मया तव ॥ दर्शितास्ति यथायोग्यं, कार्यं कार्यमतःपरम् २५१
इति प्रोच्य गते तस्मिन्, राजाहूय स्वमंत्रिणम् ॥ स्वरूपं ज्ञापयित्वोचे, जिनदत्तं समाह्वय ॥
आकारितस्ततः श्रेष्ठी, तां स कन्यामयाचत ॥ अथ तेन प्रदत्ता सा, नृपेणोढा शुभे दिने ॥
धनश्रियां मनस्तस्य, राज्ञो दृष्ट्वानुरागभाग् ॥ जयंती वैजयंतीव, स्थैर्यं प्राप न हि क्वचित् ॥
वासपूजाकरश्चित्तनंदनाख्यो धनश्रियाः ॥ लेभेऽवतारं कुक्षौ स, नंदने कल्पवृक्षवत् २५५
धनश्रियां सुते जाते, नृपः कृत्वा महोत्सवम् ॥ धनराज इति प्रीतित्राम नाम विनिर्ममे॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कियन्मात्रेषु घस्रेषु, जयंत्या अप्यभूत्सुतः ॥ तस्यासीत्पद्म इत्याख्या, प्रावर्द्धेतामुभौ सुतौ ॥
लेखशालागमार्हौं तौ, जयंती वीक्ष्य दध्युषी ॥ धनश्रियाः सुतो वृद्धो, मम पुत्रो लघुःपुनः
वृद्धत्वाद्धनराजाय, राजा राज्यं प्रदास्यति ॥ उत्पादयामि तत्किंचित्, दूषणं तस्य सांप्रतम्
ध्यात्वेति योगिनं कंचिदाकार्य कपटे पटुम् ॥ भृशमावर्ज्य सा प्रोचे, किंचिच्चूर्णादि दीयताम्
चूर्णं दत्वा स च प्रोचे, क्षिप्तेनानेन मस्तके ॥ गृहिलत्वं भवत्येवेत्युक्त्वा योगी जगाम सः
तच्चूर्णं मुष्टिगं कृत्वा, सा प्रीता तत्र तस्थुषी ॥ इतश्च धनराजोऽत्र, समागात् क्रीडयाऽऽरमन्
सा तं दंभात्समाहूय, चूर्णं चिक्षेप मस्तके ॥ तस्य पुण्यप्रभावेण, तद्व्यर्थं समजायत २६३
छद्मवत्याःसुतस्तस्या, अपि पद्मः समागतः ॥ सा तं पस्पर्श चुंबंती, स्नेहाच्छिरसि पाणिना २६४
अंगुल्यंतरगं किंचिच्चूर्णं तस्याः करे स्थितम् ॥ तेनापि पतितेनासौ, तत्क्षणं ग्रहिलोऽभवत्
रुदंती चोरमातेव, प्रच्छन्नं स्वं निनिंद सा ॥ इतश्च धनराजोऽपि, तारं तारुण्यमाश्रितः २६६
पुत्रीं मंत्रिवरस्यासौ, भूपेन परिणायितः ॥ क्रीडंतं च तया वीक्ष्य, जयंती चिखिदे हृदि २६७
ततः स्वराज्यदानाय, धनराजस्य भूपतिः ॥ मुहूर्त्तं गणयामास, गणकैर्गुणबंधुरम् ॥२६८॥



For Private and Personal Use Only

तदा योगी स एवागाज्जयंत्या मंदिरं पुनः ॥ स प्रोचे मम चूर्णेन, तव सिद्धो मनोरथः ॥
गुण० निःश्वासान् मुंचती सोचे, दैवेन कृतमन्यथा ॥ सपत्नीनंदने जातं, तच्चूर्णं व्यर्थमेव ते २७० चरित्र.
॥४७॥ अंगुल्यंतरगेणापि, तेन चूर्णेन मत्सुतः ॥ तत्क्षणं ग्रहिलो जातो, हा दैवेनास्मि वंचिता २७१
स्वराज्यं वणिजे तस्याः, पुत्राय यदि भूपतिः ॥ ददाति स्फोटकस्तर्हि, दग्धोपरि ममाभवत् ॥
तत्किंचिद्दीयतां येन, तिष्ठंत्यंगानि तस्य हि ॥ वरं राज्यमिदं शून्यं, वणिक्पुत्रे तु नोचितम् ॥
दत्वा चूर्णं जगौ योगी, त्वया क्षेप्यमिदं जले ॥ अनेन लग्नमात्रेण, स्थास्यंत्यंगानि तस्य हि ॥
इत्युक्त्वा स ययौ योगी, सा तच्चूर्णं कथंचन ॥ राज्याभिषेककलशोदके चिक्षेप दुष्टधीः २७५
मंडले मांडलिकानां, मिलिते च महोत्सवे ॥ वर्त्तमाने सुतस्तस्या, ग्रहिलोऽत्र समागतः २७६
यत्र क्षिप्तं तया चूर्णं, तमेव कलशं रयात् ॥ मामाकुर्वंति लोकेऽसौ, निजशीर्षे व्यलोठयत् ॥
स्थितानि तस्य सर्वाण्यंगानि तत्क्षणमेव हि ॥ तच्छ्रुत्वा सा जयंती तमुत्थाप्य सदनं ययौ २७८
राज्याभिषेके संजाते, धनराजस्य भूपतिः ॥ गुरोः संयममादाय, निजकार्यमसाधयत् २७९ ॥४७॥
धनराजमहीपाले, तस्मिन् पालयति क्षितिम् ॥ देशा न मुक्ता सौख्येन, सुभिक्षेण च सर्वदा ॥

इतश्च देशे पांचाले, कांपील्यपुरपत्तने ॥ धनराजप्रतिद्वेषी वैरिशल्यो नृपोऽभवत् ॥२८१॥
गोशीर्षचंदनोद्भूतं, वासोवासितविष्टपम् ॥ विषमिश्रं विधायासौ, स्वनरान् प्रत्यभाषत ॥
वणिग्वेषधरैर्भूत्वा, मथुरापुरि गम्यताम् ॥ वैरिघातकरं वासः, कर्त्तव्यं प्राभृतोपरि ॥२८३॥
अनेनाघ्रातमात्रेण, गते यामद्वये सति ॥ तत्क्षणं प्राप्यते मृत्युरिदं भवति नान्यथा २८४
वैरी जेघ्रीयते वासो, यावत्तावत्सभांतरे ॥ स्थातव्यमन्यथा मृत्युर्भविता भवतामपि २८५
इति शिक्षां स्वयं दत्वा, वणिग्वेषधरान् नरान् ॥ प्रेषयामास मथुरापुर्यां ते च समागताः ॥
ते वेत्रिवेदिताःप्राप्ता, धनराजस्य संसदि ॥ विमुच्य प्राभृतं तस्योपरि वासपुटं न्यधुः २८७
वासयंतं सभामध्यं, वासं वीक्ष्य पुटस्थितम् ॥ जेघ्रीयतेस्म भूपालो, भ्रमरःकुसुमं यथा ॥
सिद्धं कार्यमिति प्रीता, अनुज्ञाप्य नरेश्वरम् ॥ न केवलं सभायास्ते, निर्गता नगरादपि ॥
अथ यामद्वये जाते, धनराजो महीपतिः ॥ विषेण व्याकुलो जातः, पपात पृथिवीतले २९०
विषं विषमिति व्यग्रा, वदंतः सचिवादयः ॥ कारयंतः प्रकारांश्च, नृपं चक्रुःसचेतनम् ॥२९१॥
नृपतिः शोधयामास, तान्नरान्नगरेऽखिले ॥ अदृष्ट्वामूंस्तदा मेने, तानेव विषदायकान् ॥

विषव्यापे गते तस्मिन्, सज्जीभूते च पार्थिवे ॥ सर्वत्र नगरे तत्र, प्रावर्त्तत महोत्सवाः २९३
इतश्च जयसिंहाख्यः, सूरिस्तत्र समागतः ॥ चतुर्ज्ञानधरस्तं च वंदितुं भूपतिर्ययौ ॥२९४॥
नत्वा च सपरिवारः, श्रुत्वा धर्मोपदेशनाम् ॥ पप्रच्छ कर्मणा केन, प्राज्यं राज्यमिदं मम ॥
मुनिः पूर्वभवं प्रोचे, नगरे हस्तिनापुरे ॥ श्रेष्ठिनो धनदत्तस्य, सुतोऽभूच्चित्तनंदनः २९६
प्रासहर्षप्रकर्षेण भवता जिनपूजनम् ॥ विहितं शुभभावेन, प्राज्यं राज्यमिदं ततः ॥२९७॥
वासपूजाविशेषेण, तूर्णं विघ्नो व्यलीयत ॥ बाल्ये राज्याभिषेके च, संप्रत्यपि नरेश्वर २९८
इति श्रुत्वा मुनेर्वाचं, नृपो जातिस्मरोऽभवत् ॥ विशेषादार्हतं धर्मं, प्रपेदे तस्य संनिधौ २९९
मुनिं नत्वा पुरं गत्वा, पालयित्वा चिरं भुवम् ॥ दत्वा कुशलपुत्राय, राज्यं राजाऽग्रहीद्व्रतम् ३००
प्रपाल्य संयमं भव्यभावेन स मुनीश्वरः ॥ विहितानशनः प्रांते, सौधर्मे त्रिदशोऽभवत् ३०१
चिरं सुखान्यसौ भुक्त्वा, देवलोकात्ततश्च्युतः ॥ चतुर्थो गजनामाभूत्तनयस्तव भूपते ३०२

॥ इति वासपूजायां चित्तनंदनकथा ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्नात्रादिपूजनचतुष्कफलानि पुण्यमाणिक्यसुंदररुचिर्नृपतेःपुरस्तात् ॥
उक्त्वा विशेषसहितानि हिताय साधुः, पुष्पादिपूजनफलं गदितुं प्रवृत्तः ॥२०३॥

॥ इति अंचलगच्छे श्रीमाणिक्यसुंदरसूरिविरचिते पूजाधिकारे गुणवर्मचरित्रे
स्नात्रविलेपनवस्त्रयुगलारोपवासपूजाफलवर्णनंनाम द्वितीयःसर्गः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ॥ सर्ग ३ जो ॥



नरवर्मा मुनिः प्राह, गुणवर्मणि शृण्वति ॥ पुष्पपूजा कृता येन, फलं तस्य निगद्यते ॥१॥
अत्रास्ति भरते भूमिरमणीमणिकुंडलम् ॥ कुंडलं नाम नगरं, तत्राभूद्विक्रमो नृपः ॥ २ ॥
तस्य शीलवती नाम, ललना शीलशालिनी ॥ पुष्पपूजाकरो लक्ष्मीधरस्तत्कुक्षिमाययौ ३
स तया समये जातः प्रातस्तज्जननोत्सवम् ॥ कृत्वा विजयचंद्राख्या, विहितास्य महीभुजा ४
पाल्यमानः स यत्नेन, रत्नेन समकांतिभाक् ॥ हर्षदः पितृमातृभ्यां, षड्वर्षीयोऽभवत्क्रमात् ५
अन्येद्युर्विक्रमो भूपस्त्रिविक्रमसमोऽरिषु ॥ सभां विभूषयामास, मंत्रिसामंतपूरिताम् ॥६॥
तदा लक्ष्मीधरो नाम, व्यवहारी विदेशतः ॥ वेत्रिणा वेदितस्तत्र, समायातः सभांतरे ॥७॥
रिक्तहस्तैर्नदृश्यंते, राजानो भिषजो गुरुः ॥ इति न्यायेन पुष्पाणि, सोऽमुंचद्भूपतेः पुरः ८
तेषां परिमलेऽत्यंतं, विष्वक् तत्र प्रसृत्वरे ॥ भूपो जगाद पुष्पाणि, दीयंतां सभ्यपाणिषु ॥९॥
तेषु प्रदीयमानेषु, पुष्पेषु व्यवहारिणा ॥ रक्षकेणोद्धृतो बालः, पुत्रो राज्ञः समागतः १०



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



राजा दधौ निजोत्संगे, तं रंगेण मनोहरम् ॥ मूर्तिमंतमिवानंदं, वस्त्राभरणभासुरम् ॥१३॥
याचमानस्य पुष्पाणि, दीयमानानि पश्यतः॥ कुमारस्य करे पुष्पयुग्मं लक्ष्मधरोऽमुचत् ॥
आजिघ्रन् पुनरेतानि, कुसुमानि ययाच सः॥ अन्याघ्रातानि तान्येष, दीयमानानिना ददे ॥
एतज्जातीयपुष्पाणि, नव्यान्येव प्रयच्छ मे ॥ इत्यगृह्णति पुत्रे च, नृपो लक्ष्मीधरं जगौ ॥
कुतस्त्वया समानीतान्येतान्येष नृपं जगौ ॥ चतुष्पथादिति श्रुत्वा, भूपो भृत्यानभाषत १५
गत्वा भो यत्रतत्राप्यारामिकाणां चतुष्पथे॥ आनीय दत्त पुष्पाणि, पाणौ मे तनुजन्मनः ॥
परिभ्रम्य समायातास्ते प्रोचुर्नृपतिं प्रति ॥ न लब्धान्येव पुष्पाणि, सर्वतःशोधितान्यपि ॥
तदा बाढतरं बालः, प्रारेभे कुसुमाग्रह ॥ नाभुक्त भोज्यमादत्त, न फलं न जलं पपौ ॥१८॥
तस्य मातापि संतापान्नाभुक्त सपरिच्छदा ॥ राजापि दुःखितो दध्यावहो बालकदाग्रहः १९
भूपोऽथ मंत्रिणं प्राह, येनानीतानि मूलतः॥ततःस्वरूपं विज्ञाय, पुष्पाण्यानय सत्वरम् २०
ततो मंत्री नृपादेशादारामिकचतुष्पथे ॥ पप्रच्छारामिकान् सर्वांस्तेषामेकस्त्विदं जगौ २१
आरामिकः समायातः, प्रातरेव पुनर्गतः॥ प्रत्यासन्ने वसत्येष, ग्रामे सुग्रामनामनि ॥२२॥

For Private and Personal Use Only

तेन पुष्पाण्यपूर्वाण्यानीतान्यत्र चतुष्पथे ॥ स्वर्णपंचशतैस्तानि, क्रीतानि व्यवहारिणा २३
मंत्री मूलमिति ज्ञात्वा, तस्य ग्रामं गतस्ततः ॥ आरामिकंतमाहूय, कुसुमानि ययाच सः ॥२४॥
स जगाद ममारामे, तद्वृक्षा एव संति न ॥ मंत्री प्रोचे कुतःस्थानादानीतानि ततो वद २५
सोऽवक् प्रातरिहायातः, शैलस्यास्य गुहांतरे ॥ शिलातलोपरिस्थानि, कुसुमान्यहमाददे २६
शिलायां वीक्षितायां च, लब्ध्वा पुष्पचतुष्टयम् ॥ मंत्री प्रमुदितः प्रैषीत्तदैवामूनि भूभुजे २७
शिलायां कुतरेतानि, समेतानीति चिंतयन् ॥ सर्पतमंतः सर्पं स, ददर्श महातनुम् ॥२८॥
शिरःस्फुरन्मणिज्योतिर्द्योतिताखिलदिङ्मुखम् ॥ तं दृष्ट्वा कातराः केचित्पलायांचक्रिरे ततः
स्वमणिज्योतिषापास्तांधकारपटलस्ततः ॥ सर्पश्चचाल पातालविवरेण शनैःशनैः ॥ ३० ॥
आगच्छतिवचः श्रुत्वा, तस्य वक्त्रविनिर्गतम् ॥ मंत्री धीरं मनः कृत्वा, प्राचालीदनुपन्नगम् ३१
गच्छन् मंत्री सुखं सर्पे, धृतदीपइवाग्रगे ॥ पातालविवरेऽद्राक्षीद्रम्यां कुसुमवाटिकाम् ॥३२॥
मंदारचंपकाशोकपाटलद्रुमवासिताम् ॥ तां वीक्ष्य हृदि दध्यौ स, महदेतत्कुतूहलम् ॥३३॥
वाटिकांतःस्थितं तास्ताहक्पुष्पविराजितम् ॥ मंदारतरुमालोक्य, स एवं मुदमादधे ॥३४॥



For Private and Personal Use Only

तरुतोऽमूनि पुष्पाणि, गृहीत्वा यामि भूरिशः ॥ दत्तेष्वेतेषु पुत्राय, प्रीतो भवतु पार्थिवः ३५
इति ध्यात्वा ततः पुष्पाण्यादातुमुपचक्रमे ॥ सर्पःस्पष्टं तमाचष्ट, मर्त्यवाचा गृहाण मा ३६
लभ्यते न मुधा पुष्पाण्यप्रभुर्वाटिकापि नः ॥ गच्छ वत्स गृहीत्वा तत् कुसुमानां चतुष्टयम् ३७
कार्यं चेत्प्रचुरै रेतैस्तदा मान्यं वचो मम ॥ अहं प्रातःसमेष्यामि, स्वयमेव सभांतरे ३८
इति प्रोच्य स्थिते सर्पे, कुसुमानां चतुष्टयम् ॥ गृहीत्वा सचिवोऽचालीत्सपर्योऽभूत्पूर्ववत् पुरः ॥
स्थिते सर्पे गुहाद्वारे मंत्री विस्मितमानसः ॥ आगत्य भूपतेः पार्श्वे, ददौ पुष्पचतुष्टयम् ॥
गृहीत्वा तानि पुष्पाणि, पुत्रे प्रमुदिते सति ॥ भुंजाने भोज्यमंबापि, प्रीताभुक्त सखीयुता ४१
मंत्रिणा सर्ववृत्तांते, कथिते सति भूपतिः ॥ प्रातः सभामलंचक्रे, नभोदेशमिवार्यमा ॥४२॥
वेत्रिणावेदितो वृद्धो, विप्रस्तत्र समागतः ॥ तस्य पृष्टानुगा कन्या, सलावण्या समाययौ ४३
मंदार द्रुम पुष्पाणि, प्राभृतीकृत्य पाणिना ॥ स विप्रो भूभुजे दत्वाशीर्वादं च निविष्टवान् ॥४४॥
केयूयं कुत आयाताः, केयं कन्या मनोरमा ॥ एतानि कुत्र लभ्यंते, पुष्पाणि प्रचुराणि च ४५
सोऽवादीन्न कथं पृष्टस्त्वया मंत्री सएव हि ॥ यत्तस्याग्रे गुहामध्ये, प्रागेव प्रकटोऽभवम् ४६



For Private and Personal Use Only

नृपे मंत्रिमुखं पश्यत्यकरोत्तत्क्षणादसौ ॥ सर्परूपं महाकायं, शिरःस्फूर्जन्मणिद्युति ॥४७॥
लोके बिभ्यति तत्कालं, विप्ररूपं पुनर्दधौ॥ विस्मितस्तंनृपः प्रोचे. कोऽसित्वं सत्यमुच्यताम्४८
स जगौ देवशर्माभूद्विप्रो वेदेषु पारगः ॥ सुग्रामनामनि ग्रामे, गौरी तस्य च वल्लभा ४९
वार्द्धके च तयोर्जाता, सुता रूपजितामरी ॥ चतुर्वर्षप्रमाणायां, तस्यां स ब्राह्मणो मृतः ५०
ब्राह्मण्यपि मृता सोऽभूद्व्यंतरेषु महोरगः ॥ पातालविवरे तेन क्रीडार्थे वाटिका कृता ५१
अवधिज्ञानतो ज्ञात्वा, निराधारां निजां सुताम्॥ स्वपार्श्वे स्थापयामास,कियत्कालं समाहितः॥
तस्या योग्यं भवत्पुत्रं, ज्ञात्वा सांप्रतमेतया ॥ युक्त्या सोऽहं समायातस्तत्कार्यं सिद्धिमानय॥
तदानाय्य नृपः पुत्रं, निजोत्संगं न्यवेशयत्॥ योग्यं वरं च कन्यां च, दृष्ट्वा हृष्टोऽखिलो जनः ५४
तदा पुष्पाणिपुष्पाणीत्येवं जल्पन् सुकोमलम् ॥ लात्वा तानि पुरःस्थानि,जघ्रौ नृपतिनंदनः॥
नागो जगौ चेज्जामाता, जातो मेऽयं नु तन्मया॥ नित्यमस्मै प्रदेयानि, मंदारकुसुमान्यपि॥
भवत्कुलेऽपि नो सर्पविषं च प्रभविष्यति ॥ अथो नृपस्तयोः पाणिग्रहोत्सवमकारयत् ॥५७॥
अनुज्ञाप्य गते नागे, राजा राज्यमपालयत् ॥ नागपुत्र्या समं रेमे, यौवनस्थो नृपांगजः॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





इतश्च धर्मघोषाख्यः, सूरिस्तत्र समागतः॥ ज्ञानवांस्तं नृपो नंतुं, पुत्रेण सहितो ययौ ॥५९॥
श्रुत्वोपदेशं पप्रच्छ, नृपस्तं केन हेतुना॥ पुत्रस्य भाग्यं सौभाग्यमद्भुतं च निरीक्ष्यते ६०
मुनिः पूर्वभवं प्रोचे, नगरे हस्तिनापुरे ॥ श्रेष्ठिनो धनदत्तस्य, सुतो लक्ष्मीधरोऽभवत् ६१
अनेन शुद्धभावेन, यच्चक्रे जिनपूजनम्॥ पुष्पपूजाविशेषश्च, तेनास्याद्भुतभाग्यता ६२
साफल्यं जायते किंतु, पुष्पाणां जिनपूजनात्॥ अतोऽस्य पूजनं कार्यं, श्रेयोर्थं कुसुमोत्करैः
कुमारस्य भवे प्राच्ये, श्रुतेऽभूज्जन्मनः स्मृतिः॥ विशेषादार्हतं धर्मं, प्रपेदेऽसौ ततो मुनेः ६४
मुनिं नत्वा पुरं गत्वा, दत्वा राज्यं स्वसूनवे॥ भूपतिर्विक्रमः प्राप्य, संयमं शिवमासदत् ६५
अथो विजयचंद्रोऽपि, प्राज्यं राज्यमपालयत्॥ ग्रीष्मे रिपुं महामल्लं, निर्जेतुं स गतोऽन्यदा॥
सैन्ये गते महाटव्यां, स्थिते सति महीपतौ॥ जिनपूजोद्यते नागस्तदा पुष्पाणि नानयत्॥
दवदग्धद्रुमायां चाटव्यामपि जनः क्वचित्॥ न लेभे कुसुमं किंचित्, सर्वं खिन्नं ततो बलम् ६८
सामंता नृपतिं प्राहुः, पूजां चंदनकेशरैः॥ कुरुष्व भोजनं चापि, शरीरं सहते न हि ६९
तथापि निश्चले राज्ञि, भोजनं नैव कुर्वति॥ दिनस्य पश्चिमे यामे, नागो व्योम्नि समाययौ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जय त्वं पृथिवीनाथ, परीक्षेयं कृता मया॥ गृहाणैतानि पुष्पाणि कुरुपूजां जिनेशितुः ७१
पूजां कृत्वा च भुक्त्वा च, नृपो यावत्सुखं स्थितः॥ तावन्नागेन बद्धोऽरिर्नागपाशैःसमागतः॥
मानयित्वा निजामाज्ञां, स भूपेन विमोचितः॥ ततो ययौ निजं स्थानं, महोत्सवपुरस्सरम् ॥
पालयित्वा चिरं राज्यं, प्रांते दत्वा स्वसूनवे॥ गुरोः संयममाप्यासौ, सौधर्मत्रिदिवं ययौ ७४
सुखान्यसौ चिरं भुक्त्वा, देवलोकात्ततश्च्युतः ॥ पंचमः पद्मनामाभूत्तनयस्ते नरेश्वर ॥७५॥

॥ इति पुष्पपूजाधिकारे लक्ष्माधरकथा ॥

माल्यपूजा कृता येन, फलं तस्य निगद्यते॥ भरतक्षेत्रमध्येऽस्त्ययोध्यानाम महापुरी ॥७६॥
श्रीदत्तो नृपतिस्तत्र, श्रीमती तस्य च प्रिया॥ धनेशौ माल्यपूजाकृत्तत्कुक्षौ समवातरत् ७७
दोहदावरे तस्या, माल्यतल्पे सुखं शये ॥ इत्यभूद्दोहदः सोऽपि, ज्ञापितः पृथिवीभुजे ७८
आरामिका नृपादिष्टा, माल्यानयनहेतवे ॥ प्रोचिरे देव निर्दग्धं, हिमेन सकलं वनम् ७९
चेन्न प्रतीतिस्तद्भृत्यैर्निजैरेव निरीक्षताम्॥ तथैव कृत्वा भूपालश्चित्ते चिंतातुरोऽभवत् ८०



For Private and Personal Use Only

दोहदापूरणा देवी, निशां निन्ये कृशा सती ॥ प्रातरारामिकैरेवं, विज्ञप्तं च महीभुजे ८१
अहो चित्रं, अहो चित्रं, सायं दग्धमभूद्वनम् ॥ पुष्पितं दृश्यते सर्वं, वसंत इव सांप्रतम् ८२
तदैवारामिकानीत पुष्पमाल्यप्रकल्पितं ॥ तल्पमासेव्य सा देवी, जाता संपूर्णदोहदा ॥८३॥
संजाते समये पुत्रे, कृत्वा जन्ममहोत्सवम् ॥ माल्यदेव इति प्रीत्या, तस्य नाम नृपो व्यधात्॥
वर्द्धमानः क्रमेणासौ, कलाकौशलपेशलः ॥ तारुण्यमाश्रितश्चक्रे, कन्याचिंतापरं नृपम् ८५
इतश्च भद्दिलपुरे, सोमदेवनृपोऽभवत् ॥ सोमचंद्राभिधा देवी, सोमस्त त्सुताऽभवत् ८६
तस्याः सखीत्वमापन्ना, मंत्रिश्रेष्ठिपुरोधसाम् ॥ पुत्र्यस्ताभिर्युता सैषा, ययौ क्रीडाचलं वने॥
रमंतेस्म भ्रमंतिस्म, जल्पंतिस्म यदृच्छया ॥ तास्तत्र वानरीवृंदं, पश्यंतिस्म सवानरन् ॥८८॥
वानरीभिः सह क्रीडन्नव्रीडंस्ताभिरीक्षितः ॥ कपिश्चपलतां चक्रे, वृक्षाणामंतरं व्रजन् ८९
वानर्यः प्रोचिरे शैलमुपर्युपरि पादपान् ॥ पश्यंत्यस्ताः स्रजो देहि, पुष्पाणां नः पृथक्पृथक्
एका भूमिस्थितस्य द्रोर्नितंबस्थस्य चापरा ॥ शृंगस्थस्य तरोरन्या, ययाचुः कुसुमस्रजः ९१
फालां दत्वा क्षणेनैष, ताभ्यस्ताः कुसुमस्रजः ॥ ददौ तद्वीक्ष्य ताः सख्यः, प्रोचिरे च परस्परम्॥



For Private and Personal Use Only

धन्या इमास्तिरश्चोऽपि, यासामेवं वशंवदः॥ ददाति वानरः कांतः, कामिताः कुसुमस्रजः ९३
सोमश्रीस्ताःप्रति प्रोचे, किमेवं कथ्यते हलाः॥ गुणा एव विलोक्यंते, नारीणां भर्तृमानदाः
यावद्विवाहो मे जातो, हे सख्यः किल तावता॥ आनाययिष्यते भर्त्रा, माला मेरुतरोरपि॥
सख्यस्तां प्राचिरे मुग्धे, वक्तुं नो वेत्सि सर्वथा॥ मानवानां कुतो मेरुस्थितकल्पतरोः स्रजः॥
तावन्मानं प्रयच्छंति, यावद्युक्तं हि याच्यते॥ भर्त्तारोऽप्यवमन्यंते, त्वयुक्ते ब्रह्मदत्तवत् ९७
को ब्रह्मदत्त इत्युक्ते, प्रोचे पुत्री पुरोधसः॥ पंचालदेशे कांपील्यपुरमस्ति मनोहरम् ९८
ब्रह्मदत्तोऽभवत्तत्र, चक्री सुत्रामसंनिभः॥ तस्मै तक्षकनागेन, वरो दत्तोऽयमीदृशः ॥९९॥
सर्वेषामपि जीवानां, भाषांतरमवभोत्स्यसे॥ यदा वक्ष्यसि चान्यस्मै, तदा मृत्युमवाप्स्यसि॥
अन्यदा ग्रीष्मकालेऽसौ, स्नात्वा विहितभोजनः॥ पुष्पस्रक्चंदनालेपशाली तल्पमसेवत॥
तदा पुष्पवती देवी देवीवाद्भुतरूपभाक्॥ भद्रासनमलंकृत्य, निविष्टा भूपतेःपुरः॥१०२॥
चारुकर्पूरकस्तूरिचंदनद्रवभाजनम्॥ भारपट्टस्थिता गोधा, वीक्ष्य प्राह पतिं प्रति ॥ १०३॥
पतित्वा भारपट्टात्त्वं, चंदनद्रवभाजने॥ आलेपय ममाप्यंगं, स्वांगसंगेन हे प्रिय ॥१०४॥

इति श्रुत्वा च तद्भाषां, परिज्ञाय च भूपतिः ॥ हास्यं चकार गोधाया, अप्यहो कीदृशी स्पृहा ॥
नृपं पुष्पवती प्रोचे, तद्दृष्ट्वा स्वात्मशंकिता ॥ हास्ये प्राणेश को हेतुः स जगौ नास्ति कश्चन
मेधाविनां विना हेतुं, हास्यं न क्वापि जायते ॥ तदापास्यामि भोक्ष्ये च, यदा त्वं कथयिष्यसि ॥

बालसखित्वमकारणहास्यं, स्त्रीषु विवादमसज्जनसेवा ॥
गर्दभयानमसंस्कृतवाक्यं, षट्सु नरा लघुतामुपयांति ॥ १०८ ॥

इत्याग्रहपरां देवीं, पुनः प्राह महीपतिः ॥ उक्तेऽस्मिन्न गुणः कोऽपि, प्रत्युतापाय एव हि ॥
सा प्रोचे तत्करिष्यामि, निश्चितं काष्ठभक्षणम् ॥ भूपो जगौ भविष्यामि, तदहमपि पृष्ठगः ॥
ततः सा चलिता शीघ्रं, काष्ठभक्षणहेतवे ॥ रुदता परिवारेण, सहिता साश्रुलोचनम् ॥१११॥
मंत्रिभूपालसामंतैर्वार्यमाणो महाग्रहात् ॥ चक्र्यप्यचालीत्तत्स्नेहपाशबद्धपतत्रिवत् ॥११२॥
प्रातश्चतुष्पथे चक्री, सशोकैर्वीक्षितो जनैः ॥ ततः शृण्वति भूपे च, छागी छागं जगाविति ॥
जातोऽस्ति दोहदो मेऽद्य, हृद्यं शकटसंचयात् ॥ आनीय देहि त्वं मह्यं, यवपूलकपंचकम् ॥
स जगौ शकटा एते, राज्ञस्तुरगहेतवे ॥ नीलैर्यवैर्भृता यांति गृह्णन् मार्यो जनैरहम् ११५



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सा प्रोचे कातरः कीदृग्, वर्त्तसे त्वं भुवस्तले ॥ अयं चक्रधरो याति, भार्यया सह मृत्यवे ॥
स प्रोचे केवलं नाम्ना, बोत्कटोऽस्मि परं नृपः ॥ परिणामेन यः स्त्र्यर्थे, वृथा राज्यं समुज्झति ॥
श्रुत्वेति सस्मितश्चक्री, व्यावृत्तः स्वगृहं प्रति ॥ प्रोचे प्रिये ! वयं यामस्त्वया गम्यं यथारुचि ॥
श्रुत्वेति भूपतिं वीक्ष्य, प्रयांतं स्वगृहं प्रति ॥ लोके हसति संप्राप्ता, विलक्षा सापि मंदिरम् ॥
ब्रह्मदत्तकथासैषा, भरतेऽथ भविष्यति ॥ संभवद् वचनं प्रोच्यमित्यतीता मयोदिता ॥१२०॥
अतस्त्वयापि वक्तव्यं, युक्तमेव स्वभर्त्तरि ॥ प्रायः पुमांसः स्वाधीनाः पराधीना हि योषितः ॥
सोमश्रीस्ताः प्रति प्रोचे, तत्त्वं शृणुत हेहलाः ॥ बलात्किमपि न प्राप्यं, गुणैरेव च लभ्यते ॥
इदं तावन्मया प्रोक्तं, भवतीभिः श्रुतं पुनः ॥ समये ज्ञास्यते सर्वं, सांप्रतं किमु कथ्यते ॥
अथ ताः स्वगृहं प्राप्ताः प्रीतिभाजः परस्परम् ॥ श्रीदत्तसूनवे दत्ता, सोमश्रीः समहोत्सवम् ॥
श्रीदत्तो माल्यदेवाय, दत्वा राज्यं स्वसूनवे ॥ गृहीत्वा तापसीं दीक्षां, ज्योत्तिष्केष्वमरोऽभवत् ॥
माल्यदेवस्तया सोमश्रिया सह ययौ वनम् ॥ ययौ सयौवनस्तां स, रमयामास भंगीभिः १२६
इतश्च नारदो देवगंधर्वोऽष्टापदे जिनम् ॥ उपवीण्य प्रमोदेन, चलतिस्म दिवं प्रति ॥१२७॥

For Private and Personal Use Only

तस्य वीणास्थिता माला पतिता वायुवेगतः ॥ तस्याः सोमश्रियाः शीर्षे, स्थिता चातपशोषिता
तां स्रजं सा करे कृत्वा, पश्यंती प्रेयसो मुखम् ॥ प्रोचे शुष्कापि कीदृक्षा, माला परिमलान्विता॥
नृपः प्रोचे प्रिये ! सेयं, स्वर्गद्रुमसमुद्भवा ॥ बाल्योक्तं स्ववचः स्मृत्वा, सा ततो नृपतिं जगौ॥
मंदारतरुसंभूतां, मालां नव्यां प्रयच्छ मे ॥ अन्यथा नैव भोक्ष्येऽहं, न पास्यामि च किंचन ॥
नृपः प्राह कुतः स्वर्गपुष्पमाला भवेद्भुवि ॥ सा प्रोचे जीवितेनालं, सराज्येनापि तन्मम॥
तया सह गृहं गत्वा, नृपश्चिंतातुरोऽभवत् ॥ मंत्रिभिर्बोधिताप्येषा, न मुमोच कदाग्रहम् १३३
रात्रौ व्यचिंतयद्भूपस्तल्पे सुप्तोऽप्यसुप्तवत् ॥ यद्येषा म्रियते तर्हि, जीवितव्येन किं मम १३४
दुर्ल्लभा स्वस्तरोर्माला, सुलभो जीवितव्ययः ॥ अत एव करिष्यामि, प्रातर्निर्गमनं पुरात्॥
इति ध्यात्वा नृपो, यावन्निर्ययौ निजमंदिरात् ॥ आकाशात्पतिता तावन्माला सैव मनोहरा १३६
अहो चित्रमहो चित्रमिति जल्पन्नरेश्वरः ॥ सोत्कंठयाः स्वकांतायाः, कंठे मालां न्यवीविशत्॥
मालां कंठे नीवेश्यैनां हृष्टा राज्ञीनकेवलम्॥तस्याःसख्योऽपिताःश्रुत्वा,क्रमात्प्रापुःपरांमुदम् १३८
एवं निरंतरं प्रातरेका माला समीयुषी ॥ महेंद्रसूरिस्तत्रागाच्चतुर्ज्ञानधरोऽन्यदा ॥१३९॥



For Private and Personal Use Only

भूपः प्रियान्वितो गत्वा, वने नत्वा मुनीश्वरम् ॥ श्रुत्वोपदेशं पप्रच्छ, मालागमनकारणम् ॥
मुनिः पूर्वभवं प्रोचे, नगरे हस्तिनापुरे ॥ श्रेष्ठिनो धनदत्तस्य, धनेशाख्यः सुतोऽभवत् १४१
तदा धनेशजीवेन यत्त्वया जिनपूजनम् ॥ विदधे शुद्धभावेन, प्राज्यं राज्यं ततस्तव १४२
माल्यपूजाविशेषेण मातुस्ते दोहदक्षणे ॥ सपुष्पा विहिता वृक्षाः, सर्वेऽपि वनदैवतैः १४३
त्वत्पिता तापसीभूय, ज्योतिष्कामरतां गतः ॥ कांताकदाग्रहे मालां, दत्वा दत्तेऽपि संप्रति ॥
जिनेंद्रो यदि भावेन, पूज्यते मालया तया ॥ तदा सफलता स्वस्य, व्यर्थता स्वांगसंगता १४५
इतश्च राज्ञी पप्रच्छ, तदा क्रीडावने मया ॥ सखीभिर्युतयालोकि, वानरो वानरैर्वृतः ॥१४६॥
फाला दत्वा गिरेःशृंगं, गत्वा माला विधाय सः ॥ कंठे चिक्षेप कांतानां, कपेःकिं सा समर्थता ॥
मुनिःप्रोवाच ताःसर्वा, न वानर्यःकपिर्न च ॥ चिक्रीडुः स्वेच्छया किंतु, व्यंतरा व्यंतरीयुताः ॥
अथ पूर्वभवं श्रुत्वा, भूपो जातिस्मरोऽभवत् ॥ विशेषादार्हतं धर्मं, प्रपेदे मुनिसंनिधौ १४९
मुनिं नत्वा, गृहं गत्वा, मालया जिनपूजकः ॥ समयं गमयामास, वसुधां पालयन्नसौ १५०
राज्यं दत्वा स्वपुत्राय, गृहीत्वा संयमं गुरोः ॥ विहितानशनःप्रांते, सौधर्मे त्रिदशोऽभवत् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चिरं सुखान्यसौ भुक्त्वा, देवलोकात्ततश्च्युतः ॥ षष्ठश्छायाकरो नाम, तनयस्तेऽभवन्नृप १५२

॥ इति माल्यपूजाधिकारे धनेशकथा ॥

विहितो वर्णकारोपो, जिनेंद्रोर्येन पूजने ॥ फलं तस्याथ वक्ष्यामः, श्रूयतां भविका जनाः ॥
श्रावस्ती नगरी रम्या, श्रीधरस्तत्र भूपतिः ॥ तस्य बंधुमती नारी धर्मकर्मैकबंधुरा ॥१५४॥
जीवोऽथ धननाथस्य, तदा तत्कुक्षिमागतः ॥ स तया समये जातः, पिता चक्रे महोत्सवम् ॥
लक्ष्मीधर इति प्रीत्या, नाम तस्मै ददौ नृपः ॥ वर्द्धमानः क्रमेणासौ, तारं तारुण्यमाश्रितः ॥
सोऽन्येद्युः प्रातरायातस्तातं नंतुं सभांतरे ॥ पश्यतिस्म हयं रम्यं, केनापि प्राभृतीकृतं १५७
अमूल्यस्याश्वरत्नस्य, मूल्यं कः कुरुते स्वयम् ॥ गतिर्विलोक्यतां पूर्वमिति तद्धनिकोऽवदत् ॥
अथो वाजिनमारुह्य, नृपादेशान्नृपांगभूः ॥ गत्वा परीक्षयामास, वाह्याल्यां वाह्यकोविदः ॥
शरीरे सुकुमारेण स कुमारेण तत्क्षणम् ॥ प्रेरितस्तुरगोऽचालीत्, पवनस्येव बांधवः १६०
तत्र क्वापि तुरंगस्तं निनाय क्षणमात्रतः ॥ न वृक्षा न फलं नांबु, केवलं यत्र तु स्थलम् ॥



For Private and Personal Use Only

स्वयमेव स्थिरीभूतादुत्तीर्य तुरगादसौ ॥ जलं गवेषयामास, तृषाशुष्कोष्ठपल्लवः ॥१६२॥
दृष्ट्वा जटाधरं कंचित्, कमंडलुकरं पुरः ॥ स प्राह सादरं स्वच्छगिरा क्वास्ति सरोवरम्१६३
आगच्छेति वचः प्रोच्य, तं नीत्वा क्वापि पल्वले ॥ तापसः पाययामास, जलं पीयुषमंजुलम्॥
स्थूलस्थले त्वयागम्यमत्रास्मीति वदन्नथ ॥ जगाम तापसः क्वापि, स चचाल हयं प्रति १६५
अप्राप्य तुरगं क्वापि, वलितःसरसीं प्रति ॥ तामप्यदृष्ट्वा स प्राप, स्थलं तापसवेदितम् १६६
स्फूर्जज्जटाकलापं तं, नत्वा तापसमग्रतः ॥ निषण्णः सैष पप्रच्छ, दृष्टा यूयं सरोवरे ॥१६७॥
स प्राह मरुदेशे न, तादृक् क्वास्ति सरोवरम् ॥
त्वया वयं न दृष्टाःस्मः, सोऽन्यः कोऽपि भविष्यति ॥ १६८ ॥
ततश्चित्रं दधानोऽसौ, पुनःप्रोवाच तापसम् ॥ कुत्रत्यस्त्वं कुतो हेतोः, स्थिरस्थूलस्थले स्थितः॥
स प्राह श्रूयतां भद्र, प्रत्यासन्नमतःस्थलात् ॥ अस्ति वीतभयं नाम, पत्तनं चित्तनंदनम् १७०
हेमचूलाभिधो भूपस्तत्र राज्यमपालयत् ॥ चैत्रःपुरोहितस्तस्य, नित्यं क्षणमवाचयत् १७१
पुरो निविष्टे भूपाले, क्षणं कुर्वन् विचक्षणे ॥ उद्‌गारं स करोतिस्म, सुरागंधसमन्वित१७२



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हृदि ज्ञात्वा स्थितो भूपो, विसृष्टे क्षणतःक्षणे ॥ सभ्यानाकार्य पप्रच्छ, तदाकाले समीपगान्॥
तैरप्युक्ते तथैवागात्तत्र चामरधारिणी ॥ तज् ज्ञात्वा च हसित्वा च प्रोवाच नृपतिं प्रति॥१७४॥
मया सह सुरापानं, कृत्वा रात्रौ तवाग्रतः॥ क्षणं प्रकुर्वतोऽमुष्य, साहसं महतो महत् १७५
पृष्ट्वा पौराणिकान् सर्वान्, प्रायश्चित्तकृते नृपः॥ त्रपुष्णं पाययामास, सक्रोधस्तं पुरोधसम्॥
मृत्वा पुरोहितो जातो, रौद्राक्षो नाम राक्षसः॥ शिलातलं विकुर्व्यास्थात्, वैरं स्मृत्वा पुरोपरि॥
तद् दृष्ट्वा व्याकुलोलोको, भूपोऽपि स्नानपूर्वकम्॥ बलिं चक्रे बभाषे च बद्धकोश इदं वचः॥
यक्षो वा राक्षसोऽन्यो वा, यःकोऽप्यस्ति प्रकोपितः॥ वयं तदीप्सितं दद्मः, प्रत्यक्षीभूय याच्यताम्
स्वं ज्ञापयित्वा स प्रोचे, रे पापपरायणाः ॥ क्षणाद्वश्चूर्णयिष्यामि, पूर्णयिष्याम्यहं रुषम् १८०
कृपां कुरु हितातत्वमपराद्धं क्षमस्व नः॥ इत्यादिवचनैर्लोकैः, सभूपोऽक्षमयच्च तम् ॥१८१॥
किंचित्प्रशांतकोपोऽथ, बभाषे राक्षसो नृपम्॥तदा मुंचाम्यहं चेन्मां, प्रासादस्थं त्वमर्चसि॥
स्वीकृते वचने तस्य, लोकैःसाकं महीभुजा॥ शिलां विदूरयामास, नगराद्राक्षसःक्षणात् १८३
प्रासादे स्थापयित्वा तन्मूर्तिंनित्यं नरेश्वरः॥ पुष्पचंदनकर्पूरैः, पूजयामास सादरम्॥१८५॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तमप्रणम्य लोकोऽपि, न चक्रे कोऽपि भोजनम् ॥ वैरं संस्मार्य तच्चित्ते, राक्षसः कुपितः पुनः ॥
प्रत्यक्षीभूय स प्रोचे, रे रे नश्यत दुर्ज्जनाः ॥ अलं मे भवतां भक्त्या, यै रहं त्रपु पायितः॥
युष्मान् धक्ष्याम्यहं सर्वानित्यूचानेऽथ राक्षसे ॥ भूपतिः प्रांजलीभूय, भूयस्तं भक्तिभाग् जगौ॥
उपायो विद्यते कोऽपि, येन त्वं खलु तुष्यसि ॥ स प्राह श्रूयतां पाप, यदि सिद्ध्यति तत्कुरु॥
कुसुमैः पंचवर्णाभैस्त्रिसंध्यं चेन्ममार्चनम् ॥ क्रियते सकलैर्लोकैस्तदा मुंचामि नान्यथा १९०
सामान्यतोऽपि नो पुष्पं, प्रायो देशेऽत्र दृश्यते ॥ पंचवर्णानि लभ्यंते, कुसुमानि ततः कुतः॥
क्षुद्रादेश इति ज्ञात्वा, सर्वे नष्टास्ततो जनाः ॥ जनाधिपोऽहं संजातो, वैराग्यात्तापसव्रती १९२
न शूरो विद्यते विश्वे, यः प्रशांतं करोति तम् ॥ प्रोचे कुमारः श्रुत्वेति, तापसं प्रति साहसी ॥
पुरस्य तस्य मार्गं मे, दर्शयाशु पुरो भव ॥ इत्युक्ते तापसस्तस्मै दर्शिताध्वा न्यवर्त्तत ॥१९४॥
कुमारः पत्तनं गत्वा, रक्षसो भवनं ययौ ॥ पंचवर्णदुकूलस्य, पुष्पाणि विदधे सुधीः ॥१९५॥
तद् दृष्ट्वा राक्षसो दध्यौ, बालवद्वंचनं मम ॥ अस्ति प्रारब्धमेतेन, वीक्षे तावत्करोति किम्॥
कृत्वा पुष्पाणि वस्त्रस्य, कुमारो राक्षसं जगौ ॥ त्वं माता त्वं गुरुस्तातः, क्षमतां बालचेष्टितम् ॥

For Private and Personal Use Only

इत्युक्त्वा तानि पुष्पाणि, कृत्रिमाण्यपि यावता ॥ निधत्ते तावता तान्यकृत्रिमाण्येव जज्ञिरे॥
दृष्ट्वा परिमलाढ्यानि, तानि तं राक्षसो जगौ ॥ अहो पुण्यप्रभावस्ते, ह्यहो ते बुद्धिरुज्वला
अहं तुष्टोऽस्मि याचस्व, वांछितं ते ददाम्यहम् ॥ सोऽवादीन्नगरं शून्यं, सकलं वास्यतामिदम्॥
तत्पुरं वासयामास, स्थापयामास तं प्रभुम् ॥ तद्वृत्तं ज्ञापयामास, तत्पितुश्च स राक्षसः २०१
पित्रा स्वमंत्रिणं प्रेष्याकारितो लेखपूर्वकम् ॥ राज्यस्य सूत्रणां कृत्वा, कुमारःस्वपुरं ययौ ॥
पुरं प्रविश्य सोत्साहं, पितृपादान्ननाम सः ॥ आलिंग्य जनकःपुत्रं, पप्रच्छ सकलां कथाम्॥
अन्यदा तत्र संप्राप्ताः, श्रीसिंहव्रतसूरयः ॥ तान्नंतुं ससुतो भूपो, ययौ भक्तिभरोद्धुरः २०४
श्रुत्वोपदेशं पप्रच्छ, पुत्रभाग्यस्य कारणम् ॥ मुनिः पूर्वभवं प्रोचे, नगरे हस्तिनापुरे २०५
श्रेष्ठिनो धनदत्तस्य, धननामासुतोऽभवत् ॥ जिनपूजामुना चक्रे, बांधवैः सह संमदात् २०६
जिनपूजाप्रभावेण, राज्यं लब्धं महाद्भुतम् ॥ वर्णिकाणां विशेषेण, यत्फलं तच्च कथ्यते ॥
एष कृत्रिमपुष्पाणि, राक्षसाय तदा न्यधात् ॥ अकृत्रिमाणि जातानि, वर्णकस्य विशेषतः॥
सुभूमचक्रिणः स्थानं, नृणां पुण्याढ्यभूपते ॥ चक्रित्वं कुलिशित्वं च, प्रपद्येत हि पुण्यतः२०९



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुण्येन कर्करो रत्नं, पुण्येन च विषं सुधा ॥ सर्पः पुण्येन माला स्यात् कुमारस्य तथाभवत्॥
कुमारोऽपि मुनिंप्राह, पूर्वैयेन हतोऽस्म्यहम्॥ स वाजो न स्थले दृष्टो, न च दृष्टं सरोवरम् ॥
कोहेतुः प्रोचिवान् सूरिर्हिमचूलस्य यः पिता ॥ जातोऽस्ति व्यंतरस्तेन, पुरवासाय तत्कृतम् ॥
लक्ष्मीधरो भवं श्रुत्वा, तदा जातिस्मृतिं ययौ ॥ विशेषादार्हतं धर्मं, प्रपेदे मुनिसंनिधौ ॥
मुनिं नत्वा गृहं गत्वा, राज्यं लक्ष्मीधरे सुते॥ निवेश्य श्रीधरो राजा, जगृहे संयमं स्वयम्॥
अथ लक्ष्मीधरो भूपः, पालयन् पृथिवीं चिरम् ॥ जिनपूजापवित्रात्मा, धर्मकर्म चकार सः ॥
समयेऽथ सुते राज्यं, न्यस्य संयममग्रहीत् ॥ विहितानशनः प्रांते, सौधर्मे त्रिदशोऽभवत् ॥
चिरं सुखान्यसौ भुक्त्वा, देवलोकात्ततश्च्युतः ॥ सप्तमः शंखनामाभूत्तनयस्तव भूपते ॥२१७॥

॥ इति पूजाधिकारे धननाथकथा ॥

चूर्णपूजा कृता येन फलं तस्य प्रकाश्यते ॥ चूर्णशब्देन कर्पूरो, ज्ञातव्योऽत्र मनीषिभिः॥
अस्त्यत्र नगरं रम्यं, भरते श्रीपुराभिधम् ॥ श्रीचंद्रो नृपतिस्तत्र, तस्य चंद्रावती प्रिया ॥
तत्रैव नगरे श्रेष्ठी, धन इत्यभिधानतः ॥ प्रिया धनवती तस्य सती गुणवती बभौ ॥२२०



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



धनेश्वरस्य जीवोऽथ तस्याः कुक्षिं समागतः॥ समये स तया सूतः, पिता चक्रे महोत्सवम्॥
रत्नाकर इतिप्रीत्या, नाम तस्मै ददौ पिता॥ क्रमेण वर्धमानोऽष्टवर्षमानो बभूव सः ॥२२२
कलाकलापकौशल्यवल्लीनां च महीरुहः॥ न जहार मनः कस्य स प्रशस्यगुणोत्करः॥२२३
इतश्च राजा श्रीचंद्रो, लोकवृत्तबुभुत्सया ॥ निर्यातो नष्टचर्यायामंधकारपटावृतः ॥२२४॥
भ्राम्यंस्त्रिकचतुष्केषु, वीक्ष्य प्रेक्षणकं स्थितः॥ नटेन पठितं नाट्ये श्लोकं शुश्राव भूपतिः॥
बुद्धिर्यस्य बलं तस्य, निर्बुद्धेस्तु कुतो बलम् ॥ वने सिंहो मदोन्मतः, शशकेन निपातितः॥
ततो मे मतिमान्मंत्री, निश्चितं कोऽपि वीक्ष्यते॥इति ध्यायन्नृपो गेहं गत्वा सुष्वाप निद्रया
प्रातः प्रबुद्धः प्रातस्त्यकार्यं कृत्वा नरेश्वरः ॥ ययौ तुरंगमारूढो द्रष्टुं निजसरोवरम् ॥२२८
चलच्चकोरचक्रांगचक्रवाकचयाकुलम् ॥ भ्रमद्भ्रमरझंकारमुखरीभवदुत्पलम् ॥२२९॥
प्रसर्पल्लहरीबाहुवल्लरीश्लिष्टपादपम् ॥ बभार प्रीतिमंभारं, कासारं वीक्ष्य भूपतिः ॥२३०॥
कासारांतःस्थितं स्तंभं दृष्ट्वा प्रोचे महीपतिः॥ शृण्वंतु मंत्रिणः सर्वे, सर्वे लोकाश्च कोविदः
अकृत्वा सलिले पादनिवेशं तीरसंस्थितः॥ बध्नाति यः सरस्तंभं, मंतिता तस्य दीयते ॥



For Private and Personal Use Only

इत्युद्घोषणया सर्वे, मिलितास्तत्र मंत्रिणः ॥ संगताश्चतुरा लोकाः प्रोचुरेवं परस्परम् ॥
कथं तटस्थितैः स्तंभो, बध्यते मध्यसंस्थितः ॥ उत्तानेनापि हस्तेन, स्पृश्यते नेंदुमंलडम् ॥
एके विवेकिनः प्राहुर्बुद्धिरेव विलोक्यते ॥ लक्ष्मीरिव परं सापि, नाप्यते सुकृतं विना ॥
बुद्धया सिध्यंति कार्याणि, विषमान्यपि तत्क्षणात्॥ स्वबुद्धया वंचयामास, चंडिकां कमलो यथा
तथाहि भरतेऽत्रास्त्यवंतीनाम महापुरी ॥ तत्र श्रीपालभूपालो भूमिपालशिरोमणिः ॥
पंडितः कमलाख्योऽस्य, स्वभावविमलाशयः ॥ द्विसप्ततिकलापात्रं, विख्यातः पृथिवीतले ॥
सोऽन्येद्युश्चिंतयामास द्वासप्ततिकलाः किल ॥ विज्ञातास्ति मया किंतु, कलानामेकसप्ततिः
द्वासप्ततितमीं चौर्यकलां शिक्षे कुतोऽप्यहम् ॥ हुं ज्ञातं द्यूतकारेभ्यः, सा शिक्ष्येत विचक्षणैः॥
ध्यात्वेति द्यूतकाराणां, स सेवां कर्तुमुद्यतः ॥ तैः पृष्टो हेतुना केन, सेवनीया वयं तव ॥
स प्रोचे प्रायशः सर्वकलासु कुशलोऽस्म्यहम् ॥ किंतु चौर्यकलाया मे, किंचिन्मर्म प्रकाश्यताम्
ते प्रोचुर्मन्यते नैव, कृते चौर्ये कदाचन ॥ इति शिक्षां समादाय, स्वस्थानं पंडितो ययौ ॥ ॥७१॥
सपादकोटीमूल्यस्यान्येद्युर्भूपतिसंसदि ॥ केनापि ढौकितो हारः, सामंताद्यैर्निरीक्षितः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पंडितोऽपि करे कृत्वा, हारं बाह्यंतरेऽक्षिपत् ॥ उत्थिता च सभा सर्वा, भूपश्चांतःपुरं ययौ ॥
हारं श्रुत्वा महादेवी, प्रर्थयामास भूभुजम् ॥ कोशाध्यक्षं समाकार्य, तं च पप्रच्छ भूमिपः ॥
सोऽवादीन्न करे हारः, प्राप्तो मे देव सर्वथा ॥ सभ्याः पृष्टास्ततः सर्वे, भूपभृत्यैः पृथक्पृथक् ॥
कैश्चित् प्रोचिह्ययं हारः, पंडितस्य करं गतः ॥ गृहीतस्तेन चान्येन, को वेत्ति ज्ञानवर्जितः ॥
तच्छ्रुत्वा पंडितः प्राह, निविष्टो भूपसंसदि ॥ गृहीतोऽस्त्यसौ हारः कलंकस्तु तथाप्यभूत् ॥
अकृत्वाहं महादिव्यं, नोत्थास्याम्येष सर्वथा ॥ भूपः प्रोचे मृषा लोको, भाषते त्वं क्षमस्व तत् ॥
तत्रास्ति चंडिका देवी, दिव्यप्रत्ययकारिणी ॥ स्थापितो भवने यस्या, ह्यन्यायी नैव जीवति ॥
ततस्तेन सह क्ष्मापो, देवताभवनं गतः ॥ प्रोवाच चंडिके देवि, शुद्धिःकार्याद्य पंडिते ॥
आनाय्य तत्र पत्राणि, पंडितः कुसुमानि च ॥ निविष्टः पुरतो देव्याः, सर्वलोको विनिर्ययौ ॥
प्रदाप्य तालकं द्वारे, भूपोऽपि सदनं ययौ ॥ पंडितः पुरतो देव्या, भक्षतिस्म दलानि सः ॥
चर्वं चर्वं च पत्राणि, तांबूलं देवतां प्रति ॥ चिक्षेप निर्भयः सोऽप्यर्द्धरात्रिश्च समागता ॥
रौद्ररूपं दधाना सा, मुखे हुंकारकारिणी ॥ खड्गेनभापयंती च प्रत्यक्षा देवताभवत् ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लमिंद्राणी च सूर्याणी, ब्रह्माणी परमेश्वरी ॥ पंडितस्तां च तुष्टाव, बभाषे सा च तं प्रति ॥
रे हारं चोरयित्वात्र, निषण्णोऽसि ममाग्रतः ॥ तांबूलं क्षिपसि स्वैरं, वीक्ष्यतां किं करोम्यहम् ॥
चोरितो न मया हारो, वर्त्तते परमेश्वरि ॥ सावग् ज्ञानेन पश्यामि, किं त्वदुक्तेन दुष्ट रे ॥
स प्रोचे यदि ते ज्ञानं, वर्त्तते देवि चंडिके ॥ तदा मे संशयच्छेदं, कृत्वा कुर्यायेथारुचि ॥
कः संशयः इति प्रोक्ते, स प्रोचे शृणु चंडिके ॥ पिता पुत्र उभौ मार्गे, चेलतुः प्रीतिशालिनौ
तौ विलोक्य पदन्यासं, नार्योरन्योन्यमूचतुः ॥ एका नीचा परात्युच्चा, तन्मार्गे व्रजतः स्त्रियोः
पुत्रःप्रोवाच नीचा मे, प्रोच्चा भवतु ते पितः ॥ अन्योन्यमिति जल्पंतौ, तौ ते ददृशतुः स्त्रियौ
नीचा पुत्रेण चानीता, प्रोच्चा तु जनकेन सा ॥ ते च ताभ्यां कृते भार्ये, प्रोच्चा पुत्री परा प्रसूः ॥
तेषां च तदपत्यानां, संबंधः किमजायत ॥ इति मे संशयं भिंधिज्ञानं चेत्तव वर्त्तते ॥
तस्यां तदुत्तरं देव्यां, चिंतयंत्यां गता निशा ॥ अथो कैलासमासायां, प्रभातं च ततोऽभवत्
भूपालस्तूर्णमागत्योद्घाट्य तालकमादरात् ॥ स्तुवंतं देवतां प्रेक्ष्य, पंडितं प्रीतिमाप सः ॥
स्वगृहे सोत्सवं प्रेष्य, पंडितं भूपतिर्ययौ ॥ दिने तृतीये तं हारमर्पयामास स स्वयम् ॥



For Private and Personal Use Only

किमेतदिति भूपाले, पृच्छति स्माह पंडितः॥ परीक्षा शिक्षितायाः स्वकलायाः प्रेक्षिता मया॥
इत्यादि सर्वलोकेषु, प्रजल्पत्सु परस्परम् ॥ धनश्रेष्ठिसुतो रत्नाकरस्तत्र समागतः ॥२१०॥
तत्स्वरूपं परिज्ञाय, स नत्वा भूपतिं जगौ ॥ पश्चादपि हि यो वक्ति, स वक्तु प्रथमं मतिम्॥
लोकेषु कृतमौनेषु, सर्वेषु स नृपाज्ञया ॥ रज्जुमानाययामास, स्तंभबंधकृते कृती ॥२१२॥
तत्प्रांतं भूपतेः पाणौ, न्यस्य धृत्वा चतां स्वयम् ॥ तटस्थ एव बभ्राम, तटाकंपरितः सुधीः॥
एवं कृते स्वयं स्तंभबद्धे सति महीपतिः ॥ मंत्रिमुद्रां ददौ तस्मै, विस्मयस्मेरमानसः ॥
भूपोऽपि सोऽपि लोकोऽपि, मुदिताःस्वगृहं ययुः॥ विशेषान्मंत्रिणो गेहं, बभूव सुमहोत्सवः
स प्राज्यराज्यकार्याणि, कुर्वन् शिशुरपि स्वयम्॥ वृद्धेभ्योऽपि हि मान्योऽभूच्छैलेभ्य इव सन्मणिः
अन्यदा शूरभूपालः कालवत्कुपितो भृशम्॥ आगच्छंस्तत्पुरं राज्ञे, ज्ञापितश्चतुरश्चरैः ॥२१६॥
राजा मंत्रिणमाकार्य, तत्स्वरूपं न्यवेदयत्॥ स प्रोवाच स्थिरैर्भाव्यं, स्थिराणां स्युर्यतः श्रियः॥
इत्युक्त्वा सज्ञायन् वप्रं, प्रच्छन्नं स नरैर्निजैः ॥ शत्रोरुत्तारकस्थाने, निधानानि क्षितौ न्यधात्
समेते शूरभूपाले, ससैन्ये परितःस्थिते ॥ लिखित्वा स स्वयं लेखं, प्रेषयामास तत्कृते ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

लेखोऽयं च स्वयं वाच्य, इति वाच्यं त्वया मुखात्॥ शिक्षयित्वेत्यसौ विप्रं, स्वं प्रैषीत् शूरभूभुजे॥
 लेखं स वाचयामास, स्वयमेवेति मातुलः॥ मदीयोऽस्ति भवन्मंत्री, तेन संबंधवानहम्॥ 
 तव सूत्रे विनष्टे स्यात्तदीयमपि नश्वरम्॥ ज्ञापयाम्युपकाराय, तस्यापि च तवापि च॥
सामंताः स्वामिनास्वाकं, त्वदीयाः संति लोभिताः॥ बध्वा ते त्वां प्रदास्यंति, मत्प्रभोरिति चिंतये
चेन्न प्रतीतिस्तत्तेषां, शोध्या उत्तारकास्त्वया॥ मयास्ति ज्ञापितं योग्यं, विधेयं स्वहितं त्वया॥
वाचयित्वेति तं लेखं, सामंतोत्तारकेषु सः॥ शोधितेषु च दृष्टेषु, निधानेषु पलायितः॥
पलायमानं तं ज्ञात्वा, सामंता अनुधाविताः॥ विशेषाद्भयभीतोऽसौ, पवनाज्जवनोऽभवत्॥
अस्मिन्नवसरे ज्ञाते, सति श्रीचंदभूपतिः॥ तेषामुत्तारकान् सर्वाँल्लुंटयामास गच्छताम्॥
मतिमत्यद्भुतां तस्य, चित्ते चिंतयता भृशम्॥ मेने मनोज्ञता राज्ये, राज्ञा तेनैव मंत्रिणा।
अथ चंद्रावतीदेव्या, लघ्वी रत्नवती स्वसा॥ दत्ता श्रीचंद्रभूपाय, रूपचंद्रेण भूभुजा॥२९०॥
विवाहावसरे पित्रा, ज्ञापिते सति भूपतिः॥ रोगाक्रांतशरीरोऽभूद्बभाषे च स्वमंत्रिणम्॥ 
मम खड्गं समादाय, गत्वैतेन विवाह्यताम्॥ द्रुतं रत्नावतीमत्रानय ज्ञेयविशारद ॥२९२॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तथैव कृत्वा भूपाज्ञां, स समेतः पुरं निजम् ॥ बह्वमन्यत भूपः स्त्रीरत्नं रत्नवतीमिति ॥२१३॥



अथ चंद्रावती दध्यौ, स्वसा पूर्वमपि स्वसा ॥ सपत्नीत्वेन संजाताधुना दहति मां पुनः ॥



प्रागेव तत्करिष्येऽहं, विरक्तः स्यान्नृपो यतः॥ ध्यात्वेति तं जगौ काले, मंत्रिश्लाघाविधायिनम्॥
अतिश्लाघा न कस्यापि, प्राणनाथ विधीयते॥ मंत्रिणा यत्कृतं मार्गे, तत्सर्वं मे जगौ स्वसा ॥
श्रुत्वेति कुपितो भूपस्त्यक्त्वा रत्नवतीगृहम् ॥ जिघांसुर्मंत्रिणं कंचिदुपायं स व्यचिंतयत् ॥
कुंभं स्वर्णमयं भृत्वा, भस्मना क्षौमवेष्टितम्॥ कृत्वा दत्वा स्वयं मुद्रां, बभाषे मंत्रिणं प्रति ॥
रेऽस्ति श्रीकांचनपुरे, मन्मित्रं भूपतिः पृथुः॥ अनेन प्राभृतेन त्वं प्राग् रुष्टं प्रीणयाशु तम् ॥
मुद्रा मे नापनेतव्या, मार्गे किंतु सभांतरे॥ छोटयित्वा त्वया दृश्यः कर्पूरोऽस्ति मनोरमः॥
इति शिक्षां स्वयंदत्वा, प्रेषितोऽसौ महीभुजा ॥ मंत्री तथैव चक्रे तद्भस्म कर्पूरतां गतम्॥
राज्ञा समानितोऽत्यंतं, राजकार्यं विधाय सः॥ निजंपुरं समागत्य, प्रणनाम नरेश्वरम् ॥
विस्मितोऽपि हृदि क्ष्मापः, स्वरूपं विनिवेदयत्॥ पुनर्ध्यात्वा तमादिक्षल्लिखित्वा लेखमात्मना॥ 
पुरे हेमपुरे हेमकुंभो भूपः सुहृन्मम ॥ तस्मै लेखं प्रदायेति, वाच्यं वाच्यः स्वयं त्वया ॥

For Private and Personal Use Only

इति शिक्षामथो बिभ्रन्मंत्री तन्नगरं गतः ॥ लेखं दत्वा नृपं नत्वासीनः शिष्योक्तिपूर्वकम्॥
भूपतिर्वाचयामास, तं लेखमिति मंत्र्यसौ ॥ वध्यो लोकापवादेन, मया हतुं न शक्यते ॥
ततस्त्वया रहो वध्य, इति लेखं प्रवाच्य सः ॥ विसृज्य मंत्रिणं सायान्हे तमाकारयत्पुनः ॥
रहो नीत्वासिमाकृष्य, तं हंतुं स प्रवृत्तवान् ॥ स्मित्वोचे सचिवः स त्वं, शृंगपुच्छोज्झितः पशुः
नृपः प्रोचे भवद्भर्तुर्मया शिक्ष्या विधीयते॥ सोऽवक् तेनैव मूर्खत्वं, भाति मे नृपते तव॥
ननु मज्जन्मनि प्रोक्तं दक्षैः सांवत्सरैरिति ॥ तनुस्थाने ग्रहाः संति, पतिता बलत्तराः ॥
मृत्युः करिष्यते यत्र, बलादस्य कदाचन ॥ द्वात्रिंशत्तत्र वर्षाणि,, दुर्भिक्षं निपतिष्यति ॥
दक्षेण स्वामिनास्माकं, प्रहितोऽस्मि ततस्तव॥ मया हेतुरयं प्रोक्तो, यद्रम्यं तत्कुरुष्व भोः॥
दुर्भिक्षभीतो भूपोऽवक्, स्वामी ते न सुहृन्मम॥ सत्यं बधुरसि त्वं तु, येन मे विहितं हितम्॥
संवृत्य खड्गमालिंग्य, संमान्य वसनादिभिः ॥ विसृष्टः सोऽपि संमाप्तः, संहृष्टः स्वपुरं ततः॥
सोपालंभं सुहल्लेखं, मुक्त्वा भूपं ननाम सः॥ तत्स्वरूपे परिज्ञाते, सति सोऽयं विसिष्मिये॥
तथापि हंतुकामस्तमन्येद्युर्भूपतिर्जगौ ॥ मनोज्ञमद्य कर्पूरं पत्राणि च समानय ॥२१६॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तथाकृते नृपो रात्रौ, सामंतेभ्यः स्वपाणिना ॥ ददौ कर्पूरमिश्राणि पत्राणि परमादरात् ॥
भूपः करतले तस्य, विषं न्यस्य दलैः समम् ॥ कर्पूरो गृह्यतां मंत्रिन्. भक्ष्यतामित्यभाषत ॥
विषं कर्पूरतां प्राप्तं, भक्षतिस्म स तत्क्षणम् ॥ भूपे चमत्कृतेऽकस्मान्मध्ये कोलाहलोऽभवत् ॥
आगता त्वरितं दासी, स्माह स्वामिन्निशम्यताम् ॥ देवी चंद्रावती बाढं, व्याकुला वर्त्ततेऽधुना॥
चपेटया हता केनाप्यदृष्टान्येन तल्पतः ॥ पतिता पृथिवीपीठे, लुठति ग्रहिलेव सा ॥३२१॥
नृपेण शीघ्रमागत्य, गुगुलोद्ग्राहपूर्वकम्॥ भाषिता सा रुषा तस्मै, चपेटां दातुमुद्यता॥३२२॥
सा कथंचिन्नरैर्बद्धा, भाषिता मंत्रवादिभिः॥ भूतो वा राक्षसो वापि, शाकिनी चेति वादिभिः॥
सा रुषा नृपतिं प्रोचे, रे कृतघ्नशिरोमणे॥ मायया वचसैतस्या मंत्री हंतुं विचिंतितः ॥३२४॥
मया कर्पूरतां नीतं, पूर्वं भस्म ततो विषम् ॥ अहं तवास्मि रे राज्याधिष्टात्री कुलदेवता ॥
अथैतां न हि मोक्ष्यामि, हनिष्याम्येव सर्वथा ॥ ततो मंत्रिणमाकार्य, भूपः क्षमयतिस्म तम् ॥
तामप्यलुठयत्पादयुगले मंत्रिणो मुहुः ॥ क्षमिता बहुमानेन, सा ततो देवता गता ॥३२७॥ ॥७८॥
जातायामथ सज्जायां, देव्यां हृष्टो जनोऽखिलः॥ मंत्रिणं श्लाघयामास, विदधानो महोत्सवम्॥

For Private and Personal Use Only

रत्नवत्यप्यमान्या सा, मान्या राज्ञा ततः कृता ॥ मंत्री विचिंतितश्चित्ते, जीवितादपि वल्लभः
श्रीमंतोऽजितसिंहाख्याः, सूरयो ज्ञानिनोन्यदा॥ संप्राप्तास्तान्नृपो नंतुं, मंत्रिणा सहितो ययौ॥
श्रुत्वोपदेशं पप्रच्छ, मंत्रिणो भाग्यकारणम् ॥ मुनिः पूर्वभवं प्रोचे, नगरे हस्तिनापुरे॥३३१॥
श्रेष्ठिनो धनदत्तस्य, धनेश्वरसुतोऽभवत्॥ जिनपूजामुना चक्रे, बांधवैः सह संमदात् ॥३३२॥
कर्पूरार्चा विशेषेण, कर्पूरो विषभस्मनी ॥ जातः क्रमेण राज्यं च प्राज्यमस्य भविष्यति ॥
मंत्री पूर्वभवं श्रुत्वा, जातिस्मरणमाप सः ॥ विशेषादार्हतं धर्मं, प्रपेदे मुनिसंनिधौ॥३३४॥
मुनिं नत्वा गृहं गत्वा, दत्वा राज्यं स्वमंत्रिणे ॥ निरपत्यो नृपः पार्श्वे, गुरोः संयममग्रहीत्॥
अथ रत्नाकरो राजा, पालयित्वा भुवं चिरम्॥ पुत्राय रत्नदेवाय, राज्यं दत्वागृहीद्व्रतम् ॥
प्रपाल्य संयमं भव्यभावेन स मुनीश्वरः ॥ विहितानशनः प्रांते सौधर्मे त्रिदशोऽभवत् ॥
चिरं सुखान्यसौ भुक्त्वा, देवलोकात्ततश्च्युतः ॥ अष्टमोऽनंतनामासीत्तनयस्तव भूपते ॥
पुष्पादिपूजनचतुष्कफलानि पुण्यमाणिक्यसुंदररुचिर्नृपतेः पुरस्तात् ॥
उक्त्वा विशेषसहितानि मुनिर्ध्वजाद्यारोपादिपूजनफलं गदितुं प्रवृत्तः ॥ ३३९ ॥

इति श्री अंचलगच्छेशमाणिक्यसुंदरसूरिविरचिते पूजाधिकारे गुणवर्माचरित्रे
पुष्पमाल्यवर्णकचूर्णारोपणपूजनफलवर्णनो नाम तृतीयः स्वर्गः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ध्वजारोपः कृतो येन, फलं तस्य निगद्यते ॥ अत्रास्ति भरतक्षेत्रे, पुरमिंद्रपुरं परम् ॥ १ ॥
तत्राभूद्देवचंद्राख्यो, भूपो देवेंद्रसन्निभः॥ देवी च देविला तस्य, देवकांतेव दिव्यरुक्॥ २॥
कनकस्य ततो जीवस्तस्याः कुक्षिं समागतः॥ समये स तया सूतः, पिता चक्रे महोत्सवम्॥
गरुडध्वजइत्याख्या तस्य जाता मनोरमा॥ तस्मै प्रवर्द्धमानाय, राज्यं दत्वा पिता मृतः॥
गरुडध्वजभूपालेऽन्यदा संसदि संस्थिते॥ वेत्रिप्रवेशितो दूतो, नत्वा कार्यमभाषत ॥५॥
अस्ति पंचालदेशेषु, पुरं शिवपुराभिधम्॥ तत्र श्रीशंकरो राजा, शिवचंद्रास्य तु प्रिया॥६॥
तत्कुक्षिपद्मिनीहंसी, कन्या नाम्ना सरस्वती॥ सरस्वतीव संजातसर्वशास्त्रार्थसंग्रहा ॥७॥
पाणिग्रहमकुर्वाणा तारतारुण्यशालिनी॥ प्रोचे सवित्र्या स्वोत्संगे, निवेश्य निजनंदिनी॥
न मन्यसे कुतो हेतोः, पाणिग्रहणमंगजे॥ यच्चित्ते वर्त्तते तन्मे, प्रकाशय सरस्वति ॥९॥
सा प्रोचे किं कृतेनापि, पाणिग्रहणकर्मणा॥ कांता यद्भक्ति तत्कार्यं, भर्त्ता न कुरुते यदि॥



For Private and Personal Use Only

सर्वकार्याणि यः कुर्यान्मदुक्तानि निरंतरम् ॥ वरः स मेऽन्यथा नास्ति, विवादेन प्रयोजनम् ॥
इत्युक्त्वा सा समुत्थाय, जनन्युत्संगतो गता ॥ माता संजातसंतापा, तत्क्ष्मापाय न्यवेदयत् ॥
अबालत्वेऽपि बालत्वं, तस्याः किमितिचिंतयन् ॥ नृपो मंत्रिणमाकार्य, तत्स्वरूपं स्वयं जगौ ॥
स प्राह पुरुषः कोऽपि, प्रायस्तादृग् न विद्यते ॥ कुर्यात्सर्वाणि कार्याणि, नारीणामेव वाक्यतः ॥
भवत्यपि वरः कोऽपि, तद्रूपं वीक्ष्य रंजितः ॥ अच्छंकारीभटीरूपात्परिणीयात् सुबंधुरां ॥१५॥
ततः स्वयंवरस्तस्याः, कार्यते कार्यकोविदः ॥ तत्प्रतिज्ञावचः श्रुत्वा, यो वृणोति वृणोतु सः ॥
लोके निरुत्तरैरेवं, भूयते भूयसाथ किम् ॥ इति मंत्रिगिरा भूपोऽचीकरत स्वयंवरं ॥१७॥
आहूता भूभुजः सर्वे, दूतान् प्रेष्य पृथक् पृथक् ॥ तद्भवंतोऽपि संप्राप्ता वीक्ष्यते तत्स्वयंवरे ॥
इतितद्गिरमाकर्ण्य, सस्मितं भूपतिर्जगौ ॥ अस्माभिरस्मिन्नर्थेऽत्रस्थितैराशूत्तरं भवेत् ॥१९॥
दूतः प्रोवाच दुःसाध्यं, चिंतयित्वात्र संस्थिता ॥ यथा यूयं तथान्येऽपि, कथं भावि स्वयंवरः
तस्याः पाणिग्रहे कोऽपि, बलात्कारो न विद्यते ॥ मिलंतु भूभुजः सर्वे, रुचिर्यस्य करोतु सः
इत्युक्त्वा सज्जयित्वा तं, दूतोऽन्यत्र जगाम सः ॥ गरुडध्वजभूपालश्चचालाभि स्वयंवरम् ॥



For Private and Personal Use Only

मार्गे ग्रामाकरद्रंगाँल्लंघमानस्य भूपतेः ।। अन्येद्युः सरितस्तीरे स्थितं सैन्यमदैन्यभाक् ।।२३।।



अर्द्धरात्रे नृपस्तत्र, कस्यचित् करुणस्वरम् ।। श्रुत्वाचलत् करालेन, करवालेन संयुतः ।।२४।।
गच्छन् शब्दानुसारेण, श्मशाने क्वापि भूपतिः ।। क्रंदंतं नरमद्राक्षीत्, कक्षाक्षिप्तं हि रक्षसा ।।
करवालं करे कृत्वा, भूपालः स्माह राक्षसम् ।। क्रंदंतं कातरं मुंच, मामेहि यदि शक्तता ।।
रक्षः प्रोचेऽमुना मंत्रो, मदीयो जपितश्चिरम् ।। प्रत्यक्षतां गतेनाऽसौ, नृमांसं याचितो मया ।।
न दत्तेऽसाविति क्रुद्धः, कातरं पीडयाम्यमुम् ।। न विद्यते तव स्वार्थो, व्रज मार्गं समाधिना ।।
पलादंप्रति भूपालः, प्रोवाच मयि पालके ।। मास्त्वन्यायो न युज्येत, तस्मात्त्वं कातरं त्यज ।।
शिक्षां नोचेत् प्रदास्यामि, खड्गेन क्षणमात्रतः ।। इत्युक्त्वा दुर्द्धरो भूपो, दधावे राक्षसंप्रति ।।
कर्त्तिकां नर्त्तयन् पाणौ, बलादपि पलादराट् ।। भूभुजा ताडितः शीर्षेऽट्टहासस्फोटितांबरः ।।
चकर्त्त कर्त्तिकां चाशु, करवालेन भूपतिः ।। रक्षोऽवादीन्न ते क्षोभस्त्वं धीराणां शिरोमणिः ।।
साहसात्तव तुष्टोऽस्मि, वरं वृणु समीहितम् ।। स जगाद स्मृतो येन, तस्य त्वं सिद्धतां भज ।।
सिद्धमेतत्परं स्वार्थं प्रार्थयेति तदीरितः ।। स प्रोवाच तथा कार्यं, यथा सा त्रियते मया ।।३४।।

ओमित्युक्त्वा पलादेन, विसृष्टः स्वबलं गतः॥ प्रातश्च चलितो भूपः, क्रमाच्छिवपुरं ययौ॥
तत्र सिंहासनासीने, भूपवृंदे स्वयंवरे ॥ वरमाला करे बिभ्रत्यागता सा सरस्वती ॥३६॥
तां प्रोवाच प्रतीहारो, हारीकृतरदद्युतिम् ॥ अंगुल्या दर्शयंती तान्नामग्राहं नरेश्वरान्॥३७॥
अंगवंगतिलंगानां, कलिंगानां महीभुजः॥ मिलिताः संति सर्वेऽपि, कृतार्थ्यतां त्वया दृशा॥
विलोक्य तांस्ततो बाला, पूर्वश्लोकं पपाठ सा ॥ तं श्रुत्वा जज्ञिरे ते च, निराशास्तत्करग्रहे
सर्वकार्याणि यः कुर्यान्मदुक्तानि निरंतरम् ॥ वरः सः मेऽन्यथा नास्ति विवाहेन प्रयोजनम्॥
प्रतिभूपमिमं श्लोकं, पठंती प्रचचाल सा ॥ न कोऽपि तस्या मालार्थी, बभूव क्षितिनायकः
ततस्तस्याः पिता किंचिदचिंतयद् हहा विधे ॥ अस्या गुणनिधेर्दोषः कुतः कस्मात्कदाग्रहः

( मालिनी वृत्तम् )

शशिनि खलु कलंकं कंटकाः पद्मनाले, जलधिजलमपेयं पंडिते निर्धनत्वम् ॥
दयितजनवियोगो दुर्भगत्वं सुरूपे, धनिषु च कृपणत्वं रत्नदोषी कृतांतः ॥ ४३ ॥
स्वयंवरप्रयासो मे, विफलः सकलोऽभवत् ॥ कथं यास्यंति भूपाला, बालापरिणयं विना ॥

तत्राते चिंतयत्येवं, चित्तांतः सा सभांतरे॥ श्लोकं पठंती तत्रागाद्यत्रास्ते गरुडध्वजः॥
राक्षसोक्तं वचो भूपस्तदा सस्मार चेतसि॥ राक्षसश्च ततश्चक्रे, स तस्या मतिविभ्रमं॥
सा स्थाने सर्वशब्दस्य, पुण्यशब्दं प्रयुज्य तम्॥ श्लोकं पपाठ तच्छ्रुत्वा, सर्वो लोको विसिष्मिये
पुण्यकार्याणि यः कुर्यान्मदुक्तानि निरंतरम्॥ वरः स मेऽन्यथा नास्ति, विवाहेन प्रयोजनम्
इति श्रुत्वा महीपालस्तन्मालार्थी बभूव सः॥ सा निचिक्षेप सोत्कंठं, तत्कंठे वरणस्रजम्॥
क्षिप्तायां वरमालायां, बालया मतिविभ्रमः॥ परिज्ञातः परं प्रीता, वरं वीक्ष्य गुणालयम्॥
ततस्तत्र तयोर्जाते, पाणिग्रहमहोत्सवे॥ विसृष्टा भूभुजः सर्वे, स्थानं निजनिजं ययुः॥
गरुडध्वजभूपोऽपि, स्थित्वा तत्र कियद्दिनान्॥ तया सह समायातः स्वपुरं समहोत्सवम्॥
तदुक्तपुण्यकार्याणि, कुर्वाणः प्रीतमानसः॥ समयं गमयामास, नृपः सुखमयं सदा॥५३॥
गवाक्षस्थस्तया साकमन्यदा भूपतिर्वने॥ समेतं संघमद्राक्षीत्कुतश्चित्प्रौढतीर्थतः॥ ५४॥
तया सह नृपस्तत्र, संघं द्रष्टुं वने ययौ॥ संघोऽप्यावर्जयामास, नृपतिं स्वयमागतम्॥
संघसार्थे समायातान्, धर्मघोषाह्वयान् गुरून्॥ प्रणम्य भूपतिस्तत्र, सकांतोऽपि निषण्णवान्



For Private and Personal Use Only

समेतं तत्र संघेशं, नृपतिर्बहु मानयन् ॥ गुरूपदेशं शुश्राव, तीर्थयात्राधिकारिणम् ॥५७॥
समेतेऽष्टापदे शत्रुंजये रैवतपर्वते ॥ वाराणस्यादितीर्थेषु, भव्यैर्यात्रा विधीयते ॥५८॥

( इंद्रवज्रा वृत्तम् )

तीर्थेषु ये श्रीजिननाथभक्तिं, कृत्वा कृतार्था रचयंति लक्ष्मीम् ॥
त एव धन्या धरणीतलेऽत्र, भवंति नारक्यपरा नरोऽन्ये ॥ ५९ ॥

इत्थमाकर्ण्य संघेशवल्लभा संसदि स्थिता ॥ प्रतिराज्ञीमिति स्माह, सोत्साहहृदया मुदा ।
अस्माभिर्विहिता यात्रा, पूर्वं शत्रुंजये ततः ॥ रेवताद्रौ च किंत्वत्र, कौतूहलमिदं पुनः ॥
शत्रुंजये रैवते चाप्येक एव महाध्वजः ॥ दत्तश्चित्तप्रमोदेन, एवं न दास्यते परः ॥६२॥
राज्ञी हसित्वा तां प्राह, संमेतेऽष्टापदेऽपि च ॥ अस्माभिः क्रियते यात्रा, हृदये चिंत्यते पुनः
एतयोस्तीर्थयोरेवमेक एव महाध्वजः ॥ दीयते किं त्वया श्लाघा स्वयमेव विधीयते ॥
भूपो विसृज्य संघेशं, पत्न्या सह गृहं ययौ ॥ समये च तयाभाणि, पुण्यकर्तव्यमस्ति नौ ॥
संघेशवल्लभाग्रे यत्, पूर्वं प्रोक्तं तया स्यात् ॥ तदेव कथयामास, पुरतो भूपतेरपि ॥६६॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तच्छुत्वा भूपतिर्दध्यावहो प्रोक्तं किमेतया ॥ कुत्राष्टपदशैलेशः, क्व संमेतपर्वतः॥६७॥
तयोर्यात्रा विधातव्या, संघतश्च परस्परम् ॥ द्वयोरपिध्वजारोपः, कथमेतद्विधीयते ॥६८॥
मौनमाधाय भूपाले, स्थिते चिंतातुरे सति ॥ गता सरस्वती देवी, नितांतंखिन्नमानसा ॥
सचिवो ज्ञातवृत्तांतस्तामुवाच विचक्षणः ॥ स्वामिनि! प्रायो वक्तव्यं, युक्तमेव हि सर्वथा ॥
सा जगाद सभामध्ये, यन्मया कथितं मुदा ॥ अन्यथात्वं व्रजत्यत्र, जीवितान्मे मृतिर्वरम्
इति तन्निश्चयं ज्ञात्वा, राजा चित्तेऽतिदुःखितः ॥ रात्रावनुक्त्वा कस्यापि, निर्ययौ निजमंदिरात्
स्थाने स्थाने भ्रमन्नेष, तुंगशृंगाभिधं गिरिम् ॥ निरीक्ष्य भृगुपाताय, गच्छन्नालोकयन्नरौ ॥
तौ शीर्षे ग्रंथिकां कृत्वा, व्रजंतौ पर्वतं प्रति ॥ तथैवाचलितौ तूर्णं, तथाकारौ पुनःपुनः ॥
विलोक्य भूपतिरेतावूचे हे सुहृदौ कथम् ॥ गमागमौ विधीयेते, युक्तं चेत्तर्हि कथ्यताम् ॥
नृपमूचे तयोरेकः, सविवेक! निशम्यताम् ॥ सारंगपुरमित्यस्ति, नगरं सागरांतिके ॥७६॥
तत्र चित्रांगदो राजा, राज्ञी तस्य मनोरमा ॥ यया मनोरमाकारात्कारिता दास्यमिंदिरा ॥
तां हृत्वा चंडवेगाख्यः, खेचरः खे चरन्नथ ॥ गत्वा जलनिधेर्मध्ये, द्वीपे क्वचिदवस्थितः ॥



For Private and Personal Use Only

परस्नार्यपहारेण, धरणेंद्रव्यवस्थया ॥ विद्याभ्रंशोऽभवत्तस्य, स तत्रैवास्त्यवस्थितः ॥७९॥
नैमित्तिकाच्च तद्ज्ञात्वा, दध्यौ चित्रांगदो नृपः॥ काथंकारं रिपुं हन्मि, काम्यकांतापहारकम्॥
एवंचिंतयतः सिद्धः, पुरुषस्तस्य दृक्पथम् ॥ संप्राप्तो बहुमानेन, तेन भक्त्या च तोषितः॥
आकाशगामिनी विद्या, विद्या चिंतितवर्द्धिनी ॥ प्रज्ञप्त्यादिमहाविद्यावन्महाबलवत्तरे ॥
द्वे विद्ये भूभुजे तस्मै, तेन दत्ते मनीषिणा ॥ एकया गम्यते व्योम्नि, वर्द्धते शस्त्रमन्यया॥
यथा शस्त्रस्य वृद्धिः स्यात्तरसोऽपि तथा भवेत्॥ योजनानां शतं वृद्धिः सहस्रमपि भाग्यतः
चक्रिणो दंडरत्नस्य, सहस्रं वृद्धिरुच्यते ॥ चर्मछत्रद्वयस्यास्य, वृद्धिर्द्वादशयोजनी ॥८५॥
विद्याया बहुरूपिण्या, रूपाणि च सहस्रशः॥ जायंते कौतुकं नात्र, विद्याभिः किं न साध्यते
विद्याद्वयेन सिद्धेन, यत्र तत्र स्थितो रिपुः ॥ हेलया हन्यते मित्र, साधने युक्तिरुच्यते ॥
यत्र सिंहो वसत्यद्रौ, साध्यते तत्र सा निशि॥ विद्यां साधयतः पुंसो, हरिः शांतोऽवतिष्ठते॥
पुष्पगुग्गुलधूपानां, वहंतौ ग्रंथिकामिमां ॥ पितापुत्रौ समायातावावामिह दिनात्यये ॥८९॥
गच्छावः पर्वतं यावत्त्वरितं साधनेच्छया ॥ सिंहनादममुं श्रुत्वा, तिष्ठावस्तावता भिया ॥९०॥

आवां किं कुर्वहे मित्र, न स्थिरं चित्तमावयोः ॥ विद्यासिद्धिर्भवेन्नो वा, सिंहान्मृत्युस्तु निश्चितम्
नृपः प्रोचे भवद्भयां चेन्मह्यं विद्या प्रदीयते ॥ साधयित्वा ततः शीघ्रं, दर्शये प्रत्ययं युवाम् ॥
ताभ्यां विद्याद्वयं दत्तं, विधिपूर्वकमोजसा ॥ भूपतिः साधयामास, निर्भीकः सिंहसन्निधौ ॥
सिद्धविद्यो विसृज्यैतौ, नृपतिः स्वपुरं ययौ ॥ मंत्रिभिः संमुखायातैः, सह मंदिरमागतः ॥
न देवी भवने क्वापि, दृश्यते भोजनादनु ॥ इति पृच्छति भूपाले, मंत्री कृष्णाननो जगौ ॥
तदा विनिर्गतान् युष्मान्,सर्वत्रापि च शोधितान्॥अलब्ध्वा सकलोराजलोको दुःखाकुलोऽभवत्
देवी त्वत्यंतदुःखार्ता, स्वं निंदंती कदाग्रहम् ॥ लोकेन वार्यमाणापि, गवाक्षात्पतिता भुवि ॥
आकाशात्पतिता दृष्टा, न पतंती भुवस्तले ॥ न ज्ञायये गता क्वापि, देवीवृत्तमिदं प्रभो ॥
नृपः श्रुत्वेति सूत्कारान्, मुंचंश्चित्ते व्यचिंतयम् ॥ यदर्थेऽहमुपक्रांतः सैव दैवेन दूरिता ॥९९॥
इति चिंतयति क्ष्मापे, वर्ध्यसे देवी वर्ध्यसे। जल्पंतीति समायाता, दासी प्रीतिमती जगौ॥
गवाक्षयित्पतिता यस्मात्तत एव समागता ॥ स्वामिनी दृश्यते स्वामिन्, सारशृंगारभासुरा॥
हर्षात्पश्यति भूपाले, राज्ञी तत्र समागता ॥ भद्रासने निषण्णा च, कस्य प्रीतिं चकार न ॥

अनौचित्यं तदा ज्ञात्वा, संकथानां परस्परम् ॥ भूपः प्रियान्वितो यात्राकरणाय समुद्यतः ॥
संघेन सहितो भूपः, पूर्वं संमेतपर्वते ॥ सप्रियः स्नात्रसंघार्चाध्वजारोपादि स व्यधात् ॥
ध्वजारोपं ततः कुर्वन्, विद्याढ्यबलान्वितः ॥ पटे संघं समारोप्याष्टापदाद्रिं गतो नृपः ॥
तत्र पूजां प्रभोः कृत्वा, बध्वा तं च महाध्वजम् ॥ मनोरथं प्रपूर्यासौ, पुनः संमेतमाययौ ॥
संघेन सहितस्तस्मान्निजं प्राप्य पुरं नृपः ॥ महोत्सवैः प्रविश्यात्र, निजं राज्यमपालयत् ॥
तदा देवेंद्रसिंहाख्याः सूरयोऽत्र समागताः ॥ तान्वंतुं नृपतिः प्राप, सप्रियः पावनं वनम् ॥
श्रुत्वोपदेशं पप्रच्छ, देवी कुत्र गता तदा ॥ सूरिःप्रोवाच मातास्याः कृत्वा पुण्यं मृता सती ॥
संजाता व्यंतरेंद्रस्य, वल्लभा प्रियदर्शना ॥ आयाता च सुतास्नेहात्, पतंतीं तां ददर्श सा ॥
गृहीत्वा पाणिपद्मेन, पतितां पृथिवीतले ॥ तां सुखं स्थापयामास, तवागमननेऽमुचत् ॥
कश्चित्पप्रच्छ किं मर्त्यास्तिष्ठंति सुरवेश्मनि ॥ सूरिः प्रोवाच गंगायाः, सदने भरतः स्थितः
स्थितश्च चमरेंद्रस्य, भुवने चेटको नृपः ॥ अथ पूर्वभवं वक्ष्ये, त्वदीयं शृणु भूपते ॥११३॥
श्रेष्ठिनो धनदत्तस्य, नगरे हस्तिनापुरे ॥ पुत्रः कनकनामासीत्, ध्वजपूजा कृताऽमुना ॥

राज्यं तव ध्वजार्चीतः, संमेतेऽष्टापदेऽपि च ॥ चक्रे महाध्वजारोपं, भवान् विद्याढ्यान्वितः
नृपः पूर्वभवं श्रुत्वा, तदा जातिस्मरोऽभवत् ॥ विशेषादार्हतं धर्मं, प्रपेदे मुनिसंनिधौ॥११९॥
मुनिं नत्वा गृहं गत्वा, पालयित्वा चिरं भुवं ॥ दत्वा राज्यं स्वपुत्राय, गुरोः संयममग्रहीत्॥
प्रपाल्य निरतीचारं, चारु चारित्रमुज्वलम् ॥ विहितानशनः प्रांते, सौधर्मे त्रिदशोऽभवत् ॥
चिरं सुखान्यसौ भुक्त्वा, देवलोकात्ततश्च्युतः ॥ नवमो नागनामाऽभूत्तनयस्तव भूपते ॥

॥ इति ध्वजारोपप्रभाववर्णने कनककुमारकथा समाप्ता. ॥

---

येनाभरणपूजात्र, विहिता तत्फलं ब्रुवे ॥ अत्रास्ति भरतक्षेत्रे, मिथिला नामतः पुरी॥१२०॥
तत्र शत्रुंजयो राजा, शत्रूणां जयकारकः ॥ श्रीचंद्रा नाम तत्पत्नी, चंद्रज्योत्स्नेव निर्मला ॥
जीवोऽथ कनकाभस्य, तदा तत्कुक्षिमागतः ॥ समये च तया सूतः, पित्रा चक्रे महोत्सवः ॥
कुलभूषण इत्याख्या, तस्य जाता मनोरमा ॥ वर्द्धमानः कलाशाली, क्रमात्तारुण्यमाप सः ॥
न केवलं पिता तस्य, कन्यां योग्यां व्यचिंतयत् ॥ बहिर्विहारे गच्छंतं, तं वीक्ष्य सकलो जनः



For Private and Personal Use Only

भाले स्वभावसंभूतमद्भुतद्युतिभासुरम् ॥ स्वर्णमौक्तिकरत्नानि, विनापि सुमनोहरम् ॥ युग्मम्॥
बिभ्राणां तिलकं कांचिदंगनां कांचनच्छविम्॥ सोऽद्राक्षीदन्यदा स्वप्ने, मा वृणिष्वेति भाषिणीम्
स्वप्नं दृष्ट्वा प्रबुद्धोऽसौ, चिंतयामास चेतसि ॥ तिलकस्यैव चिन्हेन, परिणेया मयांगना ॥
इति निश्चित्य पित्रासौ, कन्यकावरणेऽनिशम् ॥ याच्यमानोऽपि नो मेने, मानिनीनां मनोहरः
मंत्रिमात्रादिभिर्मित्रं, प्रेरितो मतिसागरः ॥ तमूचे हेतुना केन, विवाहं नहि मन्यसे ॥१२९॥
उक्तं विना न वैद्योऽपि, दुःखं जानाति कस्यचित् ॥ विना ध्वनिं मयूराणां, वारिदोऽपि न वर्षति
विना त्वद्वचनं तातस्त्वदीयो नावबुध्यते ॥ यच्चित्ते वर्तते तन्मे, प्रकाशय शुभाशय ॥
ततस्तं स्वप्नवृत्तांतं, प्रतिमित्रमुवाच सः ॥ तज्जगाद पुरे नात्र, दृश्यते तादृशी वधूः ॥
कुमारः सुहृदं प्राह, विदेशे तर्हि गम्यते ॥ कलशं लभते चक्रमपि न भ्रमणं विना ॥
चेलतुस्तौ विचिंत्येति, मिलितौ रजनीमुखे ॥ अलक्ष्यौ गोरजःपूरे, प्रचुरे तिमिरोपमे ॥
दिवारात्रौ व्रजंतौ तौ, फलांबुकृतभोजनौ ॥ वने शिलातलासीनं, मुनिद्वयमपश्यताम्॥१३५॥
तौ वंदित्वा मुनिद्वंद्वं, निषण्णौ भक्तितः पुरः ॥ मुनिरेकोऽवदत्प्राप्तौ, मिथिलाया युवामिह॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तौ प्रोचतुर्मुने कुत्र, दृष्टावावां पुरा त्वया ॥ द्वितीयः साधुरित्याह, ज्ञानमस्य विजृंभते ॥
अवधिज्ञानतो वेत्ति, युष्मद्वृत्तमयं मुनिः ॥ कुमारस्तं ततः प्रोचे, चिंतितं मे भविष्यति ॥
भविष्यति तृतीयेऽन्हि, साधुनेति प्रजल्पिते ॥ कुमारोऽवक् कुतस्तेऽभूद्वैराग्यात्संयमोद्यमः
सोऽवादीन्मालवे देशेऽवंतीनाममहापुरी ॥ अवंतीसेनो भूपालस्तद्भार्या सुरसुंदरी ॥१४०॥
सुतोऽस्यामरदत्तोऽभूत, पुत्री चामरसुंदरी ॥ सा संजज्ञे कलाकेलिकलाकेलिकलालया ॥
आ जन्मतोऽपि संजातमुद्दामश्रुतिभासुरम्॥ ललाटे तिलकं तस्या, दिदीपे दीप्रदीपवत् ॥
योग्यं वरं वरीष्यामि, विचिंत्येति विचारवित् ॥ अनवद्यामियं विद्यां, सिषेवे प्रीतिकारिणीम्॥
सा विद्यादेवता स्वप्ने, तां प्रति प्रीतिदायकम्॥ हारकुंडलकोटीरैः, स्वभावोत्थैरलंकृतम् ॥
लसल्लावण्यलीलाढयं नरं निरुपमाकृतिम् ॥ मां वृणीष्वेति जल्पंतं, दर्शयामास कंचनम्॥ युग्मम्
प्रबुद्धा स्वप्नदृष्टं तं, नरं निरुपमं श्रिया ॥ स्मारंस्मारं स्मराक्रांतमानसा सा व्यचिंतयत् ॥
यदि द्रक्ष्यामि तादृक्षं, वरिष्यामि ततो वरम् ॥ अन्यथाहं मरिष्यामि, न करिष्ये करग्रहम् ॥
वरेषु वीक्ष्यमाणेषु, तातं सा तं न्यवारयत् ॥ अत्याग्रहे बभाषे सा, वरिष्ये वीक्षितं वरम् ॥



For Private and Personal Use Only

भूपतिः कारयामास, सप्तवारं स्वयंवरम्॥ परं न तस्याः संजज्ञे, वरःकोऽपि विचिंतितः॥१४९॥
अन्यदा तां गवाक्षस्थां, चंद्रचूडोऽहरत्खगः॥ याति यातीति जल्पाके वीक्ष्यमाणे जनेऽखिले
न भूभृन्न भटश्चापि, नाभूत्कोऽपि पराक्रमी॥ आकाशचारिणा साकं, भूचराणां कियद्बलम्॥
तत्पिताहरणं तस्या, वीक्ष्य चित्ते विषण्णवान्॥ चिंतयामास संसारे, धिक्धिक् मोहविटंबना॥
कस्य पुत्राः कलत्राणि, सुहृदाः कस्य वल्लभाः॥ दैवाधीनं जगत्सर्वं, न प्रभुः कोऽपि वर्तते॥
मयि सत्यप्यसूरेग, चौरेण तनुजा हृता॥ असार एष संसारस्त्याज्य एव ततो मया॥१५४॥
इति ध्यात्वा हृदा पुत्रं, स्थापयित्वा निजे पदे॥ गृहीतसंयमः प्राप्तावधिज्ञानोऽहमेव सः॥
कुमारस्तं मुनिं प्रोचे, स्वप्ने या वीक्षिता मया॥ सा सैव किं न सान्या वा, मुनिरूचे च सैव सा
विद्यादेवतयादर्शि, यस्तस्याः स्वप्नमध्यगः॥ स नरः खेचरोऽन्यो वा, मुनिरूचे त्वमेव सः॥
विद्यादेवतया तस्यै, तुभ्यं चापि परस्परम्॥ रूपे प्रदर्शिते द्वे द्वे, योग्ययोगविधित्सया॥
कुमारः प्रीतिभाक् प्रोचे, द्वितीयस्य मुनेरपि॥ वैराग्यकारणं ब्रूहि, श्रोतृपीयुषपारणम्॥१५९॥
साधुः प्रोवाच वैताढ्ये, गिरौ गगनवल्लभे॥ पुरेऽभूद्रत्नचूडाख्यः, प्रख्यातः खेचराग्रणीः॥१६०॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चंद्रचूडः सुतः सोऽस्य, येन मे नंदिनी हृता ॥ असौ तं वारयामास, कन्याहरणतस्तदा ॥
तथापि सोऽमुचन्नैतां, स्थापयित्वा गृहे स्थितः ॥ न सेहे तस्य नामापि, सा कदाप्यर्थिता सती
विद्यादेवतया स्वप्ने, दर्शितो योऽस्ति लक्षणैः ॥ स एव मे वरो नान्यः, सेत्युक्त्वा तं न्यषेधयत्
तत्पिता रत्नचूडोऽथ, दृष्ट्वा तत्पुत्रचेष्टितं ॥ दध्यौ वैराग्यमापन्नो, धिक् धिक् कामविडंबनाम्
भवंति ग्रहिला वीक्ष्य, महिला अपि पंडिताः ॥ कामस्य पारवश्येनावश्यं त्याज्यो भवस्ततः
चिंतयित्वेति तं पुत्रं, राज्यचिंताविधायकम् ॥ मुक्त्वा संयममादाय, विचरन्निह सोऽमिलत्
द्वावप्यावामिह स्वैरं, वैरागिकतया स्थितौ ॥ शिलातलमुपासीनौ, तिष्ठावः कष्टवर्जितौ ॥
कुमारस्तं पुनः प्राह, नान्यथा भवतां वचः ॥ अहमत्रास्मि सा तत्र, कथं योगो भविष्यति ॥
मुनिरूचेऽत्र का चिंता, पुण्यमेव विचिंतय ॥ पुण्यस्यैव प्रभावेण, चिंतिताः स्युर्मनोरथाः॥
मुनीनां सेवया भद्र, पुण्याच्चिंतितमाप्यते ॥ इति तद्वचसा तत्र, कुमारो निश्चलः स्थितः॥
तृतीये ध्यानतस्तस्य, चारणस्य मुनेर्दिने ॥ उत्पेदे केवलज्ञानं, देवास्तत्र समागताः ॥
कुतश्चित् खेचरात्तातवृत्तं ज्ञात्वा तदंगजः ॥ चंद्रचूडस्तदा तातं, नंतुमुत्कंठितोऽभवत् ॥१७२॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तं ज्ञात्वा तत्र गच्छंतं, बभाषेऽमरसुंदरी ॥ सार्थे नयसि चेन्मां त्वं, तदा प्रीता भवाम्यहम्
ततो रम्यं करिष्यामीत्युक्ते प्रीतः स खेचरः ॥ तया सह विमानेनाययौ केवलिसन्निधौ ॥
तां स्फुरत्तिलकं भाले, बिभ्राणां वीक्ष्य भूपभूः ॥ तत्क्षणं लक्षयामास, पुरापि स्वप्नवीक्षिताम्
तत्कालजातालंकारभासुरं वीक्ष्य सापि तम् ॥ स्वप्नदृष्टं विचिंत्य द्राग्, हर्षादुत्पुलकाभवत्
क्षणात् करतले तस्या, भृंगझंकारहारिणी ॥ वरमाला समायाता, सभ्यलोकैर्विलोकिता ॥
सा सनूपुरझंकारा, मा मा कुर्वति खेचरे ॥ सोत्कंठे कंठपीठेऽस्य, वरमालामलूलुठत् ॥ १७८॥
जाते जयजयारावे, दुंदुभिध्वनिमिश्रिते ॥ सभ्याः केवलिनं प्रोचुः, किमिदं कौतुकं महत्
मुनिः पूर्वभवं प्रोचे, नगरे हस्तिनापुरे ॥ श्रेष्ठिनो धनदत्तस्य, कनकाभसुतोऽभवत् ॥
पूजायां क्रियमाणायां, बांधवैः सह संमदात् ॥ जिनस्याभरणारोपो, विहितोऽनेन पूजने ॥
तेन पुण्यप्रभावेण, जातोऽयं कुलभूषणः ॥ विद्यादेवतयाकारि च्शरीराभरणादिकम् ॥१८२॥
कस्मादमरसुंदर्यास्तिलकं दृश्यतेऽलिके ॥ इति पृष्टो मुनिः प्राह, केवलज्ञानभास्करः ॥
भरते पुरि चंपायां, दत्तस्य श्रेष्ठिनः प्रिया ॥ श्रीमतीनाम संजज्ञे, पुण्यकर्मणि तत्परा ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नलस्य दमयंत्याश्च, चरित्रं शुश्रुवेऽन्यदा ॥ वीरमत्या जिनेंद्रेभ्यस्तिलकान्युपनिन्यिरे ॥
पुण्येन तिलकं तेन, दमयंत्या भवेऽभवत् ॥ श्रुत्वेति नव्यतीर्थेषु, सार्हद्भ्यस्तिलकं ददौ॥
समये शुभभावेन, मृत्वा सा मरसुंदरी ॥ संजाता तिलकं तेन, दृश्यतेऽस्या ललाटगम् ॥
पुत्रं वीक्ष्य मुनिः स्माहादत्तकन्यासु नोचितम् ॥ मनो विधातुं दक्षाणां, परदारेषु किं पुनः
इति श्रुत्वा पितुर्वाचं, खेचरस्तां ननाम सः ॥ बंधोराशीर्वचस्तस्मै, ददौ सापि विचक्षणा॥
पुण्योपदेशं श्रुत्वा ते, तत्र भूचरखेचराः ॥ समुत्थितास्ततश्चक्रुस्तयोः पाणिग्रहोत्सवम् ॥
शृंगारतिलके दृष्ट्वा, ताभ्यां नाम्नी जना ददुः ॥ एषः शृंगारसारोऽस्तु, परा तिलकसुंदरी
अयं मुनिद्वयं नत्वा, चंद्रचूडसमर्पितम् ॥ ययौ विमानमारूढः, सप्रियः ससुहृत् पुरम् ॥
महोत्सवैर्गृहं गत्वा, पितृपादौ ननाम सः ॥ समं तिलकसुंदर्या, मातुः क्रमयुगेऽपतत् ॥
समये पृथिवीं तस्मै, दत्वा भूपः परासुताम् ॥ प्राप निःपापधीरेष, तत्र राज्यमपालयत् ॥
ज्ञानिनस्तत्र संप्राप्ताः, श्रीधर्मव्रतसूरयः ॥ भूपः सपरिवारोऽपि, तान् गत्वा प्रणनाम सः ॥ ॥९६॥
उपदेशमयं शांतरसोपेतं सुधामयम् ॥ पीत्वा वैराग्यमापन्नोऽभवत्संयमसादरः ॥ १९६ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मुनिं नत्वा गृहं गत्वा, दत्वा राज्यं स्वसूनवे ॥ प्रपाल्य संयमं प्रांते, सौधर्मे त्रिदशोऽभवत्
चिरं सुखान्यसौ भुंक्त्वा, देवलोकात्ततश्च्युतः ॥ तनयस्तव संजातो, दशमोऽयं दशाननः

॥ इति आभरणपूजायां कनकाभकथा ॥

———:o:———

कृतं पुष्पगृहं येन, जिनेंदोस्तत्फलं ब्रुवे ॥ अस्त्यत्र भरतक्षेत्रे, पुरी पुष्पकरंडिनी ॥११॥
पुष्पकेतुर्महीपालस्तस्य पुष्पावती प्रिया ॥ तत्र श्रेष्ठी गुणाधारो, लक्ष्मीसागरइत्यभूत् ॥
तस्य लक्ष्मीवतीकांताकुक्षिकासारपंकजम् ॥ हेमाभात्माभवत्पुत्रो, लक्ष्मीचंद्र इति स्मृतः ॥
शिवकांतामसौ कन्यां, यौवने परिणीतवान् ॥ लीलया गमयामास, समयं सममेतया ॥
भ्रमद्भमरझंकारं, किल सौरभ्यसुंदरम् ॥ विना पुष्पगृहं नासौ, निद्रां प्राप कदाचन ॥
सोऽन्येद्युः पितुरादेशात, पुरं नागपुराह्वयम् ॥ सार्थेन महता प्राप्तो, व्यवसायविशारदः ॥
तत्रासौ भांडशालायां, स्थितो द्रव्यमुपार्जयन् ॥ क्रीणानश्च ददानश्च, क्रयाणकशतान्यपि
अन्यदासौ स्थितस्तत्र, नगरे पटहध्वनिम् ॥ श्रुत्वा पप्रच्छ तत्रत्यं, कंचित् किमिह कारणम् ॥



For Private and Personal Use Only

सोऽवादीन्नगरं, नागपुरमेतन्मनोहरम् ॥ अत्र क्षेमंकरो राजा, बभूव क्षेमकारकः ॥२०७॥
तस्य लीलावती कांता, निरपत्यावदुःखिता ॥ सखिभिः सहितान्येद्युः, नागानां भवनं गता
तयोपयाचितं तेभ्यो, यदि पुत्रो भविष्यति ॥ तदा दिनत्रयं पूजां, तत्पंचम्यां करिष्यते ॥
जातोऽस्या दैवयोगन, ततः पुत्रः प्रियंकरः ॥ नागैर्दत्त इतिख्यातेर्नागदत्ताभिधोऽभवत् ॥
नागानां विहिता पूजा, लीलावत्या ततः परम् ॥ वर्षे वर्षे पुरेऽमुष्मिन्, जायते सा दिनत्रयम्
ताते परासौ संजाते, नागदत्तोऽभवन्नृपः ॥ सांप्रतं सा समायाता, वर्तते नागपंचमी ॥
आरामिको यः पुष्पाणि, नागानां भवनं विना ॥ अन्यत्र दास्यते तस्य, राजा दंडं करिष्यति
श्रेष्ठी वा व्यवहारी वा, मंत्री वान्योऽपि यःक्वचित् ॥ अपि देवार्चनं कर्तुं, कर्ता कुसुमसंग्रहम्
सर्वस्वं तस्य हृत्वासौ, राजा दंडं करिष्यति ॥ इत्येवं जायमानोऽयं, श्रूयते पटहध्वनिः ॥
लक्ष्मीचंद्र इति श्रुत्वा, दध्यौ पुष्पगृहं विना ॥ निद्रा नैति मम क्वापि, कथं कार्यं दिनत्रयम्
अतीते यामिनीयामे, सचिंताचांतचेतसा ॥ तले सुष्वाप न प्राप, प्रमीलालेशमप्यसौ ॥
चिंतया परितः पश्यन्, पाणिभ्यां पुष्पमंदिरम् ॥ जातमेतत्स्वयं दृष्ट्वा हृष्टो निद्रामथाप सः



For Private and Personal Use Only

ततः प्रातः प्रबुद्धेऽस्मिन्, सुहृदोऽस्य समागताः ॥ तद्वीक्ष्य पुष्पप्रासादं, वीक्षांचक्रुः परस्परम्
तथा दिने द्वितीयेऽपि, जाते पुष्पगृहे क्रमात् ॥ तलारक्षैरपि ज्ञात्वा, विज्ञप्तमिति भूभुजे ॥
लक्ष्मीचंद्रो विना पुष्पगृहं न स्वपिति प्रभो॥ श्रुत्वेति कुपितो भूपस्तत्क्षणं तैस्तमानयत् ॥
त्वयाज्ञा खंडिता कस्मादिति प्रोक्तो महीभुजा ॥ स प्रोवाच न राजाज्ञां, खंडयामि कदाचन॥
स्वरूपे पुष्पगेहस्य, प्रोक्ते सति महीपतिः ॥ ऊचे तर्हि त्वयागत्य, निद्रा कार्या ममालये ॥
तत्रापि तस्य सुप्तस्य, जाते पुष्पगृहे तथा। नृपतिर्विस्मितश्चित्ते, क्षमयामास तं प्रगे ॥
तेनापि सहितो भूपस्ततोऽगान्नागमंदिरम् ॥ पात्रावतीर्णा भूपं च, बभाषे नागदेवता ॥
असौ पुण्यप्रभावाढ्यः पुण्यात्तुष्यंति देवताः ॥ अस्माकं कथमर्चा स्यादस्य पुष्पगृहं विना ॥
अथ हृष्टो महीनाथस्तेन साकं गृहं ययौ ॥ सामान्यः स्थापितो मंत्री, कृत्याकृत्यविदाऽमुना॥
दैवस्य प्रतिकूलत्वात्क्रांतः शूलरुजा नृपः ॥ अंत्यावस्थां गतो लक्ष्मीचंद्रं प्रोवाच साश्रुदृक्॥
मित्रत्वं तव दैवेन, दूरितं दृश्यतेऽधुना ॥ धुनाति जीवितं वृक्षं, मृत्युर्मत्तगजेंद्रवत् ॥२२९॥
स प्रोचे परमं मित्रं, जिनधर्मो धरापते ॥ पतेन्न जीवो यं यानपात्रं लब्ध्वा भवांबुधौ ॥

जननी जनको भ्राता, पुत्रो मित्रं कलत्रमितरो वा ॥
दूरीभवंति निधने, शरणं जीवस्य जिनधर्मः ॥ २३१ ॥
श्रद्दधाने नृपे जैनधर्मे शर्मप्रदं नृणाम् ॥ स प्रोचे शमपीयूषरससागरसन्निभम् ॥ २३२ ॥
चतुःशरणसर्वात्मक्षामणादिकमप्यसौ ॥ नृपतिं कारयामास, सोऽपि तत्प्रत्यपद्यत ॥ २३३ ॥
भूपो मंत्रिणमाकार्य, बभाषे गुणरंजितं ॥ अस्यैव मम दातव्यं, प्राज्यं राज्यमिदं त्वया ॥
तेन प्रपन्ने भूपालः, समाहितमना भृशम् ॥ नमस्कारं स्मरन्मृत्वा, ब्रह्मलोके सुरोऽभवत्॥
भूपकृत्ये कृते तत्र, लक्ष्मीचंद्रोऽभवन्नृपः॥ पुर्याः पुष्पकरंडिन्याः स कुटुंबमथानयत् ॥
आकारणे समेतेऽस्य, गंतुकामः सुतांतिकम् ॥ स लक्ष्मीसागरः पुष्पकेतुं भूपं व्यजिज्ञपत्॥
स्वामिन्नागपुरे स्वामी, मदीयस्तनुजोऽभवत् ॥ गच्छाम्यहं तवाज्ञातः, सकुटुंबस्तदंतिके॥
हसित्वा भूपतिः पश्यन् क्षत्रियाणां मुखं जगौ ॥ तुलादंडो वणिक्पाणौ, भाति खड्गः पुनर्नहि
अत्रैव तेन तिष्ठ त्वं, सोऽप्यत्रैव समेष्यति ॥ तद्राज्यमहमादास्ये, राज्यं योग्ये विराजते॥
इत्युक्त्वा तं विसृज्यासौ, पुष्पकेतुर्नृपस्ततः॥ सेनया कंपयन् पृथ्वीं, ययौ नागपुरं प्रति॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




लक्ष्मीचंद्रस्तमायांतं, श्रुत्वा सबलवाहनः ॥ चचाल करवालेन, भूषयन् दक्षिणं करम् ॥२४२॥
देशसंधौ समागत्य, लक्ष्मीचंद्रे स्थिते सति ॥ पुष्पकेतुरपि प्राप्तस्तत्र शत्रुत्वसादरः॥२४३॥
विधातुमक्षमे संधिं, मंत्रिवर्गैर्द्वयोर्बलम् ॥ ढुढौके द्वंद्वयुद्धाय, शस्त्रझात्कारकारकम् ॥२४४॥
त्रासिता वैरिभिः सर्वे, लक्ष्मीचंद्रभटाः क्षणात् ॥ क्षत्रियः क्षत्रियो नूनं, वणिगेव वणिक् पुनः ॥
एवं हसत्सु क्षत्रेषु, लक्ष्मीचंद्रे तदाकुले ॥ नागदत्तामरोऽज्ञासीदवधिज्ञानवानिदम् ॥२४६॥
तत्कालं स समागत्य, मित्रसांनिध्यहेतवे ॥ संक्रम्य तच्छरीरे च, शमयामास वैरिणः ॥
शृगालीव वनाधीशाद्दृष्ट्वा रे कुत्र यास्यथ ॥ मान्यां मन्यध्वमस्याज्ञां, यदि वो जीवितं प्रियम्
इत्याकर्ण्य नभोवाचं, पुष्पकेतुर्नृपस्तदा ॥ प्राभृतेन समागत्य, लक्ष्मीचंद्रमतूतुषत् ॥२४९॥
लक्ष्मीचंद्रस्ततस्तेन, साकं नागपुरं ययौ ॥ ज्ञापयित्वोपकारं च, नागदत्तामरो दिवम् ॥
पुष्पकेतुं नृपं प्रेष्य, सकुटुंबो महीपतिः ॥ स राज्यं पालयामास, तत्र नागपुरे पुरे ॥२५१॥
इतश्च सिंहतिलकज्ञानवन्मुनिपुंगवाः ॥ तत्रायाताः स तान्वंतु, जगाम सपरिच्छदः ॥२५२॥
श्रुत्वोपदेशं पप्रच्छ, निजराज्यस्य कारणम् ॥ मुनिः पूर्वभवं प्रोचे, नगरे हस्तिनापुरे ॥



For Private and Personal Use Only

श्रेष्ठिनो धनदत्तस्य, हेमाभाख्यः सुतोऽभवत् ॥ पूजायां क्रियमाणायां, पुष्पगेहमसौ व्यधात
जिनपूजाप्रभावेण, प्राज्यं राज्यं तवाभवत् ॥ पुष्पगेहविशेषात्ते, पुष्पगेहं तदाभवत ॥
भूपः पूर्वभवं श्रुत्वा, तदा जातिस्मरोऽभवत् ॥ विशेषादार्हतं धर्मं, प्रपेदे मुनिसंनिधौ ॥
मुनिं नत्वा गृहं गत्वा, दत्वा राज्यं स्वसूनवे ॥ गृहीत्वा संयमं प्रांते, सौधर्मे त्रिदशोऽभवत
चिरं सुखान्यसौ भुक्त्वा, देवलोकात्ततश्च्युतः ॥ एकादशोयमचलो, नाम्ना ते तनयोऽभवत्

॥ इति पुष्पगेहपूजायां हेमाभकथा. ॥

जिनाग्रे विहितः पुष्पप्रकरो येन भावतः ॥ फलं तस्याथ वक्ष्यामः, श्रूयतां भविका जनाः
विदर्भा नगरी रम्या, दक्षिणस्या विभूषणम् ॥ नरसिंहनृपस्तत्र, सुत्रामसमविक्रमः ॥२६०॥
श्रीदेवीवल्लभा तस्य, शीलशृंगारशालिनी ॥ मतिसाराभिधो मंत्री, मनोज्ञमतिवैभवः ॥
तस्य सत्यवती कांता, कांतभक्तिमनोहरा ॥ हेमवर्णकजीवोऽथ, तस्याः कुक्षिं समागतः ॥
तदा च भूपतिः प्रोचे, सचिवं शुचिवाक् पटुः ॥ तोल्यः पट्टगजेंद्रोऽयं, भारोऽस्य ज्ञायते यथा
क्षुद्रादेशममुं ज्ञात्वा, मंत्री मंदिरमागतः ॥अत्यंतं तं सचिंतं च, दृष्ट्वा सत्यवती जगौ॥२३४॥



For Private and Personal Use Only

हेतुना केन मलिनमाननं तव दृश्यते ॥ राजादेशेऽमुना प्रोक्ते, सा स्मित्वोचे न दुःकरम्
सरिति स्थाप्यते क्वापि, नौका निश्छिद्रतान्विता ॥ यावती सा स्वभारेण, जलमध्ये निमज्जति
तावंतीं रेखया युक्तां, कृत्वात्रारोप्यते गजः ॥ यावती तस्य भारेण, नीरं मज्जति सा ततः ॥
तावंतीं रेखयित्वा तां, तत उत्तार्यते गजः ॥ आगजारोपरेखं सा, वस्तुभिर्भ्रियते तरी ।२६८।
ततस्तत्तोल्यते वस्तु, समस्तमपि कोविदैः ॥ वस्तुनो यत्प्रमाणं स्याद्गजेंद्रस्यापि तद्भवेत् ॥
श्रुत्वेति सचित्रो दध्यौ, नास्या बुद्धिरियं कुतः ॥ किंतु गर्भस्थितस्यैव, कस्यचिद्भाग्यशालिनः
चिंतयन्नित्यसौ गत्वा, नृपायादात्तदुत्तरम् ॥ तद्बुद्धिरंजितः सोऽस्मै, विशेषान्ना नदोऽभवत्
समये सुषुवे सूनुः, सत्यवत्या शुभे दिने ॥ तस्मै सुमतिरित्याख्यां, सचिवः सोत्सवं ददौ
वर्द्धमानः कलाशाली, क्रमात्तारुण्यमाप सः ॥ अन्येद्युर्भूभुजा मंत्री, समाहूयेति भाषितः
मम सौधकृते काष्ठान्यटवीतः समानय ॥ ओमित्युक्त्वा समेतोऽसौ, ज्ञात्वेदं तनुजो जगौ
अहं गत्वा समानेष्ये, तानीत्युक्त्वा जगाम सः ॥ सूत्रधारैः सहाटव्यां, संकुलायां लताद्रुमैः
तालह्ंतालमालूरखर्जूरार्जुनचंदनाः ॥ यत्र वृक्षा असंख्याताः, पर्वताश्चापि सर्वतः ॥२७९॥



For Private and Personal Use Only

तत्र छत्रसमं पृथ्व्याः, पुष्पतारकपूरितम् ॥ विशाखासहितं सम्यग्, द्विजराजविराजितम् ॥
नीलामलसच्छायं, दृढमूलं महत्तरं ॥ प्रतिबिंबमिव व्योम्नस्तरुमेकं ददर्श सः ॥२७८॥
तं दृष्ट्वा दध्यिवानेष निरधिष्ठायको न हि ॥ तरुर्गुरुतरस्तेन छेत्तुं नार्हति सर्वथा ॥२७९॥
तं च्छेत्तुमनसं सुत्रधारवर्गं निवार्य सः ॥ धूपगंधार्चनं कृत्वा, तस्याधस्तान्निविष्टवान् ॥२८०॥
प्रत्यक्षीभूय तं प्रोचे, व्यंतरस्तदधिष्ठितः ॥ प्रीतोऽस्मि तव बुद्ध्याहमुचितं तद्वरं ददे ॥
सर्वत्र चिंतितः पुष्पप्रकरो भवतः पुरः ॥ भवितेत्येवमाकर्ण्य, तं प्रोचे सचिवांगजः ॥२८२॥
वरो मेऽस्तु परं सौधे, भारपट्टाविलोक्यते ॥ अनेन शाखिना सोऽयं, समर्थः खलु जायते ॥
ततो मेऽनुमतिं देहि, यथा कार्यं विधीयते ॥ स प्राहच्छेदनेनालमन्येषामपि शाखिनाम् ॥
सौधयोग्यानि काष्ठानि, समेतानि पुरे तव ॥ प्रातर्विदारको भूपमनुष्यस्ते समेष्यति ॥
एवमुक्त्वा गते तत्र, व्यंतरे मंत्रिनंदनः ॥ पुरतः पुरतः प्राप्तमद्राक्षीन्मानुषं प्रगे ॥२८६॥
तेनापि हि तथैवोक्ते, मंत्रीसूः शिल्पिभिः सह ॥ आयातः स्वपुरं तातस्तद्बुद्ध्या रंजितो भृशम् ॥
तदा नगर्यां चंपायां, नरेंद्रोऽभून्महाबलः ॥ तस्य सागरमंत्रींदोः सुता कमललोचना ॥



For Private and Personal Use Only

याचिता मतिसारेण, सेयं सुमतिसूनवे ॥ यावत्प्रदीयते तेन, तावद्भृत्यो जगाद तम् ॥
आयातो मथुरापुर्याः, सचिवो बुद्धिसागरः ॥ स्वपुत्रजयचंद्रार्थं, पुत्रीं याचितुमेति वः ॥
तदा तत्र समायातं, तं दृष्ट्वा सचिवाग्रणीः ॥ आसनादिप्रदानेनावर्जयामास गौरवम् ॥
तेनापि हि तथैवोक्ते, सागरोऽथ व्यचिंतयत् ॥ तुल्ययोर्वरयोरेषा, कस्मै कन्या प्रदीयते ॥
विमृश्याहं करिष्यामीत्युक्त्वा तौ द्वौ विसृज्य सः ॥ चिंतयाचांतचित्तोऽस्थात्तं दृष्ट्वा च सुता जगौ ॥
खिद्यसेऽद्य कथं तात, स्वरूपे कथितेऽमुना ॥ साप्रोचे वरनामांकं, क्रियतां पत्रिकाद्वयम् ॥
कुलदेवीकरे न्यस्य, योग्यं देहीति भाषकः ॥ अन्यया कन्यया पत्रीमेकमादाय निर्णयः ॥
एवमेव कृते तेन, प्राप्ता सुमतिपत्रिका ॥ प्रच्छन्नं सा ततस्तस्मै, प्रैषीलेखं स्वपाणिना ॥
नूनं मयाहृतोऽसि त्वं, स्वबुद्धया बुद्धिसागर ॥ मंत्री त्वया तथा वार्यो, यथा कोपं करोति न ॥
वाचयित्वेति तं लेखं, वलमानं लिलेख सः ॥ सापि तं वाचयामास, समेतं भृत्यपाणिना ॥
आगतो भवतीलेखो, भव्यमेव भविष्यति । अस्मदागमने सोप्याह्वातव्यो बुद्धिसागरः ॥
तथा बुद्धिं विधास्यामि, यथा कोऽपि न रोक्ष्यति ॥ तथैव कारयामास, वाचयित्वेति तं मुदा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विवाहसमये तत्र, मिलिते स्वजनेऽखिले ॥ समेते सहपुत्रेण, सचिवे बुद्धिसागरे ॥
मतिसारे निविष्टे च, जायमाने महोत्सवे ॥ सुमतिसुहृदा ज्ञातसंकेतेनेत्यभाषत ॥३०२॥
मिलिताः स्वजना एते, गौरवार्हा गुणान्विताः ॥ स्वयमेवागतैः पुष्पैः, कुरुध्वं प्रकरानिह ॥
सर्वेषु वीक्षमाणेषु, वक्त्रमेव परस्परम् ॥ जयचंद्रमसं प्रोचे, बुद्धिसागरनंदनम् ॥ ३०४ ॥
कुरु त्वं यदि शक्तिस्ते, सुमतिः कुरुतेऽन्यथा ॥ यः करिष्यति तत्कार्यं, स कन्यां परिणेष्यति
एवं परैरपि प्रोक्ते, सुमतिस्तत्क्षणादपि ॥ तं वृक्षव्यंतरं स्मृत्वा, पुष्पाणां प्रकरान् व्यधात् ॥
बाला सोत्कंठिता मालामस्य कंठे न्यवेशयत् ॥ पाणिग्रहोत्सवश्चक्रे, पितृभ्यामेतयोस्ततः ॥
तृतीये दिवसेऽकस्मादपुत्रस्तत्र भूपतिः ॥ केनापि घातकेनाशु, प्रविश्य निशि संहतः ॥
अधिवास्य प्रगे पंचदिव्यानि नगरेऽखिले ॥ मुमोच मंत्रियोग्याय, राज्यं दत्तेति भाषकः
तानि तत्र समेतानि, सुमतिर्यत्र वर्त्तते ॥ हयो हेषारवं चक्रे, गजो गर्जितमूर्जितम् ॥
विस्तीर्णं शिरसि छत्रं, सुमतेः स्वयमेव तत् ॥ रेजाते परितस्तं चाधूनिते चारुचामरे ॥
राजशृंगारमादाय, गजारूढो जनैर्वृतः ॥ सुमतिर्भूपतिर्जीयादित्युक्तः स सभां ययौ ॥३१२॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



न्यायेन पालयामास, स्वजनानंददायकः ॥ राज्यं हरिरिव स्वर्गे, सुमतिर्भूमिनायकः ॥
अन्यदा ज्ञानिनस्तत्र, महेंद्रप्रभुसूरयः ॥ समायाताः स तान्नत्वाऽश्रौषीद्धर्मोपदेशनम् ॥
श्रुत्वोपदेशं पप्रच्छ, निजराज्यस्य कारणम् ॥ सूरिः पूर्वभवं प्रोचे, नगरे हस्तिनापुरे ॥
श्रेष्ठिनो धनदत्तस्य, हेमवर्णः सुतोऽभवत् ॥ असौ जिनेंद्रपूजायां, पुष्पाणां प्रकरं न्यधात् ॥
जिनपूजाप्रभावेण, प्राज्यं राज्यमिदं तव ॥ पुष्पप्रकरतः पुष्पप्रकरस्ते तदाभवत् ॥३१७॥
भूपः पूर्वभवं श्रुत्वा, तदा जातिस्मरोऽभवत् ॥ विशेषादार्हतं धर्मं, प्रपेदे मुनिसंनिधौ ॥
मुनिं नत्वा गृहं गत्वा, दत्वा राज्यं स्वसूनवे ॥ गृहीत्वा संयमं प्रांते, सौधर्मे त्रिदशोऽभवत् ॥
चिरं सुखान्यसौ भुक्त्वा, देवलोकात्ततश्च्युतः ॥ द्वादशो बहुबुद्धिस्ते, तनयो भूपतेऽभवत् ॥

वस्त्रादिपूजनचतुष्कफलानि पुण्यमाणिक्यसुंदररुचिर्नृपतेः पुरस्तात् ॥
उक्त्वा विशेषसहितानि तदाक्षतादिपूजाफलानि गदितुं स पुनः प्रवृत्तः ॥३१९॥

श्री अंचलगच्छेश श्री माणिक्यसूरिविरचिते पूजाधिकारे गुणवर्मचरित्रे
महाध्वजाभरणारोपपुष्पगृहपुष्पप्रकरपूजाफल-
वर्णनो नाम चतुर्थः सर्गः



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ॥ स्वर्ग ५ मो. ॥

अक्षतार्चा कृता येन, मंगलाष्टकपूर्वकम् ॥ फलं तस्याश्च वक्ष्यामः, श्रूयतां भविका जनाः
पुरी शुभंकरा तत्र, हरिर्नाम्ना महीपतिः ॥ सौभाग्यदेवी देवी च, देवीवद्द्युतिशालिनी ॥
तनुजो धनदत्तस्य, श्रीदस्तत्कुक्षिमागतः ॥ समये स तया सूतः पिता चक्रे महोत्सवम् ॥
कनकध्वज इत्याख्या, कृता तस्य महीभुजा ॥ वर्द्धमानः कलाशाली, क्रमात्तारुण्यमाप सः
अन्येद्युः सहितो मित्रैर्वने क्रीडन्नसौ ययौ ॥ जिनेंद्रभवनं नेत्रद्वयप्रीतिकरं नृणाम् ॥५॥
नत्वा जिनपतिं तत्र, वीक्षमाणो विचित्रताम् ॥ नंतुकाममसौ देवान् प्राप्तं स्त्रीवर्गमैक्षत ॥
तन्मध्ये कन्यका कापि, करस्थितशुकाननम् ॥ पश्यंती तत्र संप्राप्ता, लसल्लावण्यशालिनी ॥
अक्षतान् ढौकयंती सा, जिनस्य पुरतः स्वयम् ॥ तेनैव ढौकयामास, शुकेनापि विवेकिना
अक्षतांतः शुको वक्त्रेणालिखन्मंगलाष्टकम् ॥ ततस्तया समं प्रीत्याऽपाठीज्जिनपतिस्तुतिम् ॥
अक्षतं यानपात्रं त्वं, वर्त्तसे भववारिधौ ॥ अक्षतं शिवसौख्यं नस्त्वं देहि परमेश्वर ॥ १० ॥



For Private and Personal Use Only

एतच्चित्रकरं दृष्ट्वा, विस्मितः कनकध्वजः ॥ मित्रेण प्रच्छयामास, कांचित्तन्मध्यगां स्त्रियम्
सा प्रोचे जिनदत्तस्य, सुतेयं कमलाभिधा ॥ जातायां मंदिरे यस्यां, पितुर्धनमभूद्घनम्
अष्टवर्षप्रमाणाया, अस्याः करतले स्वयम् ॥ समागत्य शुकस्तस्थौ, कमले राजहंसवत् ॥
एषा क्षणमपि प्रायो, न तिष्ठति शुकं विना ॥ अत्यजंती मनोरंगादंगाज्जीवमिवान्वहम्
पाणिग्रहणयोग्यापि, वरमेषा न वांछति ॥ इतश्च तत्र संप्राप्ता, श्रीमंतो धर्मसूरयः ॥१५॥
करे न्यस्तशुकामेतां, सहादाय समागतः ॥ श्रेष्ठी पप्रच्छ तान्नत्वा, केनेयं स्नेहभा_ शुके
ते प्रोचुर्मगधाभिख्ये, देशे संग्रामनामनि ॥ ग्रामे श्यामाकनामाभूत्कृषिकर्मणि जीवकः ॥
वर्षाकालेऽमुना शालिक्षेत्रं विहितमादरात् ॥ आनिन्ये सोमया पत्न्या, सहासौ शालितंदुलान्
क्षेत्रमार्गे स्थितं जैनमंदिरं वीक्षणेच्छया ॥ सोमा समागता शीर्षे, वहंती शालितंदुलान् ॥
अनत्वा जिनमुत्तस्थौ, तीर्थवंदारुसाधुना ॥ बभाषे सा महाभागे, पुण्यं किंचिद्विधीयते ॥
सा प्रोचे हेमुने नूनमस्माकं सुकृतं कुतः ॥ नित्यं नवनवक्षेत्रकर्मकर्मठचेतसाम् ॥ २१ ॥
मुनिः प्रोचेऽस्ति किं शीर्षे, सा जगौ शालितंदुलाः ॥ स प्राह चेज्जिनाग्रेऽमी, ढौक्यंते सुकृतं ततः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



साक्षतान् ढौकयामास, जिनं नत्वा मुनेर्गिरा ॥ नाश्नाम्यहमकृत्वेदमित्यभिग्रहमग्रहीत् ॥
वर्षाकाले महामेघे, भृशं वर्षति भूतले ॥ भोजनं न तयाकारि, ह्यकृत्वाक्षतपूजनम् ॥२४॥
दिनत्रयं महावृष्टिं, कारंकारं घने स्थिते ॥ कृतोपवासत्रितया, प्रासादं प्रति साचलत् ॥
अंतरा दुस्तरानद्यां, प्राप्ते पूरेऽपि साविशत ॥ स्तोकं जलमिति ज्ञात्वा, पयसा च प्रवाहिता ॥
अक्षतान् ढौकयाम्येषा, जिनाग्रेऽहं कथंचन ॥ चिंतयंतीति सा मृत्वाधुना तव सुताभवत् ॥
एतस्याः समये भर्त्ता, मृत्वा सोऽयं शुकोऽभवत ॥ अन्योन्यमनयोः स्नेहस्तेनायं दृश्यतेऽधिकः
जिनस्याक्षतपूजातः, सेयं तव सुताभवत् ॥ तिर्यग्योनौ पुनर्जज्ञे, तद्भर्त्ता पुण्यवर्जितः ॥
इति श्रुत्वा तयोर्जाता, जातिस्मृतिरथ क्षणात् ॥ अपुण्यकारिणं स्वं च, स निनिंद शुकस्तदा
नरो न रोचते कोऽपि, वरोऽस्या भविता न वा ॥ श्रेष्ठिनोक्ते गुरुःप्रोचे, शुको भर्त्ता भविष्यति
जने हसति सर्वस्मिन्, सूरिः प्रोचेऽत्र पत्तने ॥ वत्सरांते शुको मृत्वा, भावी धनपतेः सुतः ॥
एषापि पंचवर्षांते, निश्चितं मृत्युमाप्स्यति ॥ तवैव भविता पुत्री, नाम्ना कनकसुंदरी ॥ ॥११०॥
एतयोस्तारतारुण्यमाप्तयोः करपीडनम् ॥ भविताक्षतपूजातः, सुखमप्यक्षतं तयोः ॥३४॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वसुताशुकयोर्वृत्तं, श्रुत्वेति मुनिपुंगवात् ॥ श्रेष्टी भक्त्या च तं नत्वा, सपुत्रीको गृहं ययौ
जिनपूजा परं पुण्यमिति निश्चित्य मानसे ॥ कुरुते कारयत्येनं, शुकं साक्षतढौकनम् ॥३८॥
इति श्रुत्वा तयोर्वृत्तं, कुमारः कनकध्वजः ॥ अक्षतार्चाकृते भावं, विशेषेण बभार सः ॥
तदा पारापतः कोऽपि, तत्रैव जिनमंदिरे ॥ लेखं मुमोच तत्पाणौ, सोऽपि वाचयतिस्म तम्
स्वस्तिलंकामहाद्वीपाद्बिभीषणपुरादतः ॥ रामदेवाभिधः श्रेष्ठी कुमारं कनकध्वजम् ॥३९॥
वदत्यदस्त्वयागम्यं, मत्पुत्रीकरपीडने ॥ वाचयित्वेति तं लेखं, दध्यौ चित्रं नरेंद्रभूः ॥४०॥
यावत्पश्यति तं पारापतं भूपतिनंदनः ॥ तावता नररूपेण, स्कंधमारोप्य सोऽचलत् ॥४१॥
लंकाद्वीपे स तं नीत्वा, रामदेवगृहेऽमुचत् ॥ रम्यरामाजनोल्लूलनमृदंगध्वनिसुंदरे ॥४२॥
तत्राष्टौ कन्यकाः सारशृंगाराः पूर्वसज्जिताः ॥ परिणिन्ये प्रमोदेन, पूरिताः स महोत्सवात्
जाते विवाहे जामाता, श्वशुरं स्माह कौतुकम् ॥ किमिदं स जगावेतद्बिभीषणपुरे पुरम्
श्रेष्ठी च रामदेवोऽहमिमा अष्टौ सुता मम ॥ भार्याचतुष्कसंजाताः, समं संजातयौवनाः ॥
निमित्तज्ञो जगौ सोमो, मया पृष्टस्तवांगजाः ॥ कनकध्वजभूपस्य, भविष्यंति सुवल्लभाः ॥



For Private and Personal Use Only

कामिदेवाभिधो यक्षस्ततः संसेवितो मया ॥ तेनानीय प्रदत्तोऽसि, कृतोऽयं च महोत्सवः
इति श्रुत्वा स्थितस्ताभिर्भुंजानः सौख्यमद्भुतम् ॥ विसस्मार निजं स्थानमप्यसौ तद्विमोहितः
प्राप्तेषु यानपात्रेषु, निजस्थानागतान्नरान् ॥ विलोक्योत्कंठितो जातः, स्वपित्रोःसंगमाय सः
श्वशुरोज्ञातवृत्तांतः, कालक्षेपमसासहिः॥ यक्षेण स क्षणानीतस्ताभिः सह निजं पुरम् ॥४०॥
अकस्मादागतं गेहे, प्रियाभिः परिवारितम् ॥ तं प्रेक्ष्य पितरौ प्रीतिं, परमां प्रापतुः प्रगे ॥४१॥
अथो हरिर्महीपालस्तस्मै राज्यं प्रदाय सः ॥ कृतप्रांतार्हपुण्येन, परलोकमसाधयत् ॥४२॥
कनकध्वजभूपालः, पालयन् वैभवं निजम् ॥ समयं गमयामास, ताभिःसह सुधामयम् ॥
अन्यदासौ बहिर्गच्छन्, केनापि प्रीतिशालिना ॥ पुंसा प्रोचे समागत्य, त्वयाहमुपलक्षितः
शुकजीवोऽस्म्यहं प्राप्तजातिस्मरनिजप्रियः ॥ श्रुत्वेति पूर्ववृत्तांतं, स्मृत्वा प्रीतिमवाप सः
तं कृत्वाऽसौ हयारूढं, सह नीत्वा बहिर्ययौ ॥ तावता तत्र संप्राप्ता, मुनिशेखरसूरयः ॥५६॥
ज्ञानिनस्तान्नृपो नत्वापृच्छत्पूर्वभवं निजम् ॥ निःशेषं प्रोचिरे ते च, पुरतस्तस्य विस्तरात् ॥११२॥
हस्तिनागपुरे श्रेष्ठी, धनदत्ताभिधोऽभवत् ॥ श्रीदनामा सुतस्तस्य, विदधे जिनपूजनम् ॥

अक्षतार्चा कृता पूर्वं, मंगलाष्टकपूर्वकम् ॥ अक्षतं राज्यमेताभिः, सह प्राप्तं त्वया ततः ॥
नृपः पूर्वभवं श्रुत्वा, तदा जातिस्मरोऽभवत ॥ विशेषादार्हतं धर्मं, प्रपेदे मुनिसंनिधौ॥६०॥
मुनिं नत्वा गृहं गत्वा, मित्रं धनपतेः सुतम्॥ कृत्वासौ पुण्यकर्माणि, कुर्वन् राज्यमपालयत्
मित्रस्य शुकजीवत्वाच्छुकनाम ददौ नृपः॥ लोकैरपि तथा ख्यातो, दक्षोऽयं पुण्यकर्मणि ।
समये स्वस्य पुत्राय, राज्यं दत्वा निजं नृपः॥ तेषामेव गुरूणां स, पार्श्वे संयममाददे ॥
प्रपाल्य निरतीचारं, चारु चारित्रमुज्वलम् ॥ विहितानशनःप्रांते, सौधर्मे त्रिदशोऽभवत् ॥
चिरं सुखान्यसौ भुक्त्वा, देवलोकात्ततश्च्युतः ॥ भूपते तनयस्तेऽभूत्तारणाख्यः त्रयोदशः॥

॥ इति अक्षतमंगलपूजायां श्रीदकथा. ॥

---

धूपपूजा कृता येन, फलं तस्य निगद्यते ॥ अत्रास्ति भरतक्षेत्रे, ताम्रलिप्त्याख्यया पुरी ॥
सिंहो महीपतिस्तत्र, सिंहवद्विक्रमास्पदम् ॥ देवी दुर्लभदेवी च, देवीव दुर्लभा परैः॥६७॥
सुबुद्धिःसचिवस्तस्य बुद्धिहंसीसरोवरम् ॥ हंसी नाम्ना प्रिया तस्य, प्रशस्यगुणशालिनी॥



For Private and Personal Use Only

गुण० चरित्र ।११४।

श्रीदत्तो धनदत्तस्य, सुतस्तत्कुक्षिमागतः ।। समये स तयासूतः, पिता चक्रे महोत्सवम् ।।
अस्य प्रायः सुगंधोऽस्ति, कायः कमलवत्किल ।। गंधराज इति प्रीत्या, तस्य नाम ददौ पिता
कलाकलापकौशल्यशाली शालीनमानसः ।। लसल्लावण्यलीलावांस्तारं तारुण्य माप सः ।।
अन्येद्युः सहितो मित्रैः क्रीडार्थं स ययौ वनम् ।। मयौवनैर्वृतो लीलातरुर्वल्ल्येव वेष्टितः ।।
तले तरोरशोकस्य, वीक्ष्य च प्रीतिकारकम् ।। मुनिं नत्वा निविष्टोऽसौ, पुरतस्तस्य भक्तिभाक्
प्रभो वयसि तारुण्ये, कुतः संयममग्रहीः ।। इत्युक्ते गंधराजेन, मुनिः प्रोचे निशम्यताम् ।।
वत्सदेशेऽस्ति विख्याता, कौशांबी नामतः पुरी ।। श्रेष्ठी च विजयस्तत्र, पवित्रःपुण्यकर्मणा
विजयश्रीरिति ख्याता, प्रिया तस्य क्रियान्विता ।। तयोः पद्माकरः पुत्रः, पद्माकर इवामलः
पद्मश्रीरिति नाम्नास्य, वधूर्विधुसमानना ।। यां विना सैष शिश्राय, स्वप्नेऽपि न परां स्त्रियम्
एकांते कांतया साकं, तयासौ कांतयानिशम् ।। नानाक्रीडाभिरक्रीडद्वनेषु भवनेषु च ।।
अन्येद्युरुत्थिता प्रातर्मत्तेवभ्रांतलोचना ।। यत्तज्जजल्प सा भूमौ, लुलोठ च रुरोद च ।। ।११४।
क्षणं गतिं क्षणं हास्यं, क्षणं नृत्यं चकार सा ।। न चकार परं लज्जां, न वस्त्रस्यापि संवरम् ।।

वधूमेवविधां वीक्ष्य, वल्लभः श्वशुरोऽपि च ॥ द्वावपि व्याकुलौ जातौ, चक्रतुस्तत्प्रतिक्रियाम्
मिलिता भिषजोऽनेके, मांत्रिका जगदुश्च ते॥ रोगवेतालशाकिन्यादिकान् दोषान् पृथक् पृथक्
तत्र रत्नाभिधो मंत्रवादी प्राह निशम्यताम् ॥ दोषस्य निग्रहं कुर्वे, सर्वे तिष्ठिंति चेज्जनाः
अथासौ मंडलं कृत्वा, गुग्गुलोद्ग्राहपूर्वकम् ॥ निवेश्य तत्र तां मंत्रैरभाषयत मांत्रिकः ॥
सा प्रोचे सैष भूतोऽस्मि, लग्नः कासारसंनिधौ ॥ मोक्ष्यामि सर्वथा नैतां, हनिष्याम्येव लीलया
अस्याःशोणितमांसाभ्यामेकविंशतिराहुतीः ॥ यदि दास्यथ तज्जीवितव्यं भवति नान्यथा ॥
अस्या यदि न दीयेत, तद्भर्तुश्च ददातु मे ॥ इत्युक्त्वा विरतो भूतो, सचिंतोऽभूज्जनोऽखिलः
कांतानुरागवान्पद्माकरो धैर्यधरोऽवदत् ॥ किमिदं प्राणसन्यासमेतदर्थं करोम्यहम् ॥८८॥
छेदं छेदं स्वमांसानां, खंडानि रुधिरैः समम् ॥ एतस्यामेव पश्यंत्यां, जुहाव ज्वलितानले
अष्टावाहुतयो यावज्जाता भूतो जगाद तम् ॥ तावदेतेन कार्येण, पूर्णं तुष्टोऽस्मि धैर्यतः ॥
तदंगं पाणिना स्पृष्ट्वा, रूढयित्वा च तत्क्षणात् ॥ गते भूतेऽभवत्सापि, सज्जा हृष्टो जनोऽखिलः ॥१२५॥
यादृक् स्नेहः स्वकांतायामस्य तादृक् परस्य न ॥ इति वार्त्ता जगत्यासीज्जनानां प्रीतिकारिणी

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्यदा सा गवाक्षस्था, पथि यांतं नृपांगजम् ॥ ददर्श सोऽपि दैवात्तां, दृष्ट्वा जातोऽनुरागवान्
सापि तं तादृशं वीक्ष्य, सानुरागां दृशं दधौ ॥ सोऽक्षिभ्रू भ्रमणात्तस्यै, संकेतस्थानमब्रवीत् ॥
गते तस्मिन्नथोवाच, सा कांतं यदि कानने ॥ गत्वा क्रीडाव आवां तत्प्रीतिर्मनसि जायते
अथ तौ काननं प्राप्तौ, यावत्तावन्नृपांगजः ॥ वृक्षांतरे स्थितस्तत्र, यत्र पश्यति सा दृशा ॥
तं निरीक्ष्य गता, सद्योनिजकांतं विहाय सा ॥ पद्माकरो विषादेन, पूरितः सदनं ययौ ॥
आत्मीयो रूपकः कूटो, वादः किं वणिजा सह ॥ यदि सा खलु तादृक्षा, कः कोपस्तन्नृपांगजे
अग्नौ हुते मया मांसशोणिते अपि यत्कृते ॥ यदि सा खलु तादृक्षा, धिक् कृतघ्ना इमाः स्त्रियः
इति वैराग्यतः सोऽहं, मातापित्रोरनुज्ञया ॥ गृहीत्वा संयमं प्राप्तो, विहरन्नत्र संप्रति ॥१००॥
श्रुत्वेति गंधराजोऽपि, विरक्तः स्त्रीषु तं मुनिम् ॥ नत्वागत्य गृहं मातापितरौ स्वौ व्यजिज्ञपत्
गृहीष्याम्येव चारित्रमादेशो मम दीयताम् ॥ तावूचतुर्न जीवद्भ्यामनुज्ञा तव दीयते ॥
ततः स्थितोऽसौ वैराग्यरंगेणैव निरंतरम् ॥ तदा दुर्लभदेवीतः, सुतैका भूपतेरभूत् ॥१०३॥
दृष्ट्वा तामतिदुर्गंधां, दासिकास्तत्यजुर्वने ॥ देव्यै तु कथयामास, मृता जातेति ताः पुनः ॥

For Private and Personal Use Only

ततः षोडशवर्षेषु, व्यतीतेषु नृपोऽन्यदा ॥ प्राप्तपूरां नदीं द्रष्टुं, ययौ कौतुकपूरितः ॥१०५॥
आगच्छंतीं जले दृष्ट्वा, मंजूषां भूपतिस्ततः॥ आकृष्योद्घाटयामास, दृष्टा काचिदिहांगना
शयाना निंबपत्रेषु, मीलिताक्षी विचेतना ॥ सर्वेण दष्टा विज्ञाता, भूभुजा सांगलक्षणैः ॥
मणिना बाहुरक्षस्य, तत्क्षणं निर्विषीकृता॥ आनिन्ये सा गृहं राज्ञा, मान्या लावण्यतोऽभवत्
न कस्या अपि देव्या मे, पुत्रः संप्रति वर्तते॥ तदिमां परिणेष्यामि, सुतार्थं शुभलक्षणाम्
इति ध्यात्वा नृपस्तस्याः पाणिग्रहणहेतवे ॥ गणकैर्गणयामास, लग्नं शुद्धं विशेषतः ॥
इतश्च तत्र संप्राप्ताः श्रीपुण्यप्रभसूरयः ॥ तया च पट्टदेव्या तान्, साकं नंतुं नृपो ययौ ॥
वंदित्वा तान्नृपोऽवादीदुपदेशः प्रदीयताम् ॥ ते प्रोचुरुपदेशैः किं, पुरतस्ते प्रजापते ॥
असंबद्धमिदं तेषां वाक्यं श्रुत्वा नृपो जगौ॥ कः प्रजापतिरत्रास्ति, ते प्रोचुःसत्वमेव हि ॥
नृपेण कथमित्युक्ते, प्रोचुस्ते दक्षिणे स्थिता ॥ एषा कन्या सलावण्या, ह्यंगजा तव भूपते॥
जन्मन्येतां सुदुर्गंधां, तत्यजुर्दासिका वने ॥ क्रमेण कर्मयोगेन, तस्या दुर्गंधता गता ॥
भारंडपक्षिणा नीता, देशं मालवनामकम्॥ आरामे क्वापि तेनासौ, जीवंतीति समुज्झिता॥

तत्र खेटपुरं नाम पुरमस्ति महर्द्धिकम् ।। रामदेवस्ततश्चारामिकः स्वाराममाययौ ।।११७।।
पतिता वीक्षिता तेन, प्रागजन्मजनकेन सा ।। गृहीत्वा निजकांतायै, समर्प्य प्रतिपालिता ।।
आराममध्ये लब्धेयमिति वत्सलचेतसा ।। आरामनंदिनी नाम, तस्यास्तेन विनिर्ममे ।।
जाता षोडशवर्षीया, दृष्टा सर्पेण चान्यदा ।। मंत्रैः कृतप्रतीकाराप्यसाध्येति विनिश्चिता ।।
मंजूषायां च निक्षिप्य, नदीपूरे प्रवाहिता ।। आयातात्रगृहीतेयं, त्वया कौतुकतस्तदा ।।
पालिता फलराजीवदथ भोक्तुं त्वयेष्यते ।। अहो व्यामोहवृक्षाणामालवालायतेऽबलाः ।।
श्रुत्वेति भूपतिः प्रोचे, धिग्धिग् मे दुष्टचिंतितम्।। केनाप्यथो विवाह्यैतां, ग्रहीष्ये संयमं ध्रुवम्
इत्युक्त्वा भूपतिर्नत्वा, सूरींद्रान् सपरिच्छदः ।। गृहमागत्य भुक्त्वास्या, योग्यं वरमचिंतयत्
तस्यामेव त्रियामायां, जन्मक्षण इव क्षणात ।। तस्या शरीरे दौर्गंध्यदोषः पुनरवाप सः ।।
विभाते विविधैर्वैद्यवचनैर्वसुधाधवः ।। औषधं कारयामास, तस्या, आरोग्यहेतवे ।। १२६ ।।
अनीरुजांतामालोक्य, नीरजाक्षां नरेश्वरः ।। चिंतातुरो गुरुं नंतुमगात्तुर्ये दिने पुनः ।।
तस्याः स्वरूपे भूपेन, कथिते सति सूरयः ।। प्रोचिरे प्रायशः पुण्यांतरायाः प्रचुरा नृणाम् ।।



For Private and Personal Use Only

भूपः प्रोचे प्रभो यो मे, संयमस्य मनोरथः ॥ ससेत्स्यति न वा तस्या, नैरुज्यं वा भविष्यति
नैरुज्यं च विना तस्या, विवाहेऽप्यकृते सति ॥ संयमो नोचितो नूनं, हृदये रोचतेऽपि मे ॥
प्रभो ज्ञानधनोऽसि त्वं, ज्ञानिनां नास्त्यगोचरं ॥ मम संदेहसंदोहमपाकुरु कृपां कुरु॥१३१॥
सूरिः प्रोवाच भो भूप, भविता तव संयमः ॥ भविष्यति च नैरुज्यं, तस्याः किंत्वस्ति कौतुकम्
नैरुज्यं न विना पाणिग्रहं तच्च विना न तत् ॥ अन्योन्याश्रयदोषोऽत्र, कथमेकं निरस्यताम्॥
एवंविधायास्तस्याः कः, परिणेता भविष्यति॥ विना पाणिग्रहं तस्यारारोग्यं जायते नहि ।।
श्रुत्वेति चिंतया चांतःचेतसि क्षितिपे भृशम् ॥ तापं बिभ्रति सूरींद्रस्तं सिषेच वचोऽमृतैः॥
यदा पाणिग्रहं तस्या, गंधराजः करिष्यति ॥ तदा दुर्गंधतां सर्वामपि सो हि हरिष्यति ॥
श्रुत्वेति सदनं प्राप्तो नृपः सचिवमूचिवान् ॥ कारय स्वसुतं पाणिग्रहे मे कन्यया सह ॥
कृतांजलिरसौ प्रोचे, सुतो वैराग्यवासितः ॥ आस्तां विवाहो नारीणां, नामापि सहते नहि॥
विसृज्य मंत्रिणं भूपः, स्वांते बुद्धिं व्यचिंतयत् ॥ तत्पाणेर्ग्रहणं तेन, यथा स्यात्क्रियते तथा
प्रायो येनाध्वना याति, गंधराजो दिनात्यये ॥ निर्णीय स्थानके तत्र, भूपो गर्त्तामचीखनत्॥

शिक्षयित्वा सुतां देव्याः, सखीं चैकां नरेश्वरः ।। प्रेषयामास गर्त्तायाः, संनिधौ वासरात्यये ।।
सुखेन मध्येगर्त्ते तां, निवेश्य प्रथमं सखी ।। आयांतं गंधराजं च, दृष्ट्वा पूत्कारमातनोत् ।।
भोलोका धावत क्षिप्रं, गंधराज त्वरां भज ।। गर्त्तायां पतिता बाला, कृष्यतां म्रियतेऽन्यथा
आकर्ण्य गंधराजस्तत्, कृपापूरितमानसः ।। धावित्वा दक्षिणं हस्तं, तामाकष्टुमदात्तदा ।।
करेण दक्षिणेनेयं, गृहीता यावतातदा ।। गतो दुर्गंधतादोषस्तेनाकृष्य बहिष्कृता ।।
बहिर्गता सा तत्पाणिं, मुमुचे मोचितापि न ।। शुभलग्ने गृहीतोऽयं, न मया मुच्यते करः
तत्क्षणं मिलिता लोकाः, परेऽपि स्वजना अपि ।। भूपतिस्तत्पिता चापि, सर्वेऽप्येवं बभाषिरे
इयं बाला विशालाक्षी, वरं त्वामेव वांच्छति ।। ततो विवाहं मन्यस्व, काठिन्यं नोचितं तव
इत्यर्थितोऽसौ भूपेन, जनैस्तैः स्वजनैरपि ।। प्रशस्तांगीमुपायंस्त, तां महोत्सवपूर्वकम् ।।
तत्पाणिमोचने तस्मै, राज्यं राजा निजं ददौ ।। समं वरवधूभ्यां च, गुरुपादानवंदत ।।१५०।।
अप्राक्षीच्च प्रभा कस्मात्पुत्र्या दुर्गंधताभवत ।। प्रभावो गंधराजस्य, करे केन च कर्मणा
सूरिः प्राह पुरा हेमपुरे श्रेष्ठी शिवोऽभवत् ।। कमलाविमलानाम्न्यौ, द्वे भार्ये तस्य बंधुरे ।।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पूजयंती जिनं प्रोचे, विमला कमलां प्रति ॥ दुर्गमानीयतां धूपो, गंधपूजां करोम्यहम् ॥
सा प्रोचे कर्म कुर्वाणा, विना गंधं भवेन्न किम् ॥ जिनेंद्रस्याप्यहो देहे, कापि दुर्गंधतास्ति किम्
एवं हसंती संप्राप्तसाध्वीयुगलकेन सा ॥ भाषिता हेमहाभागे, जिननिंदां करोषि किम् ॥
सा मिथ्यादुःकृतं दत्वा, क्षमयामास तत्क्षणात ॥ एवं द्वितीयवेलायामपि तस्यास्तथाभवत् ॥
तथाच मुदिता चित्ते, तस्मै साध्वीद्वयाय सा ॥ दानं ददौ ततो भोगफलकर्मापि चार्जयत् ॥
मृत्वा सा ते सुता जाता, जिननिंदोत्थकर्मणा ॥ प्राप्तो दुर्गंधतादोषो, वारद्वयमभूत्ततः ॥
दानपुण्यप्रभावेण, राज्यसौख्यमुपेयुषी ॥ आरामनंदिनी सेयं, क्रमात्स्वर्गमुपैष्यति ॥
प्राच्यजन्मन्यसौ गंधराजः श्रीहस्तिनापुरे ॥ श्रेष्ठिनो धनदत्तस्य, श्रीदत्ताख्यः सुताऽभवत्
पूजायां क्रियमाणायां, धूपपूजामुना कृता ॥ तेन पुण्यप्रभावेण, प्राज्यराज्यमभूदिदम् ॥
धूपपूजाविशेषेण, प्रभावोऽस्य करेऽभवत् ॥ यथा तव सुता नीरुक्, तथान्योपि भवत्यतः
श्रुत्वा पूर्वभवं गंधराजो जातिस्मरोऽभवत् ॥ विशेषादार्हतं धर्मं, प्रपेदे गुरुसंनिधौ ॥१२३॥
नृपः सिंहस्ततःपार्श्वे, सूरेः संयममग्रहीत ॥ गंधराजः पुरं गत्वा, निजराज्यमपालयत् ॥



For Private and Personal Use Only

अन्यदा तत्र संप्राप्ता, जयशेखरसूरयः ।। धर्मोपदेशं गत्वासौ, शुश्राव सपरिच्छदः ।।१६५।।
आरामनंदिनीकुक्षिजातं नंदननामकम् ।। राजा न्यस्य सुतं राज्ये, तेषां पार्श्वेऽग्रहीद्व्रतम्
प्रपाल्य निरतीचारं, चारु चारित्रमुज्वलम् ।। विहितानशनः प्रांते, सौधर्मे त्रिदशोऽभवत् ।।
चिरं सुखान्यसौ भुक्त्वा, देवलोकात्ततश्च्युतः ।। तनयस्तव संजज्ञे, चक्रपाणिश्चतुर्दशः ।।

॥ इति धूपपूजायां श्रीदत्तकथा समाप्ता. ॥

गीतपूजा कृता येन, फलं तस्य निगद्यते ।। अस्ति जांबुनदं नाम, नगरं कुरुमंडले ।।
महीपालाभिधो भूपस्तत्र रूपमनोभवः ।। तस्य रूपवती भार्या, नामतः परिणामतः ।।
तनुजो धनदत्तस्य, शंखस्तत्कुक्षिमागतः ।. समये स तयासूत, पिता चक्रे महोत्सवम् ।।
मकरध्वज इत्याख्यां, प्रीत्या तस्मै ददौ पिता ।। गीतप्रिय इति प्रोचे, जनैर्गीतप्रियत्वतः ।।
क्रमेण वर्द्धमानोऽसौ, कलाकौशल्यबंधुरः ।। लसल्लावण्यलीलावांस्तारं तारुण्यमाप सः ।।
गीतं शुश्राव जैनेंद्रं, श्रुत्वासौ मुदितोऽभवत् ।। गीतानि यैश्च गीयंते, तेभ्यो दानं परं ददौ ।।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



जगौ गीतं स्वयं सोऽपि, निजरंगतरंगितः ॥ हंसकोकिलमुख्यानां, जयं कृत्वा स्वकंठतः ॥
अभूत्प्रवीणो वीणाया, वादनेऽसौ विशेषतः ॥ अशेषतत्वं वर्ण्यानामज्ञासीद्वर्ण्यतोयधीः ॥
अन्येद्युः सहितो मित्रैर्गत्वासौ जिनमंदिरम् ॥ जिनं नत्वा प्रमोदेन, पुरो गीतं जगौ प्रभोः ॥
पुनः प्रभुमसौ नत्वा, यावन्निजगृहं ययौ ॥ तावदारामिको मालां, ढौकयामास तत्पुरः ॥
चंचच्चंपकपुष्पाणां मालामालोक्य भूपभूः । इषुं मदनवीरेण, प्रहितं तामतर्कयत् ॥१७९॥
भ्रामंभ्रामं च कुर्वाणं, झंकारान्मधुरस्वम् ॥ हेमवर्णमसौ भृंगं, मालास्थितमलोकयत् ॥१८०॥
शुका निला सिता हंसाः, भ्रमराः कृष्णवर्णकाः ॥ विपरीतमिदं किंतु, येनालिः कनकप्रभः ॥
यादृग्वर्णास्ति मालासौ, तादृग्वर्णो मधुव्रतः ॥ सदृशं सदृशेनेदं, संगतं शोभतेऽथवा ॥
एवं तस्मिन्वदत्येव, भृंगो मर्त्यगिरा जगौ ॥ माला गंधर्वमाला सा, त्वं चास्यां भ्रमरो भव
गंधर्वमाला वरांगी, त्वं चासि कनकप्रभः ॥ उभयोर्जायतां योगो, जगदानंदहेतवे ॥१८४॥
तच्छ्रुत्वा भूपभूर्दध्यौ, जल्पंतो वीक्षिताः शुकाः ॥ भ्रमरा न पुनः क्वापि, महदेव कुतूहलम्
गंधर्वमाला बाला का, कुतस्तस्याश्च संगमः ॥ केवलं भ्रमरो नासौ, खेचरो वामरोऽस्तु वा



For Private and Personal Use Only

एवमेव वदत्यस्मिन्नलिरूपं विहाय सः ॥ तत्क्षणं खेचरो जज्ञे, सर्वालंकारसुंदरः ॥१८७॥
गुग० विलोक्य विलसत्कांतिं, तं चित्राद्भूपभूर्जगौ ॥ कस्त्वं भो खेचरं मन्ये, स्पृशद्भिश्चरणैर्भुवम् चरित्र.
।१२४। स प्राह शृणु वैताढये, पुरे संगीतनामनि ॥ वर्त्तते गीतरत्याख्यः, खेचराणां शिरोमणिः ॥
जयादेवीप्रसूतास्य, सुता कनकमालिका ॥ मयोढा वेगवन्नाम्ना, मणिचूडस्य सूनुना ॥
तस्या एवानुजा संप्रत्यस्ति गीतरतेः सुता ॥ बाला गंधर्वमालाख्या, शाला सर्वगुणावलेः ॥
वीणायां सुप्रवीणा सा, गीतागमे सुकौशला ॥ इति प्रतिज्ञामादत्त, सखीवृंदसमक्षकम् ॥
विजेष्यते यो वीणायां, गीतगानेऽपि मां नरः ॥ स खेचरःपरो वास्तु, वरणीयः स एव मे
तत्र विद्याधराः सर्वे, मिलिष्यंति महाबलाः ॥ अबलाया मनस्तस्या, न जाने को ग्रहीष्यति
अद्य स्वयंवरो भावी, सांप्रतं तत्र पत्तने ॥ अस्मिन्नवसरे सोऽहं, वेगवानागतो भुवम् ॥
अदृश्य एव प्राप्तः प्राक्, पुरं तव मनोहरम् ॥ भक्त्या प्रणतवानस्मि, जिनेंद्रान् जिनमंदिरे॥
भवांस्तत्र मया दृष्टो, जिनेंद्रमुपवीणयन्॥ त्वां वीक्ष्य तस्या योग्योऽयमेवेति हृदि चिंतितम्॥ ।१२४।
नत्वा जिनं त्वामायातमत्र मित्रत्वसस्पृहः ॥ उपकर्तुमनास्तस्या, विवाहेनाहमागतः ॥

कृत्वा चंपकमालास्थं, हेमवर्णं मधुव्रतम् ॥ औचित्यं च वचस्तस्या, योगतः कथितं मया
त्वमागच्छ मया साकं, यथा नीत्वा क्षणादपि ॥ तस्याःपाणिग्रहं तत्र, कारये सुहृदं निजम्
कारणं समवाप्यात्र, त्वद्गुणा एव बंधुराः ॥ निमित्तं पुनरेषोस्मि, तद्विवाहविधावहम् ॥
मदीयकांतया तस्याः, स्वस्रा नैमित्तिकोत्तमः ॥ पृष्टः प्रोवाच तद्योग्यं, वरं भूचरमेव हि॥
एतेनाप्यनुमानेन, सा कांता ते भविष्यति ॥ मा शंकिष्ठाः प्रयासस्य, वैफल्यं हृदये निजे॥
इत्युक्त्वा हंसरूपेण, तमारोप्य निजोपरि ॥ असौ स्वयंवरं प्राप्तोऽस्थापयत्तं च विष्टरे ॥
खेचरेषु समग्रेषु, विरेजे तत्र सोऽधिकम्॥ प्रस्फुरत्कांतिसंभारस्तारकेष्विव चंद्रमाः ॥
गंधर्वमाला बिभ्राणा, वीणां वामकरे निजे ॥ मालां च दक्षिणे पाणौ, स्वयंवरमथाययौ ॥
प्रतीहारी जगादेति, भो भोः शृणुत खेचराः ॥ कन्या प्रतिज्ञाश्लोकं च, पपाठेति मनोज्ञवाक्॥
विजेष्यते यो वीणायां, गीतगानेऽपि मां नरः ॥ खेचरो वा परोवास्तु, वरणीयः स एव मे
श्रुत्वेति शक्तिः कस्यापि, न तां जेतुं खगेष्वभूत् ॥ नीचैर्मुखतया नीता, वधूत्वं ते स्वयं तया
मित्रेण प्रेरितः प्रोच्चैर्गीतप्रियस्तदावदत् ॥ मुग्धेऽहं गर्वसर्वस्वं, क्षणादपनयामि ते ॥२१०॥



For Private and Personal Use Only

वादयस्व स्वयं वीणां, गीतगानपुरःसरम् ॥ ततोऽहमपि तत्कुर्वे, ज्ञायते कौशलं यथा ॥
मूर्त्तेव भारती देवी, वीणामादाय सा ततः ॥ जगौ गीतं गुणैः स्फीतं, रंजितः सकलो जनः
गीतप्रियोऽपि मित्रेण, दत्तां वीणामवादयत ॥ इयं गर्भवती वीणेत्युक्त्वा लोकमहासयत् ॥
लोकैःकथमिति प्रोक्ते, स प्रोचे कर्करोऽत्र यत्॥आदौ घृष्यति वीणाया दंडमध्ये स्थितोऽस्ति भोः
वीणां विदार्य तं वीक्ष्य, विस्मिते सकले जने ॥ गंधर्वमाला वीणां स्वां, तस्य हस्ते समर्पयत्॥
तुंबुरुर्नारदो वासौ, पुंरूपा वा सरस्वती ॥ तां वीणां वादयत्यस्मिन्न कस्तत्र व्यतर्कयत् ॥
गीते च गीते जैनेये, वर्ण्यभाषामनोहरे ॥ गंधर्वमालया साकं, रंजिताः सर्वखेचराः ॥
अचैतन्यं तथा तेषां, जज्ञे गीतं च शृण्वताम् ॥ मित्रेग हारयामास, यथासौ तद्विभूषणम् ॥
कस्यचित्कुंडलं कर्णाद्भुजात्कस्यचनांगदम् ॥ मित्रेण कौतुकाज्जह्रे, करात्तस्याश्च कंकणम्
गीते मुक्ते ततस्तेन, सर्वे जाताः सचेतनाः ॥ रिक्तमाभरणैरंगं, दृष्ट्वान्योऽन्यं व्यलोकयन्
स्मित्वा तद्भूषणे दत्ते, विचेतन्योक्तिपूर्वकम् ॥ गंधर्वमाला तत्कंठे, वरमालां मुदाक्षिपत् ॥
तयोर्विवाहे संजाते, रूपलावण्यतुल्ययोः ॥ सदृशं सदृशेनैव, भातीति जनता जगौ ॥



For Private and Personal Use Only

विसृष्टाः खेचराः सर्वे, ययुर्निजपुराण्यथ ।। गंधर्वमालया रेमे, तत्रासौ सुस्थितश्चिरम् ।।
अन्येद्युः स तया साकं, खेचरैः परिवारितः ।। वर्यं विमानमारूढो, जांबूनदपुरं ययौ ।।
तदैवालानमुन्मूल्य, पट्टहस्ती नरेशितुः ।। मत्तश्चचाल विंध्याद्रिं, स्मृत्वा पर्वतसंनिभः ।।
तुरंगांस्त्रासयंस्तूर्णं, रथान्विश्लथयन्नथ ।। नाशयन्नरनारीश्च, स चक्रे व्याकुलं पुरम् ।।२२६।।
जगौ राजा गवाक्षस्थो, यो वशं कुरुते गजम् ।। ददे राज्यार्द्धमप्यस्मै, तत्पुनः श्रूयते न कैः ।।
गीतप्रियस्तदालोक्य, व्याकुलत्वं निजे पुरे ।। करेणुं तं वशं कर्तुं, वीणां दध्रे निजे करे ।।
गायति स्म तथा गीतं, वीणयासौ मनोहरम् ।। श्रुत्वा शांतो यथा हस्ती, हृष्टश्च सकलो जनः ।।
ततो विशेषतस्तत्र, जायमाने महोत्सवे ।। गत्वा सभां पितुः पादौ, स ननाम सखेचरः ।।
नामग्राहं कुमारेण, ज्ञपितान् सह समागतान् ।। भूपतिः प्रीणयामास, प्रतिपत्त्या नभश्चरान् ।।
गंधर्वमालामालोक्य पतंतीं निजपादयोः ।। श्वश्रूः स्वचित्ते हृष्टा तां, प्रीणयामास चाशिषा ।।
विसृज्य खेचरान् सर्वान्, न्यस्य राज्ये निजं सुतम् ।। स्वर्लोकं साधयामास, भूपतिर्धर्मकर्मणा ।। ।१२७।
गंधर्वमालया साकं, रममाणः स्वतुल्यया ।। स्वराज्यं पालयामास, गीतप्रियनरेश्वरः ।।२३४।।

अन्येद्युरागतास्तत्राभयसिंहेति सूरयः ।। तान्नंतुं सपरिवारो, ययौ गीतप्रियो नृपः ।।२३५।।
नत्वा श्रुत्वोपदेशं च, पप्रच्छ स्वभवं नृपः ।। प्रोचिरे सूरयस्तं च, पुरतस्तस्य विस्तरात् ।।
हस्तिनागपुरे श्रेष्ठी, धनदत्ताभिधोऽभवत् ।। शंखनामा सुतस्तस्य, गीतपूजामसौ व्यधात् ।।
जिनपूजाप्रभावेण, प्राज्यं राज्यमभूदिदम् ।। गीतपूजाविशेषेण, गीतंसफलतामगात् ।।
गीताद्गंधर्वमालाप्ता गीताद्वश्यो गजः कृतः ।।अनंतफलमित्याहुर्जिनगीतार्चनं जिनाः ।।
इद गीतप्रियः श्रुत्वा, तदा जातिस्मरोऽभवत् ।। विशेषादार्हतं धर्मं, प्रपेदे गुरुसंनिधौ ।।
मुनिं नत्वा गृहं गत्वा, पालयित्वा चिरं भुवम् ।। पत्न्यां गंधर्वमालायां, पुत्रं सोममजीजनत् ।।
पुनःप्राप्तेषु तेष्वेव, सूरींद्रेषु नरेश्वरः ।। श्रुत्वोपदेशं संप्राप, वैराग्यं पापनाशनम् ।। २४२ ।।
ततो राज्यं स्वपुत्राय, महोत्सवपुरःसरम् ।। दत्वा गुरूणां पार्श्वेऽसौ, चारु चारित्रमग्रहीत् ।।
प्रपाल्य निरतीचारं, सारं संयममुज्ज्वलम् ।। विहितानशनः प्रांते, सौधर्मे त्रिदशोऽभवत् ।।
चिरं सुखान्यसौ भुक्त्वा, देवलोकात्ततश्च्युतः ।। पूर्णः पंचदशोजातस्तनयस्तव भूपते ।।

।। इति गीतपूजायां शंखकथा. ।।

वाद्यपूजा कृता येन, फलं तस्य निगद्यते ॥ कमलापुरमित्याख्यं, पुरमस्ति मनोहरम् ॥
कीर्तिचंद्रो नृपस्तत्र, कीर्तिनिर्जितचंद्रमाः ॥ प्रिया यशोमती तस्य, यशस्तर्जितमल्लिका ॥
तनुजो धनदत्तस्य, धर्मस्तत्कुक्षिमागतः ॥ दोहदावसरे तस्या, दोहदोऽयमभूदिति ॥
सा जानाति समारुह्य, मृगारातिं महोत्कटम् । अनाहतेषु वाद्येषु, नदत्सु व्योमवर्त्मनि॥
सभूपा सपरिवारा, पौरलोकैर्विलोकिता ॥ करोमि नगरे चैत्यपरिपाटीमहं मुदा ॥२५०॥
अनेनापूर्यमाणेन, दोहदेन कृशामिमाम् ॥ सखीभिः प्रश्नयामास, भूपतिस्तन्मनोरथम्॥
ज्ञाते दोहदवृत्तांते, भूकांतेन मनीषिणः ॥ मंत्रिणः प्रोचिरे कश्चिदुपायः क्रियतां द्रुतम्॥
येन प्रपूर्यते देव्या, दोहदो हृदये स्थितः ॥ अन्यथा सा कथाशेषा दिनैःस्तोकैर्भविष्यति॥
मंत्रिणः कथयामासुरन्योपायो न कश्चन ॥ दर्शयद्भिः परं लोभं, दाप्यते पट्टहं पुरे ॥२५४॥
आद्ययामे नृपादेशात्प्रोचुः पट्टहदायकाः ॥ स एकं लभते लक्षं, यः पूरयति दोहदम् ॥
यामे द्वितीये घस्रस्य, प्रोचुः पट्टहदायकाः ॥ द्वे लक्षे लभते सैष, यः पूरपति दोहदम्॥
एवं तृतीयतुर्यादियामेषु जगतीपतेः ॥ आदेशाद्वर्द्धयामासुर्लक्षमेकं नराः क्रमात् ॥२५७॥

षड्लक्ष्यामपि जातायां, निशीथसमये ततः ॥ नास्पृशत्पटहं कोऽपि, देव्यासीदाकुला पुनः
राज्यार्द्धं क्रमतः पुत्र्यां, प्रोक्तायां च नृपाज्ञया ॥ अस्पृशत्पटहं विप्रः, क्षिप्रमागत्य कश्चन॥
विभातायां विभावर्यां, ददृशुस्ते नरा द्विजम् ॥ कुरूपं कुत्सितं कुब्जं, कृष्णवर्णं च वामनम्
विज्ञातपटहस्पर्शवृत्तांतप्रीणिते नृपे ॥ नृपस्य पुरुषा विप्रं, निन्यिरे नृपसंनिधौ ॥ २३१॥
विषण्णचेताः सर्वोऽपि, तं विलोक्याभवज्जनः ॥ नृपतिस्तु विशेषेण, तेन देयास्य यत्सुता
मुंचतो गृह्णतो वापि, नाभवत्काचिदौचिती ॥ वीक्ष्य ततो हृदः पूर्णोन दत्ता चैव कन्यका
विप्रः प्रोचे विलंबोऽत्र, राजन्मे जायते वृथा ॥ कार्यं कृतेन कार्यैण, यदि तत्कारय द्रुतम्
कुरूपत्वं ममालोक्य, बुध्द्या किं खिद्यसे मुधा ॥ कुरूपो वा सुरूपो वा, कार्यकर्त्ता विलोक्यते
राजादनादपि प्रायो, रिंगणं रूपतोऽधिकम् ॥ किं क्रियेत पुनस्तेन, येन कार्यं न सिद्ध्यति
कोकिलानां स्वरो रूपं, नारीरूपं पतिव्रता ॥ विद्यारूपं कुरूपाणां, क्षमारूपं तपस्विनाम् ॥
भूपतिर्मंत्रिणं प्रोचे, तद्विलंबक्रिया कुतः ॥ अनेन कार्यतां कार्यं, जीवतात् सा यथा तथा॥
मंत्री प्राह प्रभो तथ्यं, परमास्त विचारणा ॥ कृते कार्ये प्रदातव्यमस्मै सर्वं निवेदितम् ॥



For Private and Personal Use Only

गुण० चरित्र.

॥१३१॥

राज्यार्द्धदाने विप्राय, विलंबो न भवेत्तव ॥ कन्या कुतस्तु दातव्या, तस्या यद्वर्तते न सा
सचिंते राज्ञि कोऽप्यूचे, राज्ञी ते विजयास्ति या ॥ श्यामा नाम्नी सुता तस्याः, सैव तस्मै प्रदीयते
मंत्री प्रोचे त्वया रम्यमुक्तं सा चेन्न दास्यति ॥ ततःकोऽपि बलात्कारो, भविता किं तया सह
ततो राजा स्वयं गत्वा, तामाचख्यौ विचक्षणः ॥ प्रदीयतां निजा पुत्री, तस्मै विप्राय वल्लभे
सा रुष्यंती नृपं प्रोचे, वरं कूपे जलेऽनले ॥ वरं व्याघ्रमुखे पुत्रीं, क्षिपे नास्मै ददे पुनः ॥
सचिवास्तां प्रतिप्राहुराज्ञा राज्ञो विधीयते ॥ अभीष्टान्यप्यन्यानि, स्वात्मतो वल्लभानि न ॥
त्यजेदेकं कुलस्यार्थे, ग्रामस्यार्थे कुलं त्यजेत् ॥ ग्रामं जनपदस्यार्थे, स्वात्मार्थे पृथिवीं त्यजेत्
अपूर्णे दोहदे देवी, मृत्युं याति यशोमती ॥ तस्यां मृतायां गर्भश्च, निश्चितं स विनश्यति
ततः परं नृपस्यापि, नित्यं दुखार्त्तचेतसः ॥ अरम्यं भावि चेत्तर्हि, कन्यायाः किं करिष्यसि ॥
ततो विमृश्यतां पुत्रीमस्मै देहि द्विजन्मने ॥ राजापि प्रीणितस्तुभ्यं, दास्यते बहुमान्यताम्
ततः सोवाच यत्कार्यं, कथ्यते समये मया ॥ स्वामिना तद्विधातव्यमिति मे प्रतिपद्यताम् ॥ ॥१३१॥
तेन प्रपन्ने तद्दत्ता, श्यामा श्यामाननाभवत् ॥ तामालोक्य नृपो दध्याविती व्याघ्र इतस्तटी ॥

सदाकारा सलावण्या, नेत्रनिर्जितपंकजा ॥ सेयं चंद्रमुखी कन्या, कथं तस्मै प्रदीयते ॥
कल्पवल्ली कथं देया, करभाय सुकोमला ॥ करीर एव तद्योग्यः, कर्कशः कंटकीतनुः ॥
तथाप्यहं कथं कुर्वे, प्रियागर्भोऽस्ति भाग्यवान् ॥ विप्रोऽपि भाग्यवानस्ति, दोहदेनामुना ध्रुवम् ॥
ततो द्वयस्य रक्षार्थं, श्यामिका दीयते मया ॥ अपत्यान्यपि दीयंतेंऽतराले ज्वलितेऽनले ॥
न पुत्री पितृपुण्या स्यादात्मपुण्यैव सा भवेत् ॥ तत्का चिंतेत्यसौ ध्यात्वा, धरानाथःसभां ययौ ॥
भूपतिं मंत्रिणः प्राहुः पुनर्विप्रं विलोक्यताम् ॥ अत्र नास्ति कला काचिदाकारोऽपि वदत्यदः ॥
आकारसदृशप्रज्ञः, प्रज्ञया सदृशागमः ॥ आगमैः सदृशारंभः, प्रारंभसदृशोदयः ॥२८८॥
ततो विप्रं नृपः प्राह, सत्यं भो क्षिप्रमुच्यताम् ॥ कलाप्राप्तिः कुतस्तेऽभूद्दोहदः पूर्यते यया ॥
स प्रोवाच महाराज, पुरं राजपुरं परम् ॥ तत्रास्ति ब्राह्मणश्चैत्रस्तस्य जातावुभौ सुतौ ॥२९०॥
एको भट्टिलनामासीदपरः स्कंदिलःपुनः ॥ भट्टिलोऽभूत्सलावण्यः, सदाकारो मनोरमः ॥
स मान्यः सर्वलोकानां, जातः पितुरनंतरम् ॥ स्कंदिलस्त्वीदृशाकारो, निर्गतो नगराद्बहिः ॥
वाणारस्यामसौ गत्वाचले मृत्युकृतेऽचटत् ॥ तत्र संन्यासिकेनोचे, केनाप्येष कृपालुना ॥
अकालेऽपि त्वया मृत्युः, कथमेवं विधीयते ॥ स प्रोचे निजदौस्थ्यं च, कुरूपत्वं च तत्पुरः ॥



For Private and Personal Use Only

स प्राह भव सोत्साहः, कुरूपत्वेऽपि यत्तव ।। राज्यं संपत्स्यते प्राज्यं, रम्या रामा च निश्चितम्
कलामेकां प्रदास्यामि, रंजितो भूपतिर्यया ।। अर्द्धराज्यं च कन्यां च, स्वयमेव प्रदास्यति ।।
ततस्त्वया तया साकं, कार्यं केलिकुतूहलम् ।। अधुना मृत्युना किं ते, गृह्यतां जन्मनः फलम्
आराध्यतां त्वया देवी, भवानी सिंहवाहना ।। सा तुष्टा सर्वकार्याणि, करिष्यति तवान्वहम् ।।
तदाराधनविद्या मे, दत्ता तेन मनीषिणा ।। साधयित्वा च तां सोऽहं, संप्राप्तोऽस्मि तवांतिकम्
नृपः प्रोचे ततः शीघ्रं, कुरुष्व निजसज्जताम् ।। अथासावुत्थितोऽचालीत्सिंहानयनहेतवे ।।
लोकैः परिगतो गत्वा, वनांतर्मंत्रपूर्वकम् ।। पूर्वस्यां दिशि चिक्षेप, साक्षेपं सर्षपानसौ ।।
कृतफाले मृगेंद्रेऽथ, समेते सति बिभ्यतम् ।। लोकं निवार्य हस्तेन, तं दध्रे केसरेष्वसौ ।।
तं मत्तं वृषवद्धृत्वा, भापयंतमपि प्रजाः ।। आनीय भूपतेर्द्वारे, स्थापयामास चंचलम् ।।
आनीयतामथो देवी, सिंहमारोप्यतामिति ।। कथिते तेन सा प्रीता, प्राप्ता तत्र यशोमती ।।
चंचलत्वं विशेषेण, तदा सिंहे प्रकुर्वति ।। भूपः प्रोवाच भो राज्ञीं, त्वमेवारोपय स्वयम् ।।
श्रुत्वेत्यचिंतयच्चित्ते, जनः पश्यन् परस्परम् ।। वामनोऽ कथंकारं, राज्ञीमारोपयिष्यति ।।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तामालिंग्य दृढं दोर्भ्यां, सिंहपृष्ठेऽधिरोपणम् ॥ तस्य कारयतस्तूर्णमंगाद्धामनता गता ॥
गुण० लोके सविस्मये सिंहे, तामारोप्यसमाधिना॥सोऽस्याः पार्श्वस्थितोऽचालीत्, सभूपाश्च जनाःपुरः चरित्र.
॥१३४॥ अनाहतेषु वाद्येषु, श्रूयमाणेषु सर्वतः ॥ देवी सिंहसमारूढा, पौरैर्गौरीव वीक्षिता ॥३०९॥
प्रणम्य सर्वचैत्यानि, कृत्वा तत्र महोत्सवम् ॥ पुनर्मंदिरमायाता, तेनैवोत्तारिता च सा ॥
तस्यां प्रीणितचित्तायां, संप्राप्तायां स्वमंदिरे ॥ विप्रो व्यलोकयद्भूपं, राज्यकन्याभिलाषुकः
तेन तन्निश्चये दत्ते, मृगेंद्रं स व्यसर्जयत् ॥ स च विद्युल्लताकारं, दर्शयन्नभसा ययौ ॥
प्रदाय तस्मै राज्यार्द्धं, नृपः श्यामामजूहवत् ॥ रुदत्यागाज्जनन्या सा, साकमाकुलिताशया।
श्यामां श्यामामिव श्यामामश्यामो भूपतिरपि ॥ तत्पार्श्वे स्थापयामास, विवाहावसरे स्वयम्॥
स्वरूपस्य स्वरूपं यो, पश्यन्नस्याः करग्रहम् ॥ करिष्यति न लज्जास्य, परेभ्यः स्वात्मनोऽपि च
एवं जल्पति सर्वस्मिँल्लोके शोकेन संकुले ॥ करेण तस्य कन्यायाः, करोऽयोजि पुरोधसा
संजाते तत्करश्लेषे, तत्क्षणं तां कुरूपताम् ॥ विहाय खेचरः सोऽभूद्दिव्यरूपो विभूषितः॥ ॥१३४॥
हारकुंडलकोटीरकांतिमंडलमंडितः ॥ आखंडल इवाखंडलावण्योऽसौ विरेजिवान् ॥३१८॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तद्वक्त्रं पूर्णचंद्राभं, तदालोक्य हसन्मुखी ॥ अराकापि बभौ राका, श्यामा श्यामापि कांतितः ॥
पद्मिनीवत्सुवक्रापि, प्रच्छन्नलोचनांचलैः ॥ पायं पायं तदास्येंदुं, श्यामा तृप्तिमवाप न ॥
असौ भाग्यवती श्यामा, यस्याः सौभाग्यसुंदरः ॥ पुरंदर इव प्रेयान्, प्राप्तोऽयं पुण्ययोगतः ॥
तज्जनन्यां च लोके च, जल्पत्येवं महीपतिः । श्यामाखेचरयोश्चक्रे, पाणिग्रहमहोत्सवम् ॥
नृपो जामातरं प्रोचे, जातं किमिदमद्भुतम् ॥ स जगावस्ति वैताढ्ये, पुरं गगनवल्लभम् ॥
मणिकुंडलरत्नाभनामनौ तत्र खेचरौ ॥ तौ प्रीत्या पर्वतं प्राप्तौ, ह्रीमंतं सुहृदौ मिथः ॥
विद्यां साधयितुं तत्र, स्थितोऽसौ मणिकुंडलः ॥ रत्नाभः प्रेषितस्तेनापहाराय निजे पुरे ॥
सत्वरं स स्वमित्रार्थं, गच्छन् गगनवर्त्मना ॥ स्खलितश्चिंतयांचक्रे, कःपापो यो रुणद्धि माम् ॥
अधो गवेषयन्नेष, पश्यतिस्म तपस्विनम् ॥ कुरूपंकुत्सितं कुब्जं, कृष्णवर्णं च वामनम् ॥
रूपं दृष्ट्वा हसित्वा च, तं बभाषे स खेचरः ॥ करोषि स्खलनं कस्मान्मित्रार्थे मम गच्छतः ॥
नीलां कुरूपतामेतां, विलोक्यापि न लज्जसे ॥ धिक् तपस्ते मुधा क्लेशं, यो हि त्वं सहसेऽनिशम् ॥
इति तद्वचसा क्रुद्धः स तपस्वी शशाप तम् ॥ रे खेचर दुराचार, भवान् भवतु मादृशः ॥



For Private and Personal Use Only

गुण० चरित्र

॥१३६॥

ततो निपतितो व्योम्नः, सोऽभूत्तादृश एव हि ॥ पतित्वा पादयोस्तं च क्षमयामास खेचरः ॥
अज्ञानस्यापराधं मे, क्षमस्वैकं क्षमाधर ॥ इत्युक्तः शांतहृत् किंचित्तपस्वी प्रति तं जगौ ॥
भूपप्रियापरिरंभे, वामनत्वं गमिष्यति ॥ प्रयास्यति कुरूपत्वं, राजकन्याकरग्रहे ॥३३३॥
श्रुत्वेति खेचरो दध्याविदं मे घटते नहि ॥ कुरूपता ततः सेयं, यावज्जीवं समागता ॥
राज्ञः प्रियायाः कन्याया, दर्शनं मम दुर्लभम् ॥ संभवेताम् कुतस्ताहि, परीरंभकरग्रहौ ॥
परीरंभं परस्त्रीणां, वारयंतिस्वयं बुधाः ॥ अयं तु कारयत्येतं, तत्त्वं तन्नावबुध्यते ॥
एवं मह्यं कुरूपाय, दत्तेऽन्योऽपि न कन्यकाम् ॥ कुतस्तद्राजकन्यायाः, पाणिग्रहणसंभवः ॥
वीरेण कपिलादानं, कालान्महिषरक्षणम् ॥ श्रेणिकाय यथा प्रोक्तं, तथानेन ममाप्यदः ॥
विधिद्वारा निषेधोऽयमनेन कथितो मम ॥ भेरीभुंभुं तरुच्छायायोगो रोगापहो यथा ॥
इत्यादि ध्यायतस्तस्य, वने तत्रैव तस्थुषः ॥ गृहं साधितविद्योऽगात्तान्मत्रं मणिकुंडलः ॥
अदृष्ट्वा सुहृदं क्वापि, सर्वत्रासौ परिभ्रमन् ॥ वने तत्रैव संप्राप, यत्र तिष्ठति तत्सखाः ॥ ॥१३६॥
उपलक्ष्य निजं मित्रं, साश्रुदृक् मणिकुंडलम् ॥ सुहृत् कुरूपो वृत्तांतं, बभाषे शापमोक्षयोः ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रुत्वेति स परिभ्राम्यन्नाययौ नगरं तव ।। ज्ञात्वा दोहदवृत्तांतं, पुनर्मित्रांतिकं ययौ ।।
वामनत्वकुरूपत्वमोक्षोऽत्रैव भविष्यति ।। इति तेन सामानीय, स्थापितोऽयं पुरे तव ।।
मणिकुंडलसांनिध्यात्, कार्यं कृत्वा ततस्तव ।। वामनत्वकुरूपत्वमोक्षं प्राप क्षणादसौ ।।
सिंहारोपे प्रियायास्ते, वामनत्वमसौ जहौ ।। श्यामायाः करसंश्लेषे, कुरूपत्वं च सोऽमुचत्
सोऽहं रत्नाभनामास्मि, खेचरो निजरूपभाक् ।। भद्दिलस्कंदिलाद्यं यत्तत्सर्वं कल्पितं मम।।
उत्तमानां हि सांगत्यादुत्तमत्वं भजेन्नरः ।। सुवर्णचूर्णसंयोगाल्लोहं भवति कांचनम् ।।
इत्युक्त्वा निजवृत्तांतं, प्रीणिताशेषसज्जनः ।। भूपतेराग्रहात्तस्थौ, कियत्कालं स खेचरः
अनुज्ञाप्य महीनाथमन्येद्युः श्यामया सह ।। कृत्वा विमानमारुह्य, ययौ वैताढ्यपर्वतम् ।।
संपूर्णदोहदा सेयमित्थं देवी यशोमती ।। समये सुषुवे पुत्रं, पवित्रद्युतिशालिनम्।।२५१।।
अतुच्छमुत्सवं कृत्वा, सर्वत्र नगरे निजे ।। सिंहनाद इति प्रीत्या, तस्मै नाम ददौ पिता।।
कलाकलापकौशल्य-वल्लीवासमहीरुहः।। लसल्लावण्यलीलावांस्तारं तारुण्यमाप सः ।।२५३।।
ततो विजयसेनाख्यो, विजयायाः सुतोऽभवत् ।। क्रमेण ववृधे सोऽपि, कलालावण्यबंधुरः



For Private and Personal Use Only

शत्रुमर्दनभूपस्य, द्वे कन्ये परिणायितौ ॥ तौ द्वावपि मुदा क्रीडां, चक्रतुः स्वेच्छया सदा
गुण० अन्येद्युर्भूपतिः प्राह, मंत्रिणं प्रति धर्मधीः ॥ स्वराज्यं सिंहनादाय, दत्वा लास्यामि संयमम् चरित्र.
।१३८। तद् ज्ञात्वा विजया दध्यौ, प्रागदत्तोऽस्ति वरो मम ॥ तेन स्वस्वामिना राज्यं, निजपुत्राय दापये
श्रुतायामिति वार्त्तायां, भूपश्चित्ते व्यचिंतयत् ॥ कुत्र स्थाने गृहीतोऽस्मि, तयाप्यबलयाधुना
इति चिंतयति क्ष्मापे, वनपालो व्यजिज्ञपत् ॥ समेताः कानने संति, प्रभो श्रीप्रभसूरयः ॥
श्रुत्वेति भूपतिः कांताद्वितीयेन समन्वितः ॥ जगाम सपरिवारः, सूरीन्नंतुं महोत्सवात् ॥
तत्र गत्वा गुरून्नत्वा, निविष्टो भूपतिः पुरः ॥ शुश्राव क्लेशनाशाय, पेशलां देशनामिति
मित्रपुत्रकलत्राणि, विघटंते क्षणात्पुनः ॥ सम्यगाराधितो धर्मो, न जंतुषु कदाचन॥३६२॥
देशनामित्यसौ श्रुत्वा, प्रबुद्धहृदयोऽभवत् ॥ नृपः पुनर्गुरून्नत्वा, जगाम निजमंदिरम् ॥
निविश्य मंत्रिभिर्यावद्राज्यचिंतां करोत्यसौ ॥ तावत्तत्र समायाता, विजया वीक्ष्यतेस्म सा
मदीयमानसे योऽस्ति, मनोरथतरुर्महान् ॥ तद्भंजनार्थमायाता, विजया करिणीसमा ॥ ।१३८।
इति ध्यायति भूपे सा, निविष्टा भद्रविष्टरे ॥ इत्येवं स्पष्टमाचष्ट, प्राणेश श्रूयतां वचः ॥

यः पूर्वं मे प्रदत्तोऽस्ति, वरं स्मरसि तं प्रिय ।। यदि स्मरसि तन्नाथ, यद्याचे तत्प्रसादय ।।
गुण० ततस्तु भूपतिर्दध्यावनिष्टत्वेन तद्‌गिरि ।। विस्तरेण तया व्याप्तं, कार्यमेव न जल्प्यते ।। चरित्र
।।१३९।। ततो हुमिति राज्ञोक्ते, सा जगाद ततः प्रिय ।। दापय संयमो मह्यं, गुरुपादांतिकेऽधुना ।।
श्रुत्वेति भूपतिःप्रीतः, प्रीताः सचिवपुंगवाः ।। सर्वेऽपि श्लाघयामासुः, साधु साध्विति तां मुहुः
भूपः प्रोचे प्रियेऽगं ते, कोमलं कठिनं व्रतम् ।। कथमौचित्यमत्रास्ति, मोहोऽपि खलु दुस्त्यजः ।।
साप्यद्‌गुरूपदेशेन, व्यामोहो मेऽव्यलीयत ।। पश्यामि सकलं विश्वं, ततोऽहं सदृशं दृशा ।।
पुनर्भूपो जगादैतां, कृत्वा राज्यस्य सूत्रणाम् ।। आददाने गुरोर्दीक्षां, मयि त्वमपि तां भज
परीक्षार्थं पुनः सोऽवक्, कस्मै राज्यं प्रदास्यते ।। सा जगौ तत्र जानामि, यद्योग्यं तत्समाचर
हृष्टो राजा विसृज्यैनां, सिंहनादाय सूनवे ।। राज्यं दत्वा तया साकं, गुरुपांतेऽग्रहीद्‌व्रतम्
अथ राज्यं पपौ तत्र, सिंहनादो नरेश्वरः ।। प्रतापाक्रांतदिक्चक्रः, शक्रोपमपराक्रमः ।।३७३।।
अन्येद्युर्भूपतेस्तस्य, सभायामधितस्थुषः ।। रवेर्बिंबमिवायासीद्विमानं व्योममंडले ।।३७७।। ।।१३९।।
उर्ध्वं पश्यत्सु लोकेषु, रत्नाभः खेचरस्ततः ।। श्यामया सहितः प्रापदास्थानं तन्नरेशितुः ।।

उत्थाय भूपतिः साकं सभया समया सह ॥ तौ द्वौ गौरवयामास, स्वसारं भगिनीपतिम् ॥
स्वस्रा प्रीत्या प्रदत्ताशीस्तन्निर्दिष्टः स विष्टरे ॥ आसीनः खेचरं वीक्ष्य, पप्रच्छ कुशलं नृपः
तेनोक्ते कुशले स्वीये, राजाप्याचष्ट तं निजम् ॥ एवं परस्परं वार्त्तावल्लीपल्लवितानयोः ॥
क्ष्मापतिं खेचरः प्रोचे, त्वयि गर्भस्थिते मया ॥ अनाहतानां वाद्यानां, मातुस्तेऽपूरि दोहदः
भूपः प्रोचे महाविद्यां, यदनाहतवाद्यतां ॥ स प्रोवाच मया दत्ता, तुभ्यं सा यदि रोचते ॥
ततः पठिता सिद्धा सा, तेन दत्ता प्रमोदतः ॥ आददे भूभुजा विद्यानवद्याश्चर्यकारिणी ॥
अथागृह्णाति भूपाले, स्थित्यर्थं खेचरो जगौ ॥ मलयाद्रिं गमिष्यामि, तत्र मे सार्थिका गताः
इत्युक्तिपूर्वमारुह्य, विमानं श्यामया सह ॥ दृशोरदृश्यतां सोऽगात्, स्वप्नदृष्ट इव क्षणात् ॥
ततः परं नरेंद्रस्यांगणे प्रोच्चैरवादयन् ॥ अनाहतानि वाद्यानि, विशेषाच्च रणांगणे ॥३८७॥
ततो भीता नृपाः सर्वे, तस्याज्ञां मेनिरे स्वयम् । तस्मै च ददिरे दंडमखंडद्युतिशालिने ॥
साम्राज्यं कुर्वतस्तस्य, प्रजापालनशालिनः ॥ वत्सराणां सहस्राणि, नित्यं सुखमयान्यगुः ॥
अन्येद्युस्तत्र संप्राप्ता, मुनिचंद्राख्यसूरयः ॥ तान्नंतुं सपरीवारो, जगाम पृथिवीपतिः ॥३९०॥

नत्वा श्रुत्वोपदेशं च, पप्रच्छ स्वभवं गुरून् ॥ ते प्रोचिरे पुरस्तस्य, नगरे हस्तिनापुरे ॥
श्रेष्ठिनो धनदत्तस्य, धर्मनामाभवत्सुतः ॥ पूजायां क्रियमाणायां, वाद्यपूजा कृतामुना ॥
जिनपूजाप्रभावेण, प्राज्यं राज्यमिदंतव ॥ वाद्यार्चनविशेषात्ते, तदानाहतवाद्यता ॥३९३॥
इत्थं पूर्वभवं श्रुत्वा, भूपो जातिस्मरोऽभवत् ॥ विशेषादार्हतंधर्मं, प्रपेदे गुरुसन्निधौ॥३९४॥
गुरून्नत्वा गृहं गत्वा, चिरं राज्यं स पालयन् ॥ तनुजं भानुनामानं, पट्टदेव्यामजीजनत् ॥
समये सूनवे राज्यं, दत्वा वैराग्यसंभृतः ॥ तेषामेव गुरूणां स, पार्श्वे संयममाददे ॥३९६॥
प्रपाल्य निरतीचारं, चारु चारित्रमुज्वलम् ॥ विहितानशनः प्रांते, सौधर्मे त्रिदशोऽभवत् ॥
चिरं सुखान्यसौ भुक्त्वा, देवलाकात्ततश्च्युतः ॥ षोडशःसोमनामासौ, तनुजस्तवभूपते ॥

॥ इति वाद्यपूजायां धर्मकथा ॥

नाट्यपूजा कृता येन, फलं तस्य निगद्यते ॥ पुरं पृथ्वीप्रतिष्ठानं, महाराष्ट्रेषु विद्यते ॥
बभूव जयदेवाख्यस्तत्र भूपतिकुंजरः ॥ करेणुक्यानिभातस्याभूज्जयश्रीः सुवल्लभा ॥४००॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तनुजो धनदत्तस्य, धीरस्तत्कुक्षिमागतः ॥ समये स तया जातः, पिता चक्रे महोत्सवम् ॥
रत्नसिंहाभिधः सोऽयं, वर्द्धमानो दिने दिने ॥ कलाकलापकौशल्यशाली तारुण्यमासदत्॥
धरणीधरभूपस्य, धारिणीकुक्षिसंभवा ॥ रमेति कन्या तेनोढा, रेमे च स तया सह ॥
अन्यदा रत्नसिंहस्य, रत्नपल्यंकशायिनः ॥ निशीथसमये निद्रा, नेत्रतो दूरतां गता ॥
सोऽथ जागरितोऽश्रौषीन्नाटयध्वनिममंदधीः ॥ मृदंगादिकवादित्रगीतगानमनोहरम् ॥४०५॥
रणन्नूपुरझंकारघर्घरीघोषबंधुरम् ॥ उल्लसन्मेखलादामकिंकिणीकंकणक्वणम् ॥ ४०६ ॥
श्रुत्वेति दध्यिवानेष, स धन्यो यस्य कस्यचित् ॥ पुरतो जायते नाटयमिदमाश्चर्यकारणम्
उत्थाय तल्पतः सैष, गवाक्षादिषु वीक्षणम् ॥ चकार चतुरस्तेनाक्षिप्तचेताः पुनः पुनः ॥
परं ददर्श न क्वापि, केवलं तद्ध्वनिःश्रुतः ॥ असौ विचिंतयामास, किमिदं कौतुकं महत्॥
अश्वप्लुतं यथा जायमानं श्रूयेत निश्चयः ॥ परं न शक्यते कर्तुं कुतश्चिद्भवतीत्यदः ॥
पाताले भूतले वापि, गिरौ वा गगनेऽपि वा ॥ अन्यत्र वा भवेत्क्वापि, नृत्यमेतन्मनोहरम्॥ 
कर्णयोर्जायतेहर्षो, नाटयस्य ध्वनितःश्रुतेः ॥ तस्यावीक्षणतः किंतु, खिद्यते नेत्रयोर्युगम् ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





एवं चिंतयतस्तस्य, शृण्वतस्तद्ध्वनिं मुदा ।। यामो जगाम यामिन्याः, प्रिया तेनाथ बोधिता
बोधयित्वा स तां यावत्, पृच्छतिस्म सविस्मयः।।तावन्नाट्यध्वनिस्तस्थौ, सा प्रोचे बोधितास्मि किम्
स जगाद श्रुतं किंचित्त्वया सापि पुनर्जगौ ।। श्रूयते भैरवीशब्दः, शृगालानां रवस्तथा ।।
स चकार ततो हास्यं, सा प्रोचे किं स्मितं प्रिय ।। अयुक्तं किं मया प्रोक्तं, येनेत्थं हस्यते त्वया
ततो नाट्यस्वरूपं स, जगाद दयितां प्रति ।। सा प्रोचेऽहं न जानामि, प्रमीलायां किमप्यभूत्
तस्यां संप्राप्तनिद्रायां, पुनः शुश्राव स ध्वनिम् ।। तेन द्राग्बोधिता सा तु, न शुश्राव किमप्यहो
किं वृथेति तया प्रोक्ते, विलक्षः स्वपितिस्म सः ।। प्रातः प्रबुद्धः प्राभातकार्याणि विदधे सुधीः
नाटयस्वरूपं पप्रच्छ, स स्वमित्राणि चैकशः ।। परं प्रोचे न केनापि, स्वल्पनिद्रावतापि हि ।।
एवं निशि निशि श्रुत्वा, तं नाटयध्वनिमद्भुतम् ।। मुहुर्मुहुश्च पृच्छंतं, दारामित्राणि तं जगुः
तव भ्रांतिरियं काचिदथवा चित्तविभ्रमः ।। ततोऽसौ मौनमाधाय, स्थितः शृण्वत्यपि स्वयम्
एकविंशतिघस्रेषु, व्यतीतेषु तथैव सः ।। नाटयाचिंतातुरो रात्रौ, तेजःपटलमैक्षत ।।४२३।।
सोद्योते मंदिरे जाते, तेजसा तेन सोग्रतः ।। ददर्श दैवतं दिव्यमालालंकारसुंदरम् ।।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





विस्मितो रत्नसिंहस्तं, विलोक्य रविभास्वरम् ॥ वक्त्रपद्मं दधौ युक्तं, रात्रावपि विकस्वरम्॥
कोऽयं कथं कुतः प्राप्त, इति चिंतां वितन्वति ॥ तस्मिन्नसौ जगादेति, श्रूयतां सुकृतालय
नाट्यस्य चिंता ते चित्ते, वरिवर्ति निरंतरम् ॥ तत्स्वरूपमहं वक्तुं, प्राप्तोऽस्मि व्यंतरामरः ॥
मूलतः शृणु संबंधमस्ति रत्नपुरं पुरम् ॥ शंकरो भूपतिस्तत्राभवल्लोकप्रियंकरः ॥ ४२८ ॥
गौरी नाम्ना प्रिया चासीत्, गौरीवास्य मनोहरा ॥ शैवधर्मैतयोश्चित्तं, वसतिस्म क्रमागते॥
अन्यदा सुषुवे पुत्रपुत्रीयुग्मं नृपप्रिया ॥ पद्मनामाभवत्पुत्रः पुत्री च कमलाभिधा ॥४३०॥
तयोर्मासे व्यतिक्रांते, तत्रायातास्तपस्विनः ॥ नंतुं जगाम भूपालः पालयन् स्वकुलक्रमम् ॥
तेषां धर्मोपदेशंतु, श्रुत्वा वैराग्यकारणम् ॥ मासजातं सुतं न्यस्य, राज्ये दीक्षामुपाददे ॥
बिभ्राणः स जटाभारं, भस्मोद्धूलितगात्रभाक् ॥ भूपो जगाम तैः साकमाश्रमं श्रमवर्जितः॥
पितुर्गृहं प्रति प्राज्यपरिवारसमन्विता ॥ मिलनाय तदा राज्ञी, युगलेन सहाचलत ॥४३४॥
राज्यभारधृतौ स्तंभा, निर्दंभा मंत्रिणस्तदा ॥ अनुगत्य कियद्राज्ञीं, तद्विसृष्टाःपुरं ययुः ॥ ।१४४।
तस्यामटव्यां प्राप्तायां, भिल्लधाटी समापतत ॥ लोकेषु लुंटयमानेशु, प्रणष्टाःसुभटा अपि ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ततःपलायमाना सा, गृहीत्वा तनयं गता ॥ अत्यंतव्याकुलत्वेन, पुत्री तत्रैव विस्मृता ॥
ततो गतेषु तेषु च, लोकास्ते मिलिताः पुनः ॥ विस्मृतां शोधयामास, राज्ञी निजसुतां नरैः ॥
अप्राप्य तां वने क्वापि, सा जगाम पितुर्गृहम् ॥ मातापितृभ्यामानंदं दधाना तत्र तस्थुषी ॥
तत्र स्थित्वा कियत्कालं, सा जगाम निजं पुरम् ॥ तनयं वर्द्धयामास, शैशवादपि भूपतिम् ॥
तत्र तारुण्यमारूढे, लसल्लावण्यशालिनि ॥ तद्योग्यां कन्यकां राज्ञी, पप्रच्छ निजमंत्रिणः ॥
कोऽपि प्रोचे पुरे पद्मनाभाख्ये शिवभूपतेः ॥ वनमालाभिधा कन्या, वर्त्तते रूपशालिनी
तदैव प्रेषयामास, तदर्थं सा निजान्नरान् ॥ पद्मनाभपुरं गत्वा, ते शिवं तां ययाचिरे ॥
तां प्राप्य लग्नं संस्थाप्य, ते निजं पुरमागताः ॥ गौर्यै विज्ञापयामासुस्तत्सर्वं मत्सरोज्झिताः ॥
ततो विवाहसामग्री, जायतेस्म महोद्यमात् ॥ तदा शंकरराजर्षिः सहसा पुरमाययौ ॥
तमायांतं वने दृष्ट्वा, मंत्रीस्वभवने स्थितः ॥ वातायने निविष्टः स्वे, चिंतयामास चेतसि
हलकृष्टाममी भूमिं, नाक्रामंति तपस्विनः ॥ ततःकथमयं प्राप्तः, किंमनस्तपसःश्लथम् ॥
तदा राज्यं परित्यज्य, रभस्येन वनं ययौ ॥ विंध्यं गज इव स्मृत्वा, पुनरेषसमाययौ ॥



For Private and Personal Use Only

परीक्ष्येहं ततो गत्वा स्वरूपं स्वयमेव तत् ॥ पश्चात्पद्मनरेंद्राय, कथयामि यथोचितम् ॥
इति ध्यात्वा वनं गत्वा, मुनिं नत्वा निविष्टवान् ॥ प्रपच्छ कुशलं मंत्री, भक्त्या विरचितांजलिः
अस्माकं केवलाद्भाग्याद्यूयमत्र समागताः ॥ केनापि हेतुना वेति, विज्ञप्तो मुनिरब्रवीत् ॥
सर्वत्र कुशलप्रश्नः, प्रायशः क्रियते जनैः ॥ परं मंत्रिन् मनुष्याणां, कुशलत्वं विलोक्यते ॥
पद्मः किं न समायातस्तन्माता किं समेति न ॥ तां वार्तां कथय क्षिप्रं, ब्रवीम्यागमकारणम् ॥
श्रुत्वेत्यचिंतयन्मंत्री, यन्मया चिंतितं पुरा ॥ तदेव घटते सत्यं, हा त्वया किं कृतं विधे ॥
विहिते कुशलप्रश्ने, कुशलत्वं विलोक्यते ॥ इत्येषा कापि वक्रोक्तिर्विशेषं वक्ति कंचन ॥
इति ध्यायन्नसौ शीघ्रं, गत्वा गौर्यै न्यवेदयत् ॥ तत्क्षणंसापि साशंकाकार्यं पुत्रमभाषत ॥
हे वत्स जनकस्तेद्य, संप्राप्तो वर्तते वने ॥ सोऽवादीत्तर्हि तं नंतुं, गच्छामि सपरिच्छदः ॥
सा प्रोचे वत्स नो वेत्सि, स्वरूपं रूपमन्मथ ॥ स्थातव्यं तावदत्रैव, यावन्नाकारयाम्यहम् ॥
इत्युक्त्वा तत्र संस्थाप्य, पद्मं पद्मोपमानना ॥ तेनैव मंत्रिणा साकं, सा गता मुनिसंनिधौ ॥ ।१४६।
वाताहतमिवादर्शं, किंचिद्विच्छायतां गता ॥ वदनं तस्य पश्यंती, दंडवत्प्रणनाम सा ॥

मुनिः प्रोवाच किं नागात्पङ्गः किं वारितस्त्वया ॥ अहं स्वरूपं जानामि, तवास्य सचिवस्य च
श्रुत्वेति राज्ञी मंत्री च, किंचिद्वीक्ष्य परस्परम् ॥ निश्चयं चक्रतुरस्य, चिंतितस्यैव मानसे ॥
राज्ञी बभाषे वः पुत्रः, सांप्रतं परिणेष्यते ॥ ततो विवाहसामग्री जायतेऽद्य महोद्यमात् ॥
अस्य चिंता गले क्षिप्ता, भवद्भिर्बाल्य एवहि ॥ ततस्तेनैन सा कार्या, कस्तस्थान्यःकरोति ताम्
शिरो धुन्वन्मुनिः प्रोचे, चिंतयालं त्वयाधुना ॥ यदहं वच्मि तच्चित्ते, चिंत्यतां नान्यथाशुभम्
राज्ञी दध्यौ धुत्रं चित्तमस्य राज्याभिलाषुकम् ॥ दत्ते शापमपि क्रुद्धस्ततो भवति किं शुभम्
किं चित्रमत्र चेद्विश्वामित्राद्या अपि वंचिताः ॥ विषयैर्वनवासेऽपि वनितावेषवीक्षणे ॥
यद्वा नित्यं पुराणेपि, श्रुतं भागवताभिधे ॥ नारदात्प्राप्तवैराग्यः, प्रव्रज्यायां परायणः ॥
प्रियव्रतनृपो राज्यं, बुभुजे भुजविक्रमी ॥ तद्वंशे च क्रमेणाभूद्वृषभः प्रथमो जिनः ॥
चित्तं पुण्यगृहे स्तंभस्तच्चेच्चलितमात्मनः॥ तत्कथं स्थिरतां याति, वाक्यदुर्बलदारुभिः ॥
हसतां रुदतां वायमतिथिः समुपागतः ॥ हसद्भिर्गृह्यते तर्हि, यद्भाव्यं तद्भवत्यथ ॥
चिंतयित्वेति सा राज्ञी, पुत्रमाकारयत्तदा ॥ तत्क्षणं स समायातो, मुनिं नत्वा निविष्टवान्



For Private and Personal Use Only

मुनिःप्रोचे यदस्माकं, चित्ते तद्भवतां नहि ॥ अन्यतो जायते बुंबा, व्याहारः क्रियतेऽन्यतः
अहिताय समायातस्तातः कातरतां गतः ॥ इति चिंता न कर्तव्या, त्वया वत्स कदाचन ॥
तपांसि कुर्वतो ज्ञानमुत्पन्नं मम सांप्रतम् ॥ तेन ज्ञानेन विज्ञातं, भवतामसमंजसम् ॥
हितार्थं भवतां पृथ्वीं, हलैः कृष्टामचिंतयन् ॥ इहायातोऽस्मितत्सर्वैः श्रूयतां तत्वसंकथा॥
या बाला वनमालाख्या, याचिता शिवभूपतेः ॥ ज्ञायतां ननु सामुष्य, सुतस्यैव सहोदरी
पित्रोः संगमसोत्कंठा, पुत्रमाता तदाचलत् ॥ प्रासायामटवीमस्यां, भिल्लधाटी समापतत् ॥
नष्टा पलायमानेयं, पुत्री तत्रैव विस्मृता ॥ शोधितापि न सा लब्धा, पितुर्गृहमियं ययौ ॥
तदा तां पतितां तत्र, पद्मनाभपुराधिपः ॥ मृगयार्थं समायातः शिवो दृष्ट्वाग्रहीद्द्रुतम् ॥
अनपत्येन तेनेयं, गत्वा पत्न्यै समर्पिता ॥ वने लब्धेति सावर्द्धद्वनमालाख्यया सुखम् ॥
इति स्वरूपं विज्ञाय, कार्यं कार्यं यथोचितम् ॥ आशीर्वचोऽस्तु पुत्राय, वयं यामो निजाश्रमम्
मुनिं मंत्री च राज्ञी च, क्षमयामासतुस्ततः ॥ हितस्य हितं चित्तेऽस्ति, चिंतितं हन्यतामिति ।१४८।
अथ गते मुनौ तत्र, तेऽपि मंदिरमागताः ॥ सचिवेन शिवे प्रष्टे, ज्ञातवृत्तः श्रमत्कृताः ॥

ततः सा चलिता सैन्यसहिता नगरात्ततः ॥ प्रायःशंकरराजर्षिसंश्रितं वनमंतरा ॥ ४८५ ॥
सात्र तातं निजं ज्ञात्वा, ववंदे सपरिच्छदा ॥ प्रमोदाश्रुपरिव्याप्तमाननेत्रद्वया स्यात्॥ ५८६ ॥
तपस्विना बभाषे सा, तपोग्रहणहेतवे ॥ नानुमेने च सा बंधुजननीसंगमोत्सुका ॥
ततस्तेन विसृष्टा सा, ययौ रत्नपुरं पुरम् ॥ अभ्यायातप्रसूबंधुप्रीणिता सौधमागता ॥
वरेषु चिंत्यमानेषु, तद्योग्येष्वन्यदा मुदा ॥ बांधवस्यांतिकं प्राप्ता, सभायां सा सुलोचना
समुद्रमंत्रिणःपुत्रः सागराख्यः सरागधीः ॥ संपूर्णयौवनामेतां दृष्ट्वा चित्ते व्यचिंतयत ॥
येन केनाप्युपायेन, स्वीकार्यासौ मया ध्रुवम् ॥ पारवश्यं न यात्येषा, यावदन्यस्य कस्यचित्
ध्यात्वेति स जगौ तातं, रहःस्थित्वा विलज्जधीः ॥ पुत्रेण यदि कार्यं ते, तदुक्तं कार्यमेव तत्
बुद्धिं कुरुष्व तां तात, कातर्येणोज्झितां यया ॥ वनमाला विशालाक्षी, जायते गृहिणी मम
मुखे प्रदाय हस्तं स, बभाषे किं त्वयोदितम् ॥ सा कथं लभ्यते वत्स, परिणेतुं प्रभोः स्वसा
सोऽवादीत् किं बहूक्तेन, वरं कूपे पताम्यहम् ॥ क्षिपामि क्षुरिकां कुक्षौ, नच तिष्ठामि तां विना
मंत्री प्रोचे न ते वत्स, भूपे जीवति सा भवेत् ॥ स्वामिद्रोहोऽपि तच्चिंत्यः, सोऽवादीत् कुरु तत्क्षणम्

इति मंत्रं चतुःकर्णं कृत्वा तौ निर्गतौ बहिः ॥ तथैव चक्रतुर्दत्वा, विषं पद्माय पापिनौ ॥
विषेण व्याकुले भूपे, पतिते पृथिवीतले ॥ सा गौरी वनमाला च, मिलितश्च परिच्छदः
चित्तं विना प्रतीकारा, द्रुतमारेभिरे ततः ॥ गुणो न तस्य कोऽप्यासीद्रोदितिस्म जनोऽखिलः
रुदत्यां वनमालायां, गौर्यां सर्वपरिच्छदे ॥ चारणश्रमणश्चंद्रस्तत्रागाल्लाभहेतवे॥५००॥
अहोभाग्यमहो भाग्यं, प्राप्तोऽयं मुनिपुंगवः ॥ एतेन ज्ञायते नूनं, भव्यमेव भविष्यति ॥
एवंलोके वदत्येव, तत्पादक्षालनोदकैः ॥ मातृस्वसृभ्यां सिक्तोऽभून्निर्विषो नृपतिःक्षणात् ॥
अथोत्थाय निविष्टोग्रे, मुनिं नत्वा नृपो जगौ॥ कथ्यतां केन मे दत्तं, वैरिणा विषमुत्कटम् ।
चित्ते व्याकुलयोर्बाढं, प्रश्नेऽस्मिन् मंत्रिपुत्रयोः। मुनिः प्रोवाच जानीषे, कं दंडं त्वं विधास्यसि
भूपो जगौ रुषा मूलात्तमुच्छेत्स्यामि निश्चितम्॥ मुनिः प्रोचे ततो राजन्, श्रूयतां कथ्यते यथा
विषस्य दायकौ तौ द्वौ, संप्रताय निरंतरम् ॥ यत्रैकस्तत्र चान्यः स्यादेवं प्रीतिपरायणौ ॥
अस्मिन्नवसरे तौ द्वौ, दध्यतुर्निजचेतसि ॥ सा कुबुद्धिःकृतावाभ्यां, यया प्राप्तः कुलक्षयः
मुनिः प्राचे तयोर्नाम, कथ्यमानं निशम्यताम् ॥ रागोद्वेषस्तथा तौ द्वौ, प्रत्यासन्नौ शरीरिणाम्



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

 

यत्र रागो भवेत्तत्र, द्वेषो भवति निश्चितम् ॥ सांनिध्यं भवतः शश्वद्विख्यात्वैरिणस्तयोः ॥
तौ त्वं मूलादपि यदि सत्यप्रतिज्ञता ॥ एवमुक्त्वा स्थिते साधौ, सर्वःकोऽपि विसिष्मिये ॥
 प्रोचतुर्मंत्रिपुत्रौ च, स्पृशंतौ चरणौ मुनेः ॥ भाग्येन सर्वलोकानां, बभूव भवदागमः ॥
पुनर्भूपं मुनिःप्रोचे, नराः सर्वे नराधिप ॥ प्रेरिता रागद्वेषाभ्यामकृत्यानि प्रकुर्वते ॥५१२॥
प्रस्तरेणाहतः श्वाचेत्, प्रस्तरं दष्टुमिच्छति ॥ मृगारिस्तु शरं प्राप्य, शरोत्पत्तिं विलोकयेत्
यत्प्रेरितेन केनापि, विषं दत्तं तवाधुना ॥ तन्नाम्नि कथिते किं स्याद्रागं द्वेषं च संहर ॥
भूपेन वीक्षिते वक्त्रे, मंत्री प्रोवाच सादरम् ॥ सत्यं तदेव हे देव, यन्मुनिर्वक्ति वत्सलः ॥
प्रोचे प्रबुध्धो भूपस्तं, राज्यं क्वापि निधीयताम् ॥ अपुत्रोऽहं यथा दीक्षां, गृह्णामि मुनिसंनिधौ
तद्राज्यं सागरायैव, दत्वा मंत्रिनरेश्वरौ ॥ पार्श्वे प्राव्रजतां तस्य, साधोः साम्यरसान्वितौ ॥
अद्भुता समितिर्वाचः साधूनामिति सागरः ॥ शिवधर्मं परित्यज्य, जिनधर्मपरोऽभवत् ॥
ताभ्यां युते गते साधौ, सागरः पृथिवीपतिः ॥ तद्राज्यं पालयामास, रेमे च वनमालया ॥ 
वनमालान्यदा स्वप्ने तातं वीक्ष्य, तपस्विनम् ॥ नृपानुमत्या गत्वा तत्पार्श्वे जाता तपस्विनी॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कालेशंकरराजर्षिर्गृहीतानशनस्तया ।। प्रोचे तात त्वया बोध्याहं भवेत्र परत्र वा ।।५२१।।
तत्प्रपद्य मृतः सोऽभूद्व्यंतरेंद्रो भुवस्तले ।। परिज्ञेयः स एवाहं, भवतःपुरतःस्थितः ।।५२२।।
मया पूर्वभवेऽकारि, शैवधर्मोऽन्वहं पुनः ।। जिनधर्मसमो धर्मो, न भूतो न भविष्यति ।।
वनमालापि मृत्वाभूत्पुर्यामस्यां धनेशितुः ।। धनेश्वराभिधानस्य, रत्नश्रीरिति पुत्रिका ।।
साधुना यौवनेनालंकृता लावण्यसाधुना ।। तद्बोधाय समेतोऽस्मि, सा पुनर्नैव बुध्यते ।।
तस्यास्वप्ने मया स्वर्गा नरकाश्चापि दर्शिताः ।। मालास्वप्नानहं पश्यामीति प्रातर्जजल्प सा
दिव्यनाट्यध्वनिश्चक्रे, चैकविंशतिवासरान् ।। परं तस्याः प्रमीलायां, न सोऽभूत्कर्णगोचरः ।।
प्रत्यक्षीभूय चेत्किंचित्स्वरूपं कथयाम्यहम् ।। भीता विमुच्य पूत्कारं, सा तन्नश्यति बालवत्
एवंविधे स्वरूपेऽस्याः, कथं धर्मः प्रकाश्यते ।। ग्रामं विना कुतःसीमा, विना पुत्रं कुतःकुलम्
त्वं तु पूर्वकृतप्राज्यपुण्यसंभारसंश्रितः ।। स्वयमेव शृणोष्येनं, दिव्यनाट्यध्वनिं निशि ।।५३०।।
सोऽहंतस्यां परिश्रांतस्त्वां प्राप्तोऽस्म्यद्य सुंदर ।। त्वया प्रातर्विवाह्यासौ, त्वत्संगाद्धर्ममाप्स्यति।।
सा पार्श्वे जैनसाधूनां, नेतव्या धर्महेतवे ।। तुष्टो चाद्याभिलाषात्ते दिव्यनाटयं करोम्यहम्



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एवमुक्त्वा स्वरूपं स व्यंतरेंद्रस्तिरोदधे ॥ प्रातः प्रबुद्धः स्वंतातमयं नंतुं समागतः ॥५३३॥
तदा धनेश्वरः श्रेष्ठी, स्थालमापूर्य मौक्तिकैः ॥ नृपाय प्राभृतीचक्रे, प्रोचे च रचितांजलिः॥
हे देव देवता कापि, स्वप्नेमामित्युपादिशत् ॥ रत्नसिंहाय दातव्या, स्वपुत्री नृपसूनवे ॥
तेनैषा दीयते तस्मै, वरेष्वन्येषु भूरिषु ॥ ओमित्युक्ते नरेंद्रेण, स तया परिणायितः ॥
ताभ्यां शुभाभ्यां भार्याभ्यां, महितोऽयमनंगवत् ॥ रतिप्रीतिममाभ्यां स, रेमे स्वैरं वनादिषु॥
इतश्च तत्र संप्राप्ता, रत्नशेखरसूरयः ॥ भूपो जगाम तं नंतुं, परिवारसमन्वितः ॥५३८॥
प्रियाद्वययुतो रत्नसिंहोऽपि प्रीतमानसः ॥ गत्वा नत्वा च सूरींद्रानश्रौषीद्धर्मदेशनाम् ॥
भो भो अनादिमिथ्यात्वपरिहारेण भावतः ॥ जैनधर्मो विधातव्यः, शिवशर्मनिबंधनम् ॥
शैवं मीमांसकं सांख्यं, बौध्धं नैयायिकं तथा ॥ एतानि दर्शनान्याहुर्धर्मं मर्मविवर्जितम् ॥
स्याद्वादरूपं मर्म स्यादथवा प्राणिनां दया ॥ तेन मुक्तोऽखिलो धर्मो, जीवेनांगमिवाफलः
वने वासं प्रकुर्वाणाः शैवास्तावत्तपस्विनः ॥ दर्भानुन्मूलयंत्येव, त्वचं गृह्णंति शाखिनाम्
शोभाकिन्निंगुदीतैले, मंचिन्वंत्यन्वहं च ये ॥ दहंति समिधस्तेषां, धर्ममर्मज्ञता कुतः ॥



For Private and Personal Use Only

शास्त्राण्यधीत्य ये विप्राद्या अपि प्राणिहिंसनम् ॥ कुर्वंति सर्वदा तेषां धर्ममर्मज्ञता कुतः॥
एवंश्रुत्वा गुरोर्वाक्यं, रत्नश्रीर्जातिमस्मरत् ॥ मिथ्यात्वं स्वं च निंदंती, सा सम्यक्त्वमुपाददे
व्यंतरेंद्रोऽपि तद् ज्ञात्वा, गत्वानत्य प्रमोदतः ॥ नाटयं विधाय सम्यक्त्वमुपादत्त मुनीश्वरात्
रत्नसिंहोऽपि पप्रच्छ, निजं पूर्वभवं गुरून् ।. ते प्रोचुः श्रूयतामस्ति, हस्तिनागपुरं पुरम् ॥
श्रेष्ठयत्र धनदत्तोऽभूत्तस्य धीराभिधःसुतः॥ श्री जिनेंद्रस्य पूजायां, नाटयपूजामुना कृता॥
तज्जीवस्त्वमभूराजकुले राज्यं च लप्स्यसे ॥ नाटयपूजाविशेषेण, व्यंतरो नाटयकृत्तव ॥
श्रुत्वैवं स्वभवं रत्नसिंहो जातिस्मरोऽभवत् ॥ विशेषादार्हतंधर्मं, प्रपेदे मुनिसंनिधौ ॥
मुनिं नत्वा गृहं गत्वा, दत्वा राज्यं स्वसूनवे ॥ गुरोःसंप्राप्तवैराग्यो, जयदेवोऽग्रहीद्व्रतम् ॥
प्रियाभ्यां सहितः पुण्य-कर्त्तव्येषु परायणः ॥ रत्नसिंहोऽथ भूपालस्तत्र राज्यमपालयत ॥
अन्यदा न्यस्य राज्येऽसौ, पुत्रं रत्नप्रियाभिधम् ॥ तेषामेव गुरुणां स, पार्श्वे संयममग्रहीत्
प्रपाल्य निरतीचारं, चारु चारित्रमुज्वलम् ॥ गृहीतानशनः प्रांते, सौधर्मे त्रिदशोऽभवत॥
चिरं सुखान्यसौ भुक्त्वा, देवलोकात्ततच्युतः॥ राजन् सागरनामाभूत्पुत्रः सप्तदशस्तव ॥



For Private and Personal Use Only

॥ इति नाट्यपूजायां धीरकथा ॥

एवं सप्तदशाप्येते, सुतास्ते शैशवादपि ॥ जातिस्मरणमापन्ना, दृष्टे पार्श्वे जिनालये ॥
तेन स्तन्यमपि प्रायो, न पिबंति विचक्षणाः ॥ यावन्नमंति न पार्श्वदेवमेते प्रगे मुदा ॥
प्रवर्द्धमानाः सर्वेऽमी जिनभक्तिमनोहराः ॥ विशेषतो भविष्यंति, जलसिक्ता द्रुमा इव ॥
जिनपूजाविधानेन, भवता भवतारणम् ॥ विंशतिस्थानकेष्वाद्यं, स्थानं स्पृष्टं विभाव्यताम्
तीर्थकृत्समकर्मार्जीम् त्रिविधं तेन पार्थिव ॥ जिनो महाविदेहेषु, भूत्वा त्वं सिद्धिमाप्स्यसि॥
तदा सप्तदशाप्येते, सुता गणधरास्तव ॥ भवितारस्तमोध्वंसे, सवितार इवामलाः ॥५६२॥
इति श्रुत्वा मुनेर्वाक्यं, भूपतिःप्रीतमानसः॥ पुनःपप्रच्छ संदेहमेकं नृपशिरोमणिः ॥५६३॥
कथं सिंहलराजस्य, सुतात्र स्वयमागता ॥ तद्विवाहकृते तस्याः सचिवोऽपि ययौ च क्व ॥
मुनिः प्रोवाच पार्श्वे सोऽधिष्ठाता व्यंतरस्तव ॥ हितैषी कृतवान्सर्वमेतत् सुकृतशालिनः॥
पूर्वजन्मानुरागेण, पूर्वजन्मप्रिया इमाः ॥ चतस्रोऽपि च त्वां प्रापुरधुनापि कलावतीः॥

इति श्रुत्वा मुनिं नत्वा, प्रमोदात् पृथिवीपतिः ।। सपुत्रसपरिवारो, जगाम निजमंदिरम् ।।
नरवर्मापि धर्माब्धिसमुद्वेलनचंद्रमाः ।। विजहार सनीहारहारोज्वलयशोभरः ।। ५३८ ।।
काले कलाकलापज्ञाः, प्रज्ञाप्राग्भारतोऽभवत ।। उपाध्यायस्य सांनिध्यात्पुत्रास्ते गुणवर्मणः
क्रमेण शैशवं हित्वा श्रितास्ते यौवनं वनम् ।। वधूवल्लीभिराश्लिष्टा, रेजिरे कल्पवृक्षवत् ।।
पश्चिमे रजनीयामे, गुणवर्मा नृपोऽन्यदा ।। भावनां भावयामास, स एव भवनाशनीम्
भुक्तं राज्यं चिरं जाता, पुत्रा पौत्रादिभिर्वृताः ।। संवृत्ता एव भांत्येते, व्यापाराः पापहेतवे
नानिलैःपूर्यते व्योम, वारिधिः सलिलैर्न च ।। वन्हिस्तृप्यति काष्ठैर्न, जीवो न विषयैस्तथा
अभिरामा इमा रामाः, कामासक्तैकचेतसाम् ।। साम्यस्पृशा दृशा दृष्टाअनिष्टा एव ताःपुनः
यदि प्रातः समायाति, तातः केवलभास्करः ।। राज्यं पुत्रेषु विन्यस्य, तदा दीक्षामुपाददे ।।
एवं चिंतयतस्तस्य, प्रभातसमयोऽभवत् ।। नेदुर्मंगलतूर्याणि, प्रोचुर्मंगलपाठकाः ।।५७६।।
यावत्तल्पं नृपो हित्वा, कृतप्राभातिकक्रियः ।। समायाति सभां तावदागत्यारामिकोऽवदत् ।।
वनं पुनंति ते तातपादाः संप्रति भूपते ।। सुरासुरकृते स्वर्णकमले हंसवस्थिताः ।।५७८।।



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रुत्वेति भूपतिःप्रीतमानसः सपरिच्छदः ॥ तत्र गत्वा मुनिं नत्वा, पुरतः सन्निविष्टवान् ॥
केवली देशनां चक्रे, भो भव्या भववारिधौ ॥ चिंतामणिसमं मर्त्यं, न पुनः प्राप्यते जनैः
तत्रापि जैनधर्मोऽयं, जैनधर्मेऽपि संयमः ॥ संयमेनैव सा स्याच्च, प्राणिनां सिद्धिकामिनी
इति श्रुत्वा मुनिं नत्वा, गृहं गत्वा नरेश्वरः ॥ पुत्रं प्रथमराजाख्यं, निजराज्ये न्यवीविशत् ॥
पृथक् पृथक् स्वदेशेषु, पुत्रान्निवेश्य स स्वयम् ॥ नरवर्ममुनेः पार्श्वे, संयममाददे मुदा ॥
दधानो द्विविधां शिक्षां, स चतुर्दशपूर्वभृत् ॥ प्राप्य सूरिपदं पृथ्व्यां, व्याहरत्सपरिच्छदः ॥
गुणवर्मसुतास्ते च, राज्येषु स्वेषु संस्थिताः ॥ राज्यानि पालयामासुरन्योऽन्यं प्रीतिशालिनः
जैनेंद्रं भवनं बिंबं, तत्प्रतिष्ठा च पुस्तकम् ॥ चतुर्द्धा संघभक्तिं ते, तीर्थयात्रां च चक्रिरे ॥
सर्वप्रकारैःसर्वेऽमी, त्रिसंध्यं जिनपूजनम् ॥ चक्रिरे निजदेशे च, सप्तव्यसनवारणाम् ॥
अन्येद्युस्तीर्थयात्रायां, समेता हस्तिनापुरे ॥ मिलिताःबांधवाःसर्वे तेऽन्योऽन्यं प्रीतिशालिनः
नरवर्ममुनौ सिद्धिं, संप्राप्ते विहरन्महीम् ॥ गुणवर्मगुरुस्तत्र, तदागात्तीर्थयात्रया ॥५८९॥



For Private and Personal Use Only

अनभ्रवृष्टिवत्प्राप्तं, तातं दृष्ट्वा प्रमोदतः ॥ तेऽमुं ववंदिरे प्रीत्या, शुश्रुवुर्धर्मदेशनाम् ॥
धर्मार्थकाममोक्षेषु धर्मो मूलं निगद्यते ॥ अर्थादयो मूलरूपाद्धर्मादेव भवंति हि ॥५९१॥
तारणाय भवांभोधौ, धर्मस्तावत्तरीसमः ॥ चारित्रमेव चारित्रतुलां तत्र बिभर्त्यलम् ॥५९२॥
राज्यमाज्यमिव त्याज्यं, सज्वरेणेव धीमता ॥ यतःस्वल्पसुखं जंतोरत्यंतं दुःखसंचयः ॥
ज्ञानदर्शनचारित्ररत्नत्रयविभूषितम् ॥ जीवं सौंदर्यतः स्वैरं, वृणुते सिद्धिकामिनी ॥५९४॥
इति श्रुत्वा समं प्राप्तवैराग्यास्ते नरेश्वराः ॥ न्यस्य राज्ये निजान्पुत्रान्, चाददुः संयमं मुदा
क्रोधो निर्मूलितः पश्चान्मानस्तैरपमानितः ॥ मायाच्छाया परित्यक्ता, लोभक्षोभश्च वारित
ते गुरुणां मुखांभोजादागमं मकरंदवत् ॥ पिबंतो भृंगवद्भेजुः, परं मालिन्यवर्जिताः ॥
पंचबाणस्य बाणानां, पंचानामपि वारणी ॥ पंचधा समितिस्तेषां, चित्तेषु स्थितिमातनोत् ॥
गुणवर्मगुरुर्योग्यं, गुणान्वितं निजे पदे ॥ शिष्यं संस्थापयामास, शासनस्य प्रवर्त्तकम् ॥
ते सर्व आयुरापूर्य, गृहीतानशनास्ततः ॥ शुभध्यानपरा मृत्वा, ब्रह्मलोकं दिवं ययुः ॥
चिरं सुखान्यमी भुक्त्वा, देवलोकात्ततश्च्युताः ॥ समुत्पद्य विदेहेषु, सिद्धिमाप्स्यंति सिद्धिदाः



For Private and Personal Use Only

श्रुत्वा मुदार्चनविधिप्रमुखप्रकारान्, पंचात्र तत्फलविलासविचारसारान् ॥
तानादितः स्तुत च सप्तदशापि पुण्यमाणिक्यसुंदररुचिं भविका भजध्वम् ॥ ६०२ ॥



॥ इति श्री अंचलगच्छेश श्री माणिक्यसूरिविरचिते पूजाधिकारे
गुणवर्मचरित्रे साक्षताष्टमांगलिकपूजाफल-
वर्णनो नाम पंचमः सर्गः ॥

## ॥ अथ प्रशस्तिः ॥

एवं स्नात्रविलेपनां शुकयुगाध्यारोपवासार्चनापुष्पस्रग्वरवर्णसिंचनचयालंकारपुष्पालयाः ॥
सत्पुष्पप्रकराऽक्षतार्चनमथो धूपं च गीतं तथा, वाद्यं नाट्यमहो जयंतु जगतां नाथस्य पूजाइमाः
कथा व्यरचयच्च गुरूपदेशान्माणिक्यसुंदरगुरुर्जगतां हिताय ॥
यंतु मुनयः परिभावयंतु, तद्वज्जिनार्चनविधीनुपदेशयंतु ॥ २ ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चतुरशीत्यधिकेषु समाचतु–र्दशसु तेषु गतेषु च विक्रमात् ॥
अयमभूज्जिनपूजनसत्कथा–समुदयः स करोत्विह मंगलम् ॥ ३ ॥
श्रीवर्द्धमानजिनभवन–भूषिते रचित एष सत्यपुरे ॥
ग्रंथः श्रीमदुपाध्याय–धर्मनंदनविशिष्टसांनिध्यात् ॥ ४ ॥

माणिक्यांकश्चतुःपर्व्वी, शुकराजकथा तथा ॥ पृथ्वीचंद्रचरित्रं च, ग्रंथा एतेऽस्य बांधवाः ॥
यावन् मेरुर्महीयावद्यावच्चंद्रदिवाकरौ ॥ वाच्यमानो जनैस्तावद्, ग्रंथोऽयं भुवि नंदतात् ॥
मंगलं सर्वसंघाय, कर्त्रे भवतु मंगलम् ॥ व्याख्यायकेभ्यो मांगल्यं, श्रोत्रे भवतु मंगलम् ॥

॥ इति प्रशस्तिः ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private and Personal Use Only